।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

# आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

## पुनितप्रेरणा व आशीर्वाद

## राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

## जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

**श्री महावीर जैन आराधना केन्द्र**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
**Websiet :** www.kobatirth.org
**Email :** Kendra@kobatirth.org

**शहर शाखा**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ श्रीमच्छङ्कराचार्यभगवत्पादेभ्यो नमः ॥

श्रीमद्गीर्वाणेन्द्रसरस्वतीविरचितः

# प्रपञ्चसारसंग्रहः

व्याख्यानसंभिन्नः प्रारभ्यते

॥ विद्योदयो निराकुर्यादविद्यातिमिरं सदा ॥ सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सा. श्रीगणेशायनमः॥ नत्वाश्रीशङ्कराचार्यममरेन्द्रयतीश्वरम्॥ कुर्वेप्रपञ्चसारस्यसारसङ्ग्रहमुत्तमम्॥१॥ तत्रप्रपञ्चसारेय
१ द्यच्छङ्कराचार्यैरुक्तंमन्त्रयन्त्रप्रयोगादितत्सर्वमपिसारभूतमेवतथापीदानींमन्दप्रज्ञानांविस्तरतोज्ञातुमनुष्ठातुञ्चाशक्य
त्वादत्यन्तोपकारभूतत्वेनयत्सारतरन्तदल्पग्रन्थेनैवयथासर्वमन्त्रयन्त्रतन्त्रसारग्रहणंस्यात्तथासर्वतःसारङ्गृहीत्वामया
सत्संप्रदायसर्वस्वाभिधव्याख्यानोक्तमार्गेणवक्ष्यते॥ तत्रपुनःप्रसङ्गात्तत्रतत्रमन्त्रकल्पान्तरेमन्त्रसारक्रमदीपिकासन
त्कुमारीयशारदातिलकमन्त्रदेवताप्रकाशिकादौयद्यन्मन्त्रयन्त्रतन्त्राद्युक्तंतदपिकिंचिद्दृश्यते॥ तत्रप्रपञ्चसारेप्रथमन्ता
वत्क्षीराब्धौशेषपर्यङ्कशायिनंमहाविष्णुंप्रतिब्रह्मादिभिस्त्रिमूर्तिभिस्तेषामुत्पत्त्यादिविषयःप्रश्नप्रकारःप्रथमेपटलेनि
रूपितः॥ पुनर्विष्णुनातदुत्तररूपेणत्रिगुणात्मिकायाभुवनेश्वर्याःस्वशक्त्याःसकाशात्त्रयाणांब्रह्मादीनामितरेषान्देवादी
नाञ्चसर्ववैदिकतान्त्रिकमन्त्रयन्त्रतन्त्राणाञ्चोत्पत्तयोनिरूपिताः प्रथमपटलावशिष्टग्रन्थैःसहद्वितीयादिभिस्त्रिभिःप
टलैस्तदुपरिपञ्चमषष्ठयोःपटलयोस्तुसर्वमन्त्रसाधारणदीक्षार्थंमण्डपमण्डलनिर्माणवास्तुबलिकलशपूजाहोम
कलशाद्यभिषेकगुरूपसर्पणमन्त्रोपदेशगुरुदक्षिणाकृत्यादिप्रकाराउक्ताः॥ तत्सर्वमिदानींतनैरतिप्रयाससाध्यत्वादन रामः
नुष्ठीयमानत्वात् ग्रन्थविस्तरभयाच्चात्रनलिख्यते॥ तस्मात्तत्सर्वंमूलग्रन्थएवावलोकनीयंतदनुष्ठानेच्छुभिः॥ दीक्षाप्र १

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ह्लार्यस्तु अत्रैवोक्तः॥ दद्याच्च दिव्यभावं क्षिणुयाद्दुरितान्यतो भवेद्दीक्षा॥ मननात्तत्त्वपदस्य त्रायत इति मन्त्र उच्यते भय
तः॥ इति दीक्षामहिमा मन्त्रमहिमा चोक्तः॥ तत्रभयत इति भेदवासनाग्रन्थिरूपत इति॥ पुनरपि दीक्षाया अवश्यकर्त्त
व्यता अत्रैवोक्ता॥ दैवादिकस्याप्यथ मानुषादेः पैत्रादिकस्याप्यथ वत्सरस्य॥ आदिं समारभ्य समग्रसंपद्यत्नेन दीक्षावि
धिमारभेत्॥ इति दीक्षाकालश्च तदवश्यकर्त्तव्यता चोभयामित्युक्तम्। क्रमदीपिकायां चोक्तम्। ऋते यया सन्त तत्रापि
नो निसिद्धिं नयद्दास्यति मन्त्रपूग इति॥ ययेति दीक्षयेत्यर्थः॥ दीक्षाकालश्च क्रमदीपिकायामप्युक्तः॥ चैत्रे कृत्वैतन्मा
सि कर्म्मा जपक्षे पुण्यर्क्षे भूयो देशिकात्प्राप्य दीक्षाम्॥ तेनानुज्ञातः पूर्वसेवो द्वितीये मासि द्वादश्यामारभेतामलायामि
ति। एवं क्रमदीपिकायां दीक्षाकाल उक्तः॥ मेधादक्षिणामूर्त्तिकल्पे तु दीक्षादिना विना मन्त्रभक्तानां शीघ्रसिद्धिदमिति
भक्तस्ते दीक्षानपेक्षा उक्ता च॥ अथ पुनः सप्तमे पटले मातृकासरस्वतीविधानमुक्तम्॥ तदारभ्य सर्वमन्त्रान्॥ सऋ
ष्यादिकान् साङ्गान् ससाध्यान् सपूजाविधीन् सयन्त्रान् सकलंशविधानान् सपुरश्चर्याविधानान् सप्रयोगविधानांश्च
वक्ष्ये॥ तत्र ऋष्यादींश्चाङ्गानि च मन्त्राक्षप्रसिद्धसमितुष्यफलानां नामानि चावरणमन्त्रांश्च स्वरूपेणैव वक्ष्ये। यन्त्राणि च
प्रयोगांश्च सव्याख्यानरूपेण वक्ष्ये॥ तत्र प्रथमं तावन्मातृकादिसर्वमन्त्रजपारम्भविधानमस्मिन्नेव शास्त्रे प्राक् षष्ठपटला

For Private And Personal

प्र.स. दौ॥अथपुनराचम्यगुरुःप्राग्वदनोविष्टरोपविष्टःसन् प्राणायामंसलिपिन्यासंकृत्वेत्यादिग्रन्थैरुक्तेनप्रकारेणार्यनोव
२ श्य॥प्रथमंशुद्धोदकेनस्नात्वानिर्मलवसनोधौतपाणिपादाननआचान्तःपवित्रकरऊर्ध्वपुंड्रमस्तकोवात्रिपुंड्रमस्त
कोवाप्राङ्मुखउदङ्मुखोवापद्मासनेयोनिमुद्रासनेस्वस्तिकासनेवोपविशेत्॥पद्मासनप्रकारस्तुसम्मेलनगोपालन्या
सविधानेउक्तः॥सव्यपादनमुपादायदक्षिणोपरिविन्यसेत्।तथैवदक्षिणंपादसव्यस्योपरिविन्यसेत्॥विष्टभ्यकरिरो
ग्रीवनासाग्रन्यस्तलोचनः॥पद्मासनंभवेदेतत्सर्वेषामपिपूजितमिति॥स्वस्तिकासनन्तुयोगशास्त्रेउक्तम्॥जानूर्वोरन्त
रेकृत्वासम्यक्पादतलेउभे॥ऋजुकायःसमासीतस्वस्तिकंतत्प्रवक्ष्यते॥योनिमुद्रासनन्तुशिवगीतायामुक्तम्॥पव्यप
ल्लिगुदेस्थाप्यदक्षिणञ्चध्वजोपरि॥योनिमुद्राबन्धएवंभवेदासनमुत्तमम्॥योनिमुद्रासनेस्थित्वाप्रजपेद्यःसमाहितः।यं
कंचिदपिवामन्त्रंतस्यस्युःसर्वसिद्धयः॥हीनारुद्धास्तंभिताश्चकीलितामूर्छितास्तथा॥सुप्तामत्ताहीनवीर्यादग्धास्त्रस्ता
रिपक्षकाः॥बालयौवनमत्ताश्चवृद्धामन्त्राश्चयेमताः॥योनिमुद्रासनेस्थित्वामन्त्रानेवंविधान्जपेत्॥तस्यसिध्यन्तितेम
न्त्रानान्यस्यतुकथञ्चनेति॥अथदुष्टमन्त्रोद्देशश्चतल्लक्षणानिचशारदातिलकोक्तप्रकारेणलिख्यन्ते॥मन्त्रविद्याविभागे राम:
नहिविधामन्त्रजातयः।मन्त्राःपुंदेवतामन्त्राविद्यास्त्रीदेवतास्मृताः॥पुंस्त्रीनपुंसकात्मानोमन्त्राःसर्वेसमीरिताः॥ंमन्त्रा २

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हुंफडन्तास्तु र्हिठानास्तु स्त्रियोमताः॥द्विठान्ताः स्वाहान्ताः।नपुंसका-नमोन्ताः स्युरित्युक्तामनवस्त्रिधा॥छिन्नादिदुष्ट
मन्त्रास्तेपालयन्तिनसाधकम्॥छिन्नोरुद्धःशक्तिहीनः पराङ्मुखउदाहृतः॥बधिरोनेत्रहीनश्चकीलितास्तंभितास्तथा॥दग्ध
स्त्रस्तश्चभीतश्चमलिनश्चतिरस्कृतः॥भेदितश्चसुषुप्तश्चमदोन्मत्तश्चमूर्छितः॥हृतवीर्यश्चभीमश्चप्रध्वस्तोबालकस्तथा॥कु
मारश्चयुवाप्रौढोवृद्धोनिस्त्रिंशकस्तथा॥निर्बीजः सिद्धिहीनश्चमन्दः कूटस्तथापुनः॥निरंशः सत्वहीनश्चकेकरोबीजहीन
कः॥धूमितालिङ्गितौस्यातांमोहितस्तुक्षुधार्त्तकः॥अतिदृप्तोऽङ्गहीनः स्यादतिक्रुद्धः समीरितः॥अतिक्रूरश्चसव्रीडःशान्त
मानसएवच॥स्थानभ्रष्टस्तुविकलश्चातिवृद्धःप्रकीर्त्तितः॥निस्नेहः पीडितश्चापिवक्ष्याम्येषाञ्चलक्षणम्॥मनोर्यस्यादिमध्या
न्तेष्वानिलंबीजमुच्यते॥संयुक्तंवावियुक्तंवास्वराक्रान्तस्त्रिधापुनः॥चतुर्धापञ्चधावाथसमन्त्रश्छिन्नसञ्ज्ञकः॥स्वराक्रान्त
इति॥अघोरेभ्योथह्राम्॥घोरेभ्योयह्रीम्।घोरघोरतरेभ्यश्चहूं।सर्वतःसर्वसर्वेभ्योह्रैम्।नमस्तेअस्तुरुद्ररूपेभ्योह्रौम्।इत्यु
दाहरणम्॥आदिमध्यावसानेषुभूबीजद्वयलांछितः॥क्रुद्धोमन्त्रः सविज्ञेयोभुक्तिमुक्तिविवर्जितः॥भूबीजंलकारः।माया
त्रितत्वश्रीबीजएवहीनस्तुयोमनुः॥त्रितत्वप्रणवःहुंकारोवा।राव: फेङ्कारः।शक्तिहीनः सकथितोयस्यमध्येनविद्यते॥का
मबीजंमुखेमायाशिरस्यंकुशमेववा॥अङ्कुशः क्रोङ्कारः॥असौपराङ्मुखः प्रोक्तोयोमन्त्रोबिन्दुसंयुतः॥आद्यन्तमध्येष्विन्दुर्वा

स. सम्यवेद्ध धिरोमनुः॥इन्दुः सकारः।पञ्चवर्णोमनुर्यस्याद्रेफार्केन्दुविवर्जितः॥नेत्रहीनः सविज्ञेयोदुःखशोकामयप्रदः।आदि
३ मध्यावसानेषुहंसः प्रासादवाग्भवौ॥प्रासादोहौङ्कारः॥वाग्भवोऐङ्कारः॥हकारोबिन्दुमान्जीवोरावेवापिचतुष्कुलम॥जी
वः सकारः॥चतुष्कुलंहुङ्कारः॥मायानमामिचपदंनास्तियस्मिन्सकीलितः॥एकंमध्येद्वयंमूर्ध्नियस्मिन्स्तम्पुरंदरौ॥नविद्येते
समन्त्रः स्यात्स्तंभितः सिद्धिरोधकः।अस्त्रंफट्कारः।पुरन्दरोलकारः॥वन्हिर्वायुसमायुक्तोयस्यमन्त्रस्यमूर्धनि॥सप्र
धादृश्यतेतंतुदग्धंमन्वीतमन्त्रवित्॥अस्त्रंद्वाभ्यांत्रिभिःषड्भिरष्टभिर्दृश्यतेस्वरैः।त्रस्तः सोभिहितोयस्यमुखेनप्रणवस्थि
तः॥शिवोवाशक्तिरथवागीनाख्यःसप्रकीर्तितः।शिवोहकारः॥आदिमध्यावसानेषुभवेन्मार्णचतुष्टयं।यस्यमन्त्रस्यमलिनो
मन्त्रवित्तंविवर्जयेत्॥यस्यमध्येदकारोवाक्रोधोवामूर्धनिद्विधा॥क्रोधोहंवीजम्॥अस्त्रान्निश्चतिमन्त्रस्यतिरस्कृतउदीरितः।
ॐ द्वयंप्रमुखेशीर्षेवषडस्त्रञ्चमध्यगम।यस्यस्याद्रेदितोमन्त्रस्याज्यः सिद्धिषुसूरिभिः।त्रिवर्णोहंसहीनोयः सुषुप्तः सउदा
हृतः।मन्त्रोवाप्यथवाविद्यासप्ताधिकदशाक्षरः॥फट्कारपञ्चकादिर्योमदोन्मत्तइतीरितः॥तद्वदस्त्रंस्थितंमध्येयस्यम
न्त्रः समूर्छितः॥विरामस्थानगंयस्यहृतवीर्यः सकथ्यते॥पञ्चकेत्यत्रापिसंबध्यते॥आदौमध्येतथामूर्ध्निचतुरस्त्रियुतोम रा.मं.
नुः॥ज्ञातव्योभीमइत्येषयः स्यादष्टादशाक्षरः॥एकोनविंशत्यर्णोवायोमन्त्रस्तारसंयुतः।हृल्लेखाङ्कुशबीजाढ्यस्तंप्रध्वस्तं ३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रचक्षते।सप्तवर्णोमनुर्बालःकुमारोऽष्टाक्षरःस्मृतः॥षोडशार्णोयुवाप्रौढश्चत्वारिंशल्लिपिर्मनुः।त्रिंशदर्णश्चनुःषष्टिवर्णोमन्त्रः
शताक्षरः।चतुःशताक्षरश्चापिवृद्धइत्यभिधीयते।नवाक्षोध्रुवयुतोमनुर्निस्त्रिंशईरितः।यस्यावसानेहृदयशिरोमन्त्रौचमध्य
तः।शिखावर्मचसंस्यातौवौषट्फट्कारएववा।शिवशक्त्यर्णहीनोवासनिर्बीजइतिस्मृतः।एषुस्थानेषुफट्कारः—— यस्मि
न्दृश्यते।समन्त्रःसिद्धिहीनःस्यान्मन्दःपङ्क्त्यक्षरोमनुः।पङ्क्तिशब्दोदशवाचकः।कूरएकाक्षरोमन्त्रःसएवोक्तोनिरंशकः।द्विवर्णः
सत्त्वहीनःस्याच्चतुर्वर्णस्तुकेकरः।षडक्षरोबीजहीनःसार्धसप्ताक्षरोमनुः।सार्द्धद्वादशवर्णोवानिन्दितःसतुधूमितः।सार्द्ध
सप्तत्यादिअन्तेव्यञ्जनयोगेनज्ञेयम्।सार्द्धबीजत्रयस्तद्वदेकविंशतिवर्णकः।विंशत्यर्णस्त्रिंशदर्णोयःस्यादालिङ्गितस्तुसः
द्वात्रिंशदक्षरोमन्त्रोमोहितःपरिकीर्त्तितः।चतुर्विंशतिवर्णोयःसप्तविंशतिवर्णकः।क्षुधार्त्तःसतुविज्ञेयोमन्त्रोदारिद्र्यदाय
कः।एकादशाक्षरोवापिपञ्चविंशतिवर्णकः।त्रयोविंशतिवर्णोवामन्त्रोदृप्तउदाहृतः।षट्त्रिंशत्यर्णकोमन्त्रःषड्विंशत्यर्णकोपि
वा।त्रिंशदेकोनवर्णोवाप्यङ्गहीनोविधीयते।अष्टाविंशत्यक्षरोयस्एकत्रिंशदथापिवा।अतिक्रूरःसगदितोनिन्दितःसर्वकर्म
सु।चत्वारिंशतमारभ्यत्रिषष्टिर्यावदापतेत्।तावत्संख्यानिगदितामन्त्राःसव्रीडसञ्ज्ञकाः।पञ्चषष्ट्यक्षरायेस्युर्मन्त्रास्तेशान्तमा
नसाः।एकोनशतपर्यन्तंपञ्चषष्ट्यक्षरादितः।येमन्त्रास्तेनिगदिताःस्थानभ्रष्टाह्वयाबुधैः॥त्रयोदशाक्षरायेस्युर्मन्त्राःपञ्चद

For Private And Personal

प्र.सं. शाक्षराः। विकलास्ते विधीयन्ते शतं सार्द्धशतन्तु वा। शतद्वयं द्विनवतिरेकहीनोथवापि वा। शतत्रयं वा यत्संख्यं निस्नेहास्ते
४ समीरिताः। चतुःशतान्यथारभ्य यावद्वर्णसहस्रकम्। अतिवृद्धः प्रयोगेषु परित्यज्यः सदा बुधैः। सहस्राणाधिका मन्त्रा दण्ड
कापीडिता ह्वयाः। द्विसहस्राक्षरा मन्त्राः खण्डशः शतधा कृताः। ज्ञातव्यास्तोत्ररूपास्ते मन्त्रा एते यथास्थिताः। नद्याविद्या
श्च बोद्धव्या मन्त्रिभिः काम्यकर्मसु। दोषानेतानविज्ञाय यो मन्त्रान् जपते जडः। सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि। सेप
कग्रन्थोपि योग्यतावशाल्लिख्यते। दग्धषट्कर्णगो मन्त्रस्त्रस्तः स्यादधिकैर्जपान्। गर्विनस्त्वविधिप्राप्ताः शत्रवो वैरिकोशगाः। बा
लालघ्वसरप्राप्ताः वृद्धा गुर्वक्षरान्विताः। निर्जिताः कर्मबाहुल्याद्दलशः सत्त्ववर्जिताः। खण्डीभूतास्त्वशजापात् अङ्गहीनास्त्व
संवृताः। सानुनासिकाः। आकालविनियोगेन मूर्छिताः स्वापगाज्जपात्। मन्त्राः पंचेषु पठनादन्यवर्णैस्तु कीलिताः। रुद्धा विस
ज्नकाप्राप्तदुःखा वैरिसमन्विताः। अपूर्णेनोपदिष्टा ये क्षीणवीर्यास्तु ते मताः। सदा प्रयोगान् कुण्ठं तत्क्लिष्टतातिविलम्बनात्
रुग्णाः प्रलयनैर्जपात् अन्यमन्त्रैः सहाविला। उपेक्ष्यावस्थयाज्ञापाद्वैषम्याद्यवमानिताः। पञ्चविंशतिरुद्दिष्टा दोषास्तान्
शमयेद्गुरुः। बन्धनं योनिमुद्रायां मन्त्राणां वीर्ययोजनम्। उभयं बोधयन् शिष्यान् संरक्षेद्गुरुरात्मवान्। गुरोर्लक्षणमेतावदादि रामः
मान्त्यन्तुवेदयेत्। आदिमान्त्यविहीनास्तु वर्णास्तु शर  दभवत्। तस्मादितरएवासौ ब्रूयात्तत्तदहङ्कृतिः। यदहङ्कारविज्ञा ४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नाम्नत्समो जायते नरः। अनादिक्रमसंसिद्धा मातृकादयन्तयोजनात्। तादात्म्यसिद्धितां विद्धि सर्वमन्त्रार्थविग्रहम्। इत्यादिहि
जातीनान्तु संस्कारं वेदोक्तं समुदाहृतम्। अन्येषामपि वर्णानां विद्यया समुपाचरेत्। निधने विद्यया दाहो अन्यत्सर्वं समाचरे
त्। यथाशक्ति वस्त्रालङ्कारादिभिः निद्यया विसृजेन्मन्त्री त्वविद्यया सिद्धिहेतवे साधकं पूज्य भोजयेत्। मन्त्राणान्दश कथ्य
न्ते संस्काराः सिद्धिदायिनः। जननं जीवनं पश्चात्ताडनं बोधनं तथा। अथाभिषेको विमलीकरणाप्यायने ततः। तर्पणं दीपनं गुप्ति
र्दशैता मन्त्रसंस्क्रियाः। मन्त्राणां मातृकामध्यादुद्धारो जननं स्मृतम्। मातृकावर्णान् तण्डुले विलिख्य तद्विधानेन संपूज्य तन्म
ध्यादभीष्टमन्त्रवर्णपठनं मातृकामध्यादुद्धारः। प्रणवान्तरितान् कृत्वा मन्त्रवर्णान् जपेत्सुधीः एतज्जीवनमित्याहुर्मन्त्रशा
स्त्रविशारदाः। मन्त्रवर्णान् समालिख्य ताडयेच्चन्दनाम्भसा। प्रत्येकं वायुना मन्त्री ताडनं तदुदाहृतम्। विलिख्य मन्त्रन्त
न्मन्त्री प्रसूनैः करवीरजैः। तन्मन्त्राक्षरसंख्यातैर्हन्यात्तद्बोधनं स्मृतम्। भूर्जे कुङ्कुमादिना मन्त्रं विलिख्य वह्निबीजेन क
रवीरपुष्पैः शतवारन्ताडयेत् एतद्बोधनमित्यर्थः। स्वतन्त्रोक्तविधानेन मन्त्री मन्त्रार्णसंख्यया। अश्वत्थपल्लवैर्मन्त्रमभि
षिञ्चेद्विशुद्धये। स्वतन्त्रोक्तेति। मन्त्रान्ते अमुकं मन्त्रमभिषिञ्चामि नमः इत्यर्थः। संचिन्त्य मनसा मन्त्रं ज्योतिर्मन्त्रेण निर्दहे
त्। मन्त्रे मलत्रयं मन्त्री विमलीकरणं त्विदम्। आणवकार्मकमायिकं मलत्रयम्। तारव्योमाग्निमनुयुग्दण्डी ज्योतिर्मनुर्मतः।

प्र·सं· तत्रव्योमेतिहकारः।मनुरितिचतुर्दशस्वरः दण्डोनुस्वारःमूलाधारेवन्हिमण्डलेज्योतिर्मन्त्रंन्तुपरिसाध्यमन्त्रंसञ्चिन्त्य
५ ज्योतिर्मन्त्रतेजसादहेदिति।कुशोदकेनजप्तेनप्रत्यर्णंप्रोक्षणंमनोः।तेनमन्त्रेणविधिवदेतदाप्यायनंमतम्।मन्त्रेणवारिणा
मन्त्रतर्प्पणंतर्प्पणंस्मृतम्।ताम्रपात्रेमन्त्रंविलिख्यमन्त्रान्तेअमुकंमन्त्रंन्तर्प ्यामिनमइतितर्पयेत्।तारमायारमायोगोम
नोर्दीपनमुच्यते।जप्यमानस्यमन्त्रस्यगोपनंत्वप्रकाशनम्।संस्कारादशसंप्रोक्तासर्वतन्त्रेषुगोपिताः।पुनरपिशिवगीताया
मप्युक्तं।सर्वान्कामानवाप्नोतिमनुष्यःकम्बलासने।कृष्णा जिनेभवेन्मुक्तिर्मोक्षश्रीर्व्याघ्रचर्मणि।कुशासनेभवे ज्ञानमारोग्यं
पत्रनिर्मिते।प्राङ्मुखोद ङ्मुखोवापिजपपूजांसमाचरेत्।पाषाणेदुःखमाप्नोतिकाष्ठेनानाविधान्गदान्।वस्त्रेस्त्रियमवाप्नो
तिभूमौमन्त्रोनसिद्ध्यति॥अथगरुडकस्योक्तप्रकारेणासननियमोलिख्यते।धरण्यांसुखसंपत्तिर्दौर्भाग्यंदारुकासनम्।त
णासनेयशोहानिःपल्लवेचित्तविभ्रमः।अभिचारादिकेनीलंरक्तंवश्यादिकर्मणि।वंशासनेदरिद्रःस्यात्पाषाणेव्याधिपीडन
म्।दर्भासनेतपोवृद्धिःप्रजावृद्धिस्तुरत्नके।गिरिगोष्ठपरिस्यन्दनद्यारण्याश्रमाह्रदाः।देशाःपुण्याजपस्यैतेयत्रवारोचतेम
नः।गृहेत्वेकगुणञ्जप्यंनद्यान्तुद्विगुणंभवेत्।गवाङ्गोष्ठेशतगुणंअग्न्यागारेशताधिकम्।सिद्धक्षेत्रेषुतीर्थेषुदेवतायाश्चसन्नि रा·म·
धौ।सहस्रशतकोटिस्यादनन्तंविष्णुसन्निधौ।अध्यर्धमग्निमादित्यंब्राह्मणंदेवमन्दिरम्।नदीञ्जलाशयञ्चैववटष्ठकृत्सञ्जपे ५

न्तु। इति विशिष्टमन्त्रदेवताप्रकाशिकायामुक्तम्। सूर्यस्याग्नेर्गुरोरिन्दोर्दीपस्य च जलस्य च। विप्राणां च गवां चैव सन्नि
धौ शस्यते जपः। एतेषूक्तेष्वासनेषु एकस्मिन्नेवासिनः। स्वगुरुगणाधिपादीन् वन्देत तत्प्रकार उच्यते। ॐ स्वस्ति श्रीपरमशि
वानाथपादाद्यशेषगुरुपारंपर्यक्रमेण स्वगुरुनाथपादाम्बुजं यावत्तावत्प्रणौमि। ॐ श्रीगुरुभ्यो नम इति मूर्ध्नि संवन्द्य। अथ
वा। ब्रह्माद्यशेषगुरुपारंपर्यक्रमेण स्वगुरुनाथपादाम्बुजं यावत्तावत्प्रणौमि। गुं गुरुभ्यो नम इति दक्षिणांसे। गं गणपतये न
म इति वामांसे। दुं दुर्गायै नम इति वामोरुदेशे। क्षं क्षेत्रपालाय नम इति दक्षिणोरुदेशे सं सरस्वत्यै नम इति वक्त्रे। पं परात्मने न
म इति हृदये संवन्द्य। पुनर्वामहस्ततलेन दक्षिणहस्तं कूर्परदेशादारभ्य तलान्तं सुदर्शनास्त्रमन्त्रेण वैष्णवदेवताविषये।
शैवे तु। पाशुपतास्त्रेण। इतरविषये तु। ब्रह्मास्त्रेण विन्यसेत्। सुदर्शनास्त्रमन्त्रस्तु। ॐ सहस्रार हुं फडिति। पाशुपतास्त्रमन्त्र
स्तु। वामदेव ऋषिः। पङ्क्तिश्छन्दः। पशुपतिर्देवता। ॐ श्लीं पशुपतये हुं फडिति। ब्रह्मास्त्रमन्त्रस्तु। ॐ तपः सत्यात्मने अस्त्राय फ
डिति। कूर्परं नाम। मणिबन्धादूर्ध्वदेशः। मणिबन्धो नाम हस्ततलस्य मूलदेशः। पुनर्वामेपीतरेण। हस्ततलेन तथैव कृत्वा।
पुनर्वामहस्ततलेन दक्षिणस्यापरदेशे कूर्परत आरभ्याग्रन्तथैवेतरस्यापीतरेण न्यस्त्वा पुनरपि तत एवारभ्य इतरेतरेण हस्त
तलेन इतरेतरस्य हस्तस्य सकलदेशेपि तेनैवास्त्रमन्त्रेण न्यस्त्वा पुनर्हस्ततलयोरन्योन्यसंहतिजध्वनित्रयेण तालत्रयाख्येन

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सं·प्र तेनैवास्त्रमन्त्रपूर्वकेणउपर्युपरिक्रमेणत्रिवारंकृत्वापुनस्तेनैवास्त्रमन्त्रेणपूर्वादिशमारभ्याधस्तादन्तंक्रमेणदशदिग्बन्ध
६ नमङ्गुष्ठतर्जन्योर्योदितध्वनिपूर्वकंकुर्यात्।तेनैवमन्त्रेणतथैवसंयुक्तयाङ्गुल्यापरितस्त्वाग्निप्राकारंध्यानेनकुर्यात्।तदुक्त
ञ्च।सत्संप्रदायसर्वस्वाभिधानाख्ये।प्रपञ्चसारविवरणेएभिर्दशभिर्मन्त्रैर्दशसुदिक्षु तर्जन्यङ्गुष्ठयोगिकाकोटिकाभिरात्मनो
रक्षांकुर्यादिति।तत्रदिक्पालपूजाविषये।प्रागाद्यूर्ध्वान्तादिक्रमः।दिग्बन्धनेतु।प्रागाद्यधस्तादन्तमितिविशेषः।तदुक्तंचा
स्मिन्नेवशास्त्रेसुदर्शनपटले।ऐन्द्रीदिशंसमारभ्यदिशन्त्वधस्तादन्तेप्रोक्त।चक्रेणबध्नामिनमस्तथोक्त्वा।चक्रायशीर्षञ्चदिशा
म्बन्धइति।एतत्सर्वंक्रमदीपिकायामुक्तञ्च।स्नातोनिर्मलसूक्ष्मशुद्धवसनोधौताङ्घ्रिपाण्याननः।स्वाचान्तःसुपवित्रमुद्रि
तकरःश्वेतोर्ध्वपुण्ड्रोज्ज्वलः।प्राचीदिग्वसनोनिबध्यसुदृढंपद्मासनंस्वस्तिकंवासीनःस्वगुरून्गणाधिपमयोवन्देतबद्ध
ञ्जलिः।ततोस्त्रमन्त्रेणविशोध्यपाणित्रितालदिग्बन्धहुताशसालान्।विधायभूतात्मकमेतदङ्गंविशोधयेच्छुद्धमतिःक्र
मेणेति।अथतत्रसुदर्शनेनदिग्बन्धनेपक्षविशेषउच्यते।ॐनमःसुदर्शनायअस्त्रायफडित्यनेनमन्त्रेणवादशदिग्बन्धनं
कुर्यात्एवमपिसंप्रदायोस्ति।तदुक्तंचक्रमदीपिकायाम्।प्रणवहृदोरवसानेसचतुर्थीसुदर्शनञ्चास्त्रकञ्च।उक्त्वाफडं रा·म
तममुनाकल्पयेमनुनास्त्रमुद्रयादर्शहरितइति।सुदर्शनेनचेदेवंवा।दिग्बन्धनंकृत्वा।पुनर्भूतशुद्धिंकुर्यात्।तत्प्रकारस्तु ६

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्रमदीपिकोक्तप्रकारेणकथ्यते।इडावक्रेधूम्रंसततगतिबीजंसलवकंस्मरेत्पूर्वंमन्त्रीसकलभुवनोच्छोषणकरम्।स्व
कन्देहन्तेनप्रततवपुषापूर्य्यसकलंविशोष्यामुञ्चेत्पवनमथमार्गेणरमणे:।तेनैवमार्गेणविलीनमारुतंबीजंविचि
न्त्यारुणमाशुशुक्षणे:।आपूर्य्यदेहंपरिदह्यवामतोमुञ्चेत्समीरंसहभस्मनाबहि:।अपरमतीवशुभ्रममृतांशुपथेनविधुं
नयतुललाटचंद्रमसुतु:सकलार्णमयीम्।अपरजपान्निपात्यरेचयेच्चतयासकलंवपुरमृतौघवृष्टिमथवक्रकराथमि
दम्।अस्यार्थ:।प्रथममिडानाडीवक्रे।वामनासिकाग्रमिडानाडीवक्रम्।तत्रवायुबीजम्।सलवकम्।लवकमितिबिन्दु:।
तेनयुक्तंपुनस्तद्बीजम्।धूम्रवर्णञ्च।धूम्रमिति।नीललोहितमिश्रवर्णत्वादृशंवायुबीजाख्यंयकारंसकलभुवनोच्छोष
णकरंस्मरेत्।एवंस्मृत्वा।प्रततवपुषाव्याप्तवपुषा।तेनवायुना।स्वकन्देहम्।वामनासिकाश्वासमार्गेणैवापूर्य्य।सकलंदे
हिकदुष्टम्।विशोषितंस्मृत्वापुन:रमणेरादित्यस्यमार्गेणपिङ्गलनाडीमार्गेणदक्षिणनासिकाश्वासमार्गेणेत्यर्थ:।तेनमा
र्गेणतंपूर्वपूरितंवायुंव्यामुञ्चेत्।रेचयेदित्यर्थ:।पुनरपि।तेनैवमार्गेणरमणेर्मार्गेणपिङ्गलामार्गेणदक्षिणनासिकाश्वा
समार्गेणेत्यर्थ:।तेनमार्गेणपूर्वविसृष्टंमारुतमेवपश्चाद्विलीनमारुतंनिवर्त्तयित्वातत्रैवप्रविष्टमारुतंकृत्वा।पुनराशुशु
क्षणेरग्नेर्बीजंसबिन्दुकंरेफमित्यर्थ:।तद्बीजमरुणमव्यक्तरागस्वरूपमेतादृशमाशुशुक्षणेर्बीजन्तुविलीनमारुतमितिकि

For Private And Personal

प्र.सं. याविशेषणम्।एवंदक्षिणनासिकाश्वासमार्गेणमारुतंविलीनंकृत्वा।अरुणवर्णमग्निबीजंध्यात्वा।तंवायुमग्निबीजसहित्
७ मापूर्य।पूर्वंपरिशोषितंतंदेहंसर्वंपरिदग्धंसम्भाव्य।वामनासिकाश्वासमार्गेणवायुंतेनदग्धभस्मनासहत्याजयेत्।पुनरपर
मिति।अपरंविधुमितिसामानाधि—करण्येद्वितीयेऽपरश्चकारः।तंविधुंसोमात्मकंशुभ्रवर्णंध्यात्वा।अमृतांशुपथेनःइडानाडी
मार्गेणवामनासिकाश्वासमार्गेणेत्यर्थः।तेनमार्गेणमूलाधारंनीत्वा।सुषुम्नाद्वारेणललाटोपलक्षितद्वादशान्तस्थितमिन्दुमण्ड
लंप्रापय्य।तयोरुभयोःसंबन्धाच्चन्द्रमण्डलचालनात्ततोनिःसृतामृतधारयातद्भस्मप्रक्षाल्य।तथैवजीवमापाद्यपुनरकारा
दिवर्णरूपयातयामुखकरचरणादिकमुत्पादयामीत्यनुस्मरन्।वमित्यमृतबीजंसप्रणवञ्चत्रिंशद्वारंकुम्भकेनसंपाद्य।देह
काठिन्यार्थंलंबीजंमूर्द्धिविन्यसेत्।पुनर्मातृकावर्णान्कान्नवृत्तेत्यादिनाऽस्मिन्नेवमातृकापटलेउपरिवक्ष्यमाणक्रमेण
न्यसेत्।एषमिडावक्रेत्यादिनोक्तोभूतशुद्धिप्रकारः।केवलमातृकान्यासेनैववाभूतशुद्धिंकुर्यात्।अथवा।प्रकारान्तरेणापि।
सूत्स्यागमोक्तप्रकारेणभूतशुद्धिंवक्ष्ये।स्वदेहंपृथिव्यादिभूतबीजंब्रह्मविष्णुभ्यामुत्पन्नाङ्कुरम्।रागद्वेषधर्माधर्ममोहमूलंत्रि
व्याधिपतिपरिपालितंकलादितत्त्वसारन्तन्मात्रेन्द्रियशाखोपशाखंविषयालोचनपल्लवंभावप्रपञ्चकुसुमंबुध्यध्यवसायसं रामः
कल्पफलंपुरुषभोगोपभोग्यंभोग्यभोक्तृत्वरसमूर्द्धमूलमधःशाखम् वटतरुरूपंसञ्चिन्त्यप्रथमपूरकार्द्धेननिवृत्तिकलाबी ७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जोच्चारपञ्चकेन पत्रपुष्पफलरहितं स्तब्धं विभाव्य। पूरकापरार्द्धेन। प्रतिष्ठाकलाबीजस्य चतुष्कोच्चारणेन। दग्धपत्रफल
पुष्पोपेतं विचिन्त्य। कुम्भकेन प्रथमापरार्द्धाभ्यां विद्याकलाबीजोच्चारत्रयेण। दग्धसमूलं विभाव्य। रेचकपूर्वार्द्धेन शान्तिकला
बीजोच्चारद्वयेन भस्मीकृतं दशदिक्षु प्रलीनं विभाव्य। रेचकापरार्द्धेन शान्त्यतीतकलाबीजैकोच्चारणेन शुद्धस्फटिकरूपं सं
चिन्तयेत्। ततो दग्धरूपं सर्वशून्यमिति विभाव्य। वौषडन्तमूलेन। शिखान्तस्थाधोमुखपद्मस्रवदमृतधाराभिः सकलनाडीमु
खं प्रविष्टाभिः। स्वबाह्याभ्यन्तरं सर्वशरीरमाप्लाव्य हृदये नालपत्रकर्णिकारूपं पद्ममकारादिमात्रात्रययुक्तेन प्रणवेन शुद्ध
विद्यात्मकमासनं विन्यस्य। तत्कर्णिकायां पूर्यष्टकं चतुष्कलेन प्रणवेनावतीर्णं भावयित्वा। तस्मिन् द्वादशान्तस्य जीवरूपं
शिवमयमात्मानं पञ्चकलेन प्रणवेन पूरकेण सुषुम्णया समानीय ज्योतीरूपं संस्थाप्य। वौषडन्तशक्तिमन्त्रोच्चारेणासुध्यशा
क्तिपरिस्रुतबहुलामृतप्रवाहेणाभिषिञ्चेत्। तत्र ल्हामिति निवृत्तिकलाबीजम्। ह्रीमिति प्रतिष्ठाकलाबीजम्। ह्रूं ह्रैं ह्रों
मिति विद्याशान्त्यतीतकलाबीजानि क्रमेण। एवम् रहस्यागमोक्तप्रकारभूतशुद्धिः। अनेन प्रकारेण वा पूर्वोक्तक्रमदीपिको
क्तप्रकारेण वा भूतशुद्धिं कृत्वा। पुनर्हकारत्रयमुच्चार्य। सुषुम्णानाडीमार्गनिरोधकपर्वत्रयभञ्जनं कृत्वा। हंस इत्युच्चार्य। मूला
धारस्थजीवं सुषुम्नया द्वादशान्तं नयन्। पुनः सोहमित्युच्चार्य। द्वादशान्ते सहस्रदलकमलमध्यस्थं सहस्रादित्यसङ्काशं परमा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र-स त्मानंस्वात्मनाचैकीकृत्य।पुनःप्राणायामंकुर्यात्।तत्प्रकारउच्यते।अकारंमासबिन्दुकम्।द्वादशवारमावर्त्तयन्।दक्षिणनासि
८ कयाविरच्य।उकारम्सबिन्दुकम् षोडशवारमावर्त्तयन् वामनासिकयाआपूर्य।मकारपूर्वकम्।तत्तन्मूलमन्त्रम्।द्वा
दशवारमावर्त्तयन्।कुम्भकंकुर्यात्।एवंप्राणायामत्रयंकुर्यात्।तदुक्तञ्च।संमेलनगोपालन्यासविधाने।अमितिद्वादवारं
दक्षिणनासिकयाविरच्य।उमितिषोडवारंवामनासिकयापूरयित्वामकारपूर्वकविद्यासहितमंत्रंद्वाशद्वारमावर्त्तय
न्कुम्भकंकुर्यात्।अथवा।यंयंमन्त्रंजपितुमिच्छति।तेनतेनमन्त्रेणप्राणायामंपञ्चचतुर्विंशदादि।तत्संख्ययाकेवल
कुम्भकरूपेणवा।अष्टषोडशद्वात्रिंशदादिसंख्ययावा।षोडशद्वात्रिंशच्चतुषष्ट्यादिसंख्ययावा।रेचकपूरककुम्भक
रूपेणकुर्यात्।अथवा।हरिविषयमन्त्रजपेषु।सर्वत्रमूलमन्त्रेणैव।प्राणायामः।इतरविषयेषु।तत्तद्विधानोक्तप्रका
रेणवा।प्रणवेनवाकुर्यात्।एवंसर्वत्रसर्वमन्त्रजपस्यपुरतश्च।परतश्च।त्रिवारंकुर्यात्।एवंदिनशोयः षोडशसंख्यंक
रोतिसतुमासतःपापात्परिपूयते।अथवाकृसमन्त्रेषु।सर्वेषुकामबीजेनप्राणायामंकुर्यात्।ततुचतुःषष्टिवारंकुर्यात्।
गोपालदशाक्षरीमन्त्रेणचेदष्टाविंशतिवारंकुर्यात्।गोपालकाऽष्टादशाक्षरीमन्त्रेणचेद्द्वादवारंकुर्यात्।इतरमन्त्रैश्चवर्णा राम
नुरूपंकुर्यात्॥ ॥तदुक्तंचक्रमदीपिकायाम्॥पवनसंयमनन्त्वमुनाचरेद्यमिहजन्मसमसौमनुमिच्छसि।अथवाखिले ८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षुद्दरिमन्त्रजपविधिषुमूलमन्त्रतःसंयमनंविमलधीः।मरुनाविधिनाभ्यसंश्चरन्तुतत्वसंख्ययापुरतोजपस्यपरतोविहि
नमथतन्त्रपंबुधैः।षोड्शायद्दहचरेद्दिनशःपरिपूपतेमखलुमासततोंहसः।अथवाङ्गजन्ममनुनासुसंयमंसकलेषुकृ
समनुजापकर्मसु।सहितैकःसप्तकृतिवारमभ्यसंस्तुनुयात्समस्तदुरितापहारिणा।अष्टाविंशतिसंख्यमिष्टफलदंमन्त्रं
दशार्णञ्जपन्नाम्यच्छेत्पवनंसुसंयतमतिस्त्वष्टादशार्णेनचेत्।अभ्यस्यन्नववारमन्यमनुभिर्वर्णानुरूपंजपन्कुर्याद्रेच
कपूर्वकंसुनिपुणंप्राणप्रयोगंबुधः।रेचयेन्मारुतंदक्षयादक्षिणंपूरयेद्वामयामध्यनाड्यापुनःधारयेदीरितंरेचकादित्र
यंस्यात्कुलादन्तविद्याख्यमात्रात्मकइति।कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम्।प्राणायामःसविज्ञेयस्तर्जनीमध्यमेवि
ना।एवंप्राणायामंकृत्वा।ततञ्जपस्य मन्त्रंप्रतिलोमेनोच्चार्य।स्वात्मानंतेजोरूपन्ध्यात्वा।तत्तेजःकरतलेदक्षिणनासिका
श्वासमार्गेण निपात्यकरन्यासंकुर्यात्।यत्रयत्रकरन्यासमन्त्रःपृथगनुक्तःस्तत्रसर्वत्रतत्साध्यमन्त्रस्य।षडङ्गैःपञ्चाङ्गै
र्वाकुर्यात्।तदुक्तञ्चास्मिन्नेवप्रपञ्चसारे।अङ्गुलीषुक्रमादङ्गैरङ्गुष्ठादिषुविन्यसेत्।कनिष्ठान्तासुतद्वाह्यतलयोःकरयोः
सुधीरिति।अथकरन्यासप्रकारउच्यते।उभाभ्यांकराभ्यान्तत्तदङ्गुष्ठाद्यङ्गुलीषुक्रमेणाङ्गुलीमूलमारभ्याग्रंमन्त्रपूर्वकमङ्गु
ष्ठाभ्यांनमःइत्यादिन्यसेत्।तत्रतर्जनीभ्यामङ्गुष्ठयोरितरास्त्वङ्गुष्ठाभ्यांन्यसेत्।तत्रपञ्चाङ्गपक्षेअङ्गुलीष्वेवविन्यसेत्।ष

For Private And Personal

इङ्गपक्षे पश्चान्न्यासस्तावद्वामहस्ततलेन दक्षिणहस्ततलेन वामहस्ततले न्यसेत् एवं करद्वयोश्च। तदुक्तञ्च सत्सम्प्रदायसर्व्वस्वाभिधाने प्रपञ्चसारविवरणे। उभयोः करयोरङ्गुष्ठयोर्मूलाद्यग्रं तर्जनीभ्यां तर्जन्यादिकनिष्ठान्तमङ्गुष्ठाभ्याञ्च पञ्चभिरङ्गमन्त्रैः परामृश्य। पृष्ठतलयोश्च। वामे दक्षिणेन। दक्षिणे वामेन च विन्यसेत्। एवं कृत्वा। पुनर्लिपिन्यासं उपरि मातृका विधाने वक्ष्यमाणक्रमेण कृत्वा। ध्यात्वा। जप्त्वा। यथाशक्ति तदुपसंहृत्य पुनः साध्यमन्त्रस्य ऋष्यादिपूर्वकं जपं वा पूजां वा समारभेत्। अयमेव सर्वत्र मनूनाञ्जपारम्भे पूजारम्भे च न्यायः। अथ मातृकामन्त्रस्य। ब्रह्मा ऋषिः। गायत्री छन्दः। मातृका सरस्वती देवता। तत्र। ऋष्यादेः स्थानान्यस्मिन्नेव शास्त्रे। पञ्चमपटलादावुक्तानि। ऋषिर्गुरुत्वाच्छिरसैव धार्य्यश्छन्दोऽक्षरत्वाद्रसनागतं स्यात्। धियावगन्तव्यतया स दैवं हृदि प्रतिष्ठामनु देवता च इति। पुनरेषामर्थश्च तत्रैवोक्तः। ऋषिवर्णादिकौ धातू स्तोऽगत्यां प्रापणेऽपि च। ताभ्यां यद्यत्स्वरूपं स ऋषिः स्याद्गुरुवाचकः। इच्छादानार्थकौ धातू स्तः छन्दाद्यश्च दादिकः। तयोरिच्छाददातीति छन्दो मन्त्रार्णवाचकः। आत्मनो देवताभावप्रधाना देवतेति च। पदं समस्तमन्त्रेषु विद्वद्भिः समुदीरितमिति। एवमृष्यादीन् कृत्वा। पुनः षडङ्गान्यवश्यकर्त्तव्यानि कुर्यात्। मेधादक्षिणामूर्त्तिकल्पे तु। भक्तश्चेदवश्यकर्त्तव्यत्वाराहित्यमुक्तञ्च। अङ्गन्यासं विनावापि शिवभक्तस्य सिद्ध्यति। अङ्गमन्त्रैर्विना वापि सिद्धसाध्यादिभिर्विना। जपेन मन्त्राः सर्वेषां सर्व

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सिद्धिप्रदोभवेदिति।अथषडङ्गन्यासस्थानानि च तत्प्रकाराश्चोच्यन्ते।हृदयशिरसोः शिखायां कवचास्त्रयोस्त्रेषु स चतुर्थीषु
।नमस्वाहास्वाहावषट्हुंवौषट्फट्पदैः षडङ्गविधिः।पञ्चैव यस्य मन्त्रस्य भवन्त्यङ्गानि मन्त्रिणः।सर्वेष्वपि च मन्त्रेषु नेत्रलोपो
विधीयत इति।अथ मातृकामन्त्रस्य षडङ्गविधिः॥अं कं खं गं घं ङं आं हृदयाय नमः।इं चं छं जं झं ञं ईं शिरसे स्वाहा।उं टं
ठं डं ढं णं ऊं शिखायै वषट्।एं तं थं दं धं नं ऐं कवचाय हुम्।ओं पं फं बं भं मं औं नेत्रम्।अं यं रं लं वं शं षं सं हं लं क्षं अः।अस्त्रम्।
मातृकावर्णैरङ्गविधौ सर्वत्रैवमेव।स्वरास्तु वर्णा विन्दुयुक्ताश्च हलान्तद्वितयं स्वराणां मध्ये लघुसञ्ज्ञकं अकारादिवर्णच
तुष्टयरहितं च स्वरासरं द्वन्द्वयुक्तं कादिवर्गश्च कर्त्तव्यम्।यदुक्तञ्च।आद्यन्तस्वरषट्कलघ्वपरयोरन्तस्थितैः क्रमेण कथि
तान्यस्याः षडङ्गानि चेति।तत्राङ्गन्यासमुद्राप्रकारः।क्रमदीपिकोक्तप्रकारेणोच्यते।अनङ्गुष्ठा ऋजवो हस्तशाखा भवेन्मु
द्रा हृदये शीर्षके च।अधोमुखाङ्गुष्ठमुष्टिः शिखायां करद्वयाङ्गु ... यो वर्मणि स्युः।नाराचमुष्ट्युद्धृतलहस्तयुग्मकाङ्गुष्ठतर्ज
न्युदितो ध्वनिस्तु।विषग्विषक्तः कथितोऽस्त्रमुद्रा यत्राक्षिणी तर्ज्जनीमध्यमे च।यत्राक्षिणीत्यनेन।यत्रशब्देन।पञ्चाङ्गप
क्षे।नेत्रलोपः।प्रागुक्तः सूचितः।तत्र नाराचमुष्टिलक्षणमुच्यते।हस्ततलद्वयमन्योन्यं संमुखीकृत्य तयोर्मध्यमानामिकाक
निष्ठाङ्गुलीर्मुष्टीकृत्य तर्जनीद्वयं त्वृजूकृत्यान्योन्याग्रेण संस्पृश्याङ्गुष्ठद्वयं तु तथैव ऋजूकृत्यान्योन्यं संश्लिष्य ताभ्यामङ्गु

For Private And Personal

प्र.सं. ष्ठतर्ज्जनीद्वन्द्वाभ्यामुद्रितोध्वनिः स्वपरितो विषक्तः। अस्त्रमुद्रेत्यर्थः। तत्रास्त्रमुद्रानन्तरनेत्रमुद्रोक्त्यावैसर्वदेवताविषये।
१० सर्वत्रास्त्रन्यासानन्तरम्। नेत्रन्यास इति केषाञ्चित्पक्षः सूचितः। मन्त्रदेवताप्रकाशिकायामप्यङ्गविधिरुक्तः। त्रिद्व्येकं
दशकं त्रिद्विसंख्याकाङ्गुलिभिः क्रमात्। अस्यार्थः। अङ्गुष्ठतर्जनीमध्यमायुक्तेनाङ्गुलीत्रयेण हृदयम्। अङ्गुष्ठतर्जनीभ्यां
शिरः। अङ्गुष्ठेन शिखा। उभयकरदशाङ्गुलिभिः कवचं। तर्जनीमध्यमानामिकात्रितयेन नेत्रम्। उभयकराङ्गुष्ठतर्ज्जनीभ्यामस्त्रमिति। अङ्गानामर्थास्तु। हृदयं बुद्धिगम्यत्वात् प्राणामः स्यान्नमः पदम्। क्रियते हृदयेनातो बुद्धिगम्यान्नमस्कृतिः। तुङ्गार्थः शिरसेचेति विषयाहरणे हि ठः। शिरोमन्त्रेण चोत्तुङ्गविषयाहृतिलक्षणा। शिखा तेजः समुद्दिष्टा वषडित्यङ्गमुच्यते। तत्तेजोस्य तनुः प्रोक्ता शिखामन्त्रेण मन्त्रिभिः। कचग्रहण इत्यस्माद्धातोः कवचसम्भवः। हुन्तेजस्तेजसादेहो गदृहोते कवचं ततः। अमुत्रासादिकौ धातू सङ्क्षेपचलनार्थकौ। तेनानिष्टसमासिप्यचालयेत्फट्पदाग्निना। नेत्रं दृष्टिः समुद्दिष्टा वौषट् दर्शनमुच्यते। दर्शनं दृग्विषयेणस्यात्तत्तेजो नेत्रवाचकमिति। एवमङ्गन्यासं कृत्वा पुनर्बीजशक्त्यादीन्स्मरेत्। यत्र यत्र बीजशक्ती पृथगनुक्ते तत्र सर्वत्र प्रणवो बीजम्। भुवनेश्वरी शक्तिरित्याचार्याभिप्राय इति वर्णयन्ति। तदुक्तञ्च। प्रपञ्चसार टीकाकारेण। अनुक्तबीजशक्तिविशेषाणां मन्त्राणां प्रणवो बीजम्। भुवनेश्वरीः शक्तिरिति। विवरणकारैस्तु। तत्र तत्रोक्ता रा.म. १०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



निच। अत्रतु ह्मितिबीजम्। सइ्तिशक्तिः। बीजशक्तिकीलकैस्तु। स्तनयोर्हृयोर्हूयोर्हृदि चन्यसेत्। केवलंमनसास्मरेद्वा अष्टवारंजपेद्वा। तत्रगोपालविषयेतु कचित्कचित्। किंचिदधिकानिसन्ति। क्लींवीजम्। स्वाहाशक्तिरिति। स्तनयोः जंकीलकम्। वञ्जीवः। एतद्वयंहृदये। कृष्णः प्रकृतिरितिनाभौ। दुर्गाधिष्ठात्रीदेवता। विष्णुरभिमानिनीदेवता। एनद्वयंहृदिन्यसेत्। सर्वमन्त्रस्यापिप्रकृतिर्देवता। अधिष्ठात्रीदेवता। अभिमानिनीदेवताचेति। देवतात्रैविध्यमस्तियथागायत्रीमन्त्रस्य। सूर्यश्चनारायणश्चशक्तिश्च। एवंसर्वत्रानुक्तस्थलेगुरुमुखादेवतन्त्रेयम्। मन्त्रदेवताप्रकाशिकायामुक्तम्। बीजंशक्तिश्चमूलाधारेन्यसेत्। सकलमन्त्रेषुब्रह्मवीजम्। मायाशक्तिः। जीवोवीजम्। बुद्धिःशक्तिः। उदानोवीजम्। सुषुम्नानाडीसरस्वतीशक्तिरिति। मूलाधारेन्यसेत्। तत्रब्रह्ममायाशब्दाभ्यांप्रणवहृल्लेखार्थभूतेपरब्रह्ममूलप्रकृतीउच्येते। जीवबुद्धिशब्दाभ्यांसर्वकारणभूतब्रह्ममाययोर्ज्ञानभागाउच्येते। उदानसुषुम्नानाडीशब्दाभ्यांब्रह्ममाययोः प्रवर्त्तकभागाउच्येते। एवंसत्यशवलितयोर्ब्रह्ममाययोःसर्वप्रपञ्चकारणत्वम्। प्रणवहृल्लेखयोः समस्तमन्त्रबीजशक्तिकारणत्वञ्चोक्तंभवति। तस्मात्समस्तमन्त्रानुस्यूतशब्दब्रह्माख्यमातृकामन्त्रावगाहिप्रणवहृल्लेखावाच्यमायाशवलितब्रह्मस्वरूपप्रत्यगात्मभूताखण्डसुखचित्प्रकाशात्। समस्ताङ्गसहितसर्वदेवतामन्त्रमूर्त्तयःसाधकस्यभाग्यवशात् प्रज्वलिताग्नेर्वि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र॰सं॰ स्फुलिङ्गा इव प्रादुर्भूता इति भावयेत्। अनन्तरं तथाविधाभीष्टदेवतामयं तेजः स्वशरीरे अन्तर्बहिश्च व्याप्नोतीति चिन्तये
११ त्। पुनर्मातृकाध्यानम्। पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिन्दुकु
न्दावदाताम्। अक्षस्रक्कुम्भचिन्तालिखितवरकरां त्रीक्षणां पद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां न
मामि। तत्राक्षस्रक् इत्यक्षमाला कुम्भः पूर्णकुम्भः चिन्तेति ज्ञानमुद्राख्या लिखितं पुस्तकम्। तत्र दक्षिणाङ्गुष्ठतर्जन्योरन्योन्याग्र
संस्पर्शेन पराभिमुखप्रदर्शनं ज्ञानमुद्रेति कीर्त्यते। पुनरेवन्न्यास्वा। त्रिंशत्पटलेऽम्बकविधाने वक्ष्यमाणप्रकारेण प्राणप्रति
ष्ठां कृत्वा। मानसपूजां पञ्चोपचारैः कुर्यात्। तत्प्रकार उच्यते। प्रथमम कराङ्गुष्ठाग्रेण उभयकनिष्ठयोर्मध्यमपर्वणोः
स्पर्शनपूर्वकं ॐ गन्धं कल्पयामीत्युक्त्वा गन्धोपचारं समर्पयेत्। पुनस्तथैव तर्जन्यग्रद्वयेनाङ्गुष्ठद्वयमध्यदेशसंस्पर्शनपूर्व
कं ॐ पुष्पं कल्पयामीति पुष्पमुद्रया पुष्पोपचारं समर्पयेत्। पुनरितरासु तिसृष्वप्यङ्गुलीषु तर्जन्यादिषु अङ्गुष्ठाग्रेण मध्य
मपर्वदेशसंस्पर्शनपूर्वकमेव ॐ धूपदीपनैवेद्यमुद्राः क्रमेण तत्तन्नाम्ना पूर्ववदेव समर्पयेत्। एवमेव सर्वत्र मानसपूजा
प्रकारः। तत्क्रमदीपिकायां सूचितम्। ततो नैवेद्यमुद्रिकां प्रधानया करद्वयेऽस्पृशन् अनामिकां निजं मनुं जपन् प्रदर्शयेदि रा॰भ॰
ति। प्रधानयेत्यङ्गुष्ठेन। तत्र तु केवलं नैवेद्यमुद्रामात्रं प्रदर्शितम्। अयमेव न्याय इतरमुद्रिकाणामपि द्रष्टव्यः॥ अथवा कल्पा ११

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्तरोक्तप्रकारेणगन्धाद्युपचारमन्त्रः।लंपृथिव्यात्मनेनारायणायसंगन्धंकल्पयामि।हंआकाशात्मनेवासुदेवायब्रह्मपु
ष्पंकल्पयामि।यंवाय्वात्मनेसंकर्षणायधूपंकल्पयामि।रंअग्न्यात्मनेप्रद्युम्नायदीपंकल्पयामि।वंअबात्मनेअनिरुद्धायअ
नन्तंनैवेद्यंकल्पयामि।एभिरेववामन्त्रैः पूर्वोक्तमुद्राप्रकारेणमानसपूजांकुर्यात्।एवंस्वहृदयेदेवतांध्यात्वा।तत्रमान
सपूजांकृत्वामातृकासरस्वतीमन्त्रंपूर्वसेवापुरस्सरंलक्षसंख्यांजपेत्।न्यसेच्चतावत्संख्यंपुरश्चरणार्थअकाराद्याःक्षका
रान्तावर्णामातृकासरस्वतीमन्त्रः तत्रपूर्वसेवेतिसर्वेषांमन्त्राणांपुरश्चर्यायाः प्रागेवतदधिकारसिद्ध्यर्थएतावत्संख्यंज
प्तव्यमित्यस्तिनियमः।तावत्तत्तद्विधानोक्तसंख्ययापूर्वंजप्त्वापश्चाद्यथाविधिपुरश्चर्यांकुर्यादित्यर्थः।तत्तु वयिष्यति।चा
स्मिन्नेवप्रपञ्चसारेवक्ष्यमाणनृसिंहविधाने।द्वात्रिंशत्सहस्रैरधिकृतिरयुतैर्भवेत्।पुरश्चरणन्तावद्भिस्तावद्भिर्लक्षैः सि
द्धिः समीरितास्यमनोरिति।क्रमदीपिकायामप्येवमेवोक्तमष्टादशाक्षरीविधाने।दशाक्षरीविधानेच।तेनानुज्ञातःपू
र्वसेवान्द्वितीयेमासिद्वादश्यामारभेतामलायाम्।प्रजपेद्युतचतुष्कंदशाक्षरंमनुवरंपृथक्क्रमशः।अष्टादशाक्षरञ्चद
युतद्वितयमित्युदीरितासंख्येति।पुनरपितत्रैवोक्तम्।एवञ्चैषामशक्तौगदितमिहमयापूर्वसेवाविधानंनिवृत्तेस्मिन्पु
नश्चप्रजपतुविधिवत्सिद्धयेसाधकेन्द्रइति।तत्रद्वितीयेमासीति।प्रथमेमासिदीक्षांकृत्वा।पश्चाद्द्वितीयेमासिजपेदित्यर्थः।त

For Private And Personal

त्रएवज्ञैषामशक्ताविति। एतेषांपदानामस्मिन्नर्थेअन्वयोनास्तिपूर्वत्रैवान्वयः। तत्रतु। पूर्वसेवासंख्यायत्रनोक्ता। तत्रसर्वत्रा
सहस्रसंख्ययाकर्त्तव्येतिसंप्रदायः। तदुक्तम्। चमेधादक्षिणामूर्तिकल्पे। संख्याउक्तेसहस्रंस्यात्द्रव्याउक्तेघृतंतथा। समिधो
नुक्तविषयेपालाशः परिकीर्तितेइति। तत्रशिवभक्तश्चेत्पूर्वसेवापेक्षानियमोनास्ति। तदुक्तंश्चिदंवरकल्पेपूर्वसेवांविना
वापिशिवभक्तस्यसिद्ध्यतीति। अथास्यमातृकामन्त्रस्याक्षरन्यासस्थानान्युच्यन्ते। काननवृत्तद्वयश्रुतिनोगण्डोष्ठदन्तमूर्धा
स्ये। दोःपत्सन्ध्यग्रेषुचपार्श्वद्वयपृष्ठनाभिजठरेषु। हृद्दोर्मूलापरगलकक्षेषुहृदादिपाणिपद्युगे। जठराननयोर्व्यापकसंज्ञा
न्न्यसेद्धाक्षरान्क्रमशः। तत्रपादयोर्व्यापकाक्षराणि। तानितु। हृदयादारभ्यैव। तत्तदुक्तस्थानपर्यन्तम्। व्यापकरूपेणैव। न्य
सेत्। तदुक्तंचक्रमदीपिकायाम्। हृदयपूर्वमनेनयथाक्रमंन्यसतुशुद्धकलेवरसिद्धयइति। तत्रदोर्मूलापरगलकक्षेष्वि
त्यत्रक्रमदीपिकामते। कक्षेककुदिदोर्मूलइतिदक्षिणकक्षे। वामेतु। दोर्मूलइत्युक्तःपक्षविशेषः। एवंसृष्टिन्यासः। एतद्विप
रीतस्थानक्रमेण मन्त्रप्रतिलोमेनच। मन्त्रप्रतिलोमःसंहारन्यासः। पुनर्वाहृन्मूलादिस्थानमारभ्यहलभिरनुलोमन्यासरीत्या
न्यस्त्वापश्चात्स्वरैः शीर्षादिस्थानेषुन्यसेत्। एवंस्थितिन्यासः। तत्रसृष्टिन्यासेशुद्धमातृकयान्यसेत्। संहारेतु। सविन्दुमातृक
या। स्थितिन्यासेतुविसर्जनीयान्तैर्वर्णैर्न्यसेदितिविशेषः। अथगुरुमुखात्सकलमन्त्रोपदेशविधिंवक्ष्ये। तत्रप्रथममुपदेशा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्थं मासनियमञ्चिदंबरकल्पोक्तप्रकारेण वक्ष्ये। तत्र मित्रारिशोधनम् क्वचित्कचिन्मन्त्रप्रभाववशान्नास्ति तथापि मासशोधनं
— मवश्यं कर्त्तव्यम्॥ तदुक्तञ्चिदंबरकल्पे। पञ्चाक्षरस्य मन्त्रस्य नैव मित्रारिशोधनम्॥ तथाप्यवश्यं कर्त्तव्यं मासशोधन
मादरादिति। अतो मा-सनियम उच्यते॥ असिद्धिर्भूमिसंपत्तिर्मरणं बंधुनाशनम्। शुभप्राप्तिः स्त्रीनाशः संपत्तिरलसंपदः।
ज्ञानप्राप्तिर्ज्ञाननाशो ह्यमोघार्थो वशीकृतिः। एवञ्चैत्रादिमासानां फलान्याहुर्मनीषिणः। सोमवारे शुक्रवारे स्वसंपत्क्षेमसाधकौ
मैत्रे परमैत्रे वा मन्त्रदीक्षां समाचरेदिति। एवमुक्तेषु शुभेषु मासेषूपदेशं कुर्यात्। मेषे प्रतापवान् भूयात् वृषभे तु सुखी भवे
त्। मिथुने रिक्तहस्तः स्यात् कर्कटे दुःखवान् भवेत्। सिंहे सर्वत्र सिद्धिः स्यात्कन्यायां तत्क्षणाल्लभेत्। तुलायां लाभवान् भूयात्
वृश्चिके विकटं भवेत्। धनुर्मासे तु सौभाग्यं मकरे धनवान् भवेत्। कुंभे स्याद् पुत्रवृद्धिर्मीने स्याद्राजवल्लभः। इत्यादिमासानां
लोच्य वदेन्मन्त्रं विचक्षणः॥ अथोपदेशार्थं तिथिवारनक्षत्रादिनियमो लिख्यते॥ अश्विनी रोहिणी चार्द्रा तथा पुष्योत्तरात्रयम्।
हस्तचित्रास्वातिमैत्रं विशाखा च धनिष्ठिका। पुनर्वसू रेवती च प्रशस्ता मन्त्रसंग्रहे। मैत्रमित्यनुराधा। पौर्णिमा पञ्चमी चैव द्वितीया स
प्तमी तथा। त्रयोदशी च दशमी प्रशस्ता मन्त्रसंग्रहे। द्वितीयादिविहिता नित्यं षष्ठी सर्वेत्र गर्हिता। रवौ गुरौ बुधे शुक्रे कर्त्तव्यं परमेश्वरि
मन्त्रादारंभणं मेषे धनधान्यप्रदं भवेत्॥ वृषे मरणमाप्नोति मिथुने पत्ननाशनम्॥ कर्कटे सर्वसिद्धिः स्यात् सिंहे मेधाविनाशनम्। क

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



न्यालक्ष्मी प्रदानित्यन्तुलायां सर्वसिद्धिदः। वृश्चिके सर्वसिद्धिः स्याद्धनुज्ञो नविनाशनम्॥ मकरः पुत्रदः प्रोक्तः कुंभो धनसमृद्धिदः।
मीनो दुःखप्रदो नित्यमेवं राशिफलं प्रिये। योगाश्च प्रीतिरायुष्मान् सौभाग्यः शोभनाशुभः। सुकर्मा च धृतिर्वृद्धिः ध्रुवः सिद्धिश्च हर्षे
णः। वरीयांश्च शिवः सिद्धो ब्रह्मा चैंद्रश्च षोडश। इति। शुक्लपक्षे प्रकुर्वीत कृष्णे वा देशिकोत्तमः। शुक्ले सर्वसमृद्धिः स्यात् कृष्णे मध्य
मतो भवेत्। द्वादश्यामपि कर्तव्यं मन्त्रयोदश्याम पापि च। महाभवचतुर्दश्यामुपरागेषु च द्वयोः। ददन्मन्त्रं भवेन्मन्त्री दारिद्रःसप्त
जन्मसु। धर्मदः प्रातःकालः स्यात्संगवो राज्यदः स्मृतः। मध्याह्ने सर्वसिद्धिः स्यात् सायाह्ने मध्यमो भवेत्। रजनी मन्त्रदाने तु निषिद्धा
देशिको त्तमैः। सूर्यग्रहणकाले तु नान्यदन्वेषितं भवेत्। मलमासं विसर्जयेदिति च। अथ मन्त्रदेवताप्रकाशिकोक्तप्रकारेण मासा
दिनियमो लिख्यते। तत्र मासफलानि ज्ञात्वा शुभकाले दीक्षा कर्तव्या। असिद्धिर्भूमिसंपत्तिर्मरणं बंधुनाशनं। आयुर्वृद्धिः प्रजाना
शः संपदो क्षरसंपदः। शुभप्राप्तिः स्यान्नाशो अमोद्या यो वशीकृतिः। एवञ्चैत्रादिमासानां फलान्याहुर्मनीषिणः। तत्रादौ गुरुमन्त्रा
णां शिष्यस्य नक्षत्रादिकोष्ठानां फलं परीक्ष्य दीक्षां कुर्यात्। तत्र नक्षत्रपरिक्षा। राज्यलाभोपकाराय प्रारभ्यारीश्वरः कुरून्। गोपालक
कुटीप्रायात्कुल्ला वेत्सु दितालिपिः। नक्षत्रेषु क्रमाद्योज्याः स्वरांत्यौ रेवतीयुतौ। अस्यार्थः। रेवतीनक्षत्रयुक्तौ भवतः। रा इति द्वयम्।
ज्ये न्ये कम्। ज्या इति त्रीणि। भो इति चतुष्टयम्। प इत्येकम्। का इत्येकम्। रा इति द्वयम्। य इत्येकम्। प्रा इति द्वयम्। इति द्वयम्। भ्ये से



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ति द्वयम्।र इति द्वयम्।कु इत्येकम्।र इति द्वयम्।गो इति त्रीणि म्।पा इत्येकम्।ल इति त्रीणि।क इत्येकम्।कु इत्येकम्।टी इत्येकम्।
प्रा इति द्वयम्।या इत्येकम्।फु इति द्वयम्।ला इति त्रिणि।व इति चतुष्टयम्।एत दुक्तं भवति।अआ अश्विनी।इ भरणी।ईउऊ कृत्तिका
म्।क ऋ ॠ ऌ ॡ रोहिणी।ए मृगशीर्षं।ऐ आर्द्रा।ओ औ पुनर्वसुः।क पुष्यम्।ख गः आश्लेषा।घ ङ मघा।च पूर्वाफाल्गुनी।छ ज उत्तराफा
ल्गुनी।झ ञ हस्तः।ट ठ चित्रा ड स्वाती।ढ ण विशाखा।त थ द अनुराधा।ध ज्येष्ठा।न प फ मूलम्।ब पूर्वाषाढा।भ श्रवणम्।य र ध विष्ठा।
ल श तभिषक्।व श पूर्वाभाद्रपदा।ष स ह उत्तराभाद्रपदा।ल क्ष अं अः रेवती।इत्येवमक्षरेषु नक्षत्राणि ज्ञात्वा मन्त्राद्यक्षरेणात्म
नामाद्यक्षरानुकूल्यं ज्ञातव्यम्।जन्म संप ॒ द्विपत्क्षेम प्रत्यरिः साधको वधः।मैत्रं परम मैत्र ञ्च नवैतानि पुनः पुनः॥ इति नक्षत्रयु
क्तानि।ज्ञातव्यानि।अथ राशी परीक्षा।वेला गरु खरशोणः प्रमेणो वेति भेदनः।लिप्यर्णा राशिषु ज्ञेयाः षष्ठे शादीश्च योजयेत्।अस्या
र्थः।वे इति चतुष्टयम्।ला इति त्रीणि।ग इति।त्रीणि।रु इति द्वयम्।ख इति द्वयम्।र इति द्वयम्।प्रो इति पञ्च।ण इति पञ्च।श इ
ति पञ्च।म इति पञ्च।णो इति पञ्च।वे इति चत्वारि।एत दुक्तं भवति।अआ इई मेषः।उऊ ऋ इति वृषः।ॠ ऌ ॡ इति मिथुनम्।एऐ
कर्कटकम्।ओ औ सिंहः।अं अः श ष स ह क्षाः कन्या।क वर्गस्तुला।च वर्गो वृश्चिकः ट वर्गो धनुः।त वर्गो मकरः प वर्गः।कुंभः य
र ल वा मीनः।एक पंच नव बन्धुरसका द्वे च षष्ठ दशमास्तु सेवकाः।त्रीणि रुद्रगुण सप्त पोषका द्वादशाष्ट चतुरस्तु घातकाः।जपे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नवं सुसिद्धिः स्यात्सेवया च ससेवकः। मन्त्रः स पोषको ज्ञेयस्तु घातयेद्यस्तु घातकः। एवमक्षरेषु राशिं ज्ञात्वा फलानि ज्ञातव्यानि॥
अथ भूतकूटपरीक्षा। अ इ उ ऋ ऌ पञ्च वर्णाः क्रमेण वाय्वग्निभूमिजलाकाशात्मकास्तथा। आ ई ऊ ॠ ॡ पञ्च वर्णास्तथा।
ए ऐ ओ औ अं इति पञ्च वर्णास्तथा। क च ट त प पञ्च वर्गास्तथा। य र ल व श पञ्च वर्णाश्च। ष स क्ष ल ह पञ्च वर्णाश्च। वाय्वग्नि
भूमिजलाकाशात्मका भवन्ति। तदुक्तम्। ह्रस्वाः पञ्च परे यसंधिविकृताः पञ्चाथ बिन्द्वन्तिकाः काद्याः प्राणहुताशभूजलव
मयायाद्याः शवर्णान्तिकाः। हान्ताः षसलक्षाः क्रमेण कथिता भूतात्मकास्ते पृथक् तैस्तैः पञ्चभिरेव वर्णदशकैः स्युः स्तंभनाद्याः क्रि
या इति। साधकाख्याक्षरं पूर्वं मन्त्रस्यापि तदक्षरम्। यद्येकभूतदैवत्यं जानीयात्स्वकुलं हि तत्। पार्थिवे वारुणं मित्रमाग्नेयस्या
पि मारुतं। माहेन्द्रवारुणानाञ्च शत्रुत्वे मारुतः स्थितः। आग्नेये वारुणं शत्रुर्वारुणे तैजसन्तथा। एतेषामेव सर्वेषां सामान्यत्वेन ना
भसम्। मातृवन्मन्त्रविद्यानामविरोधे सदास्थितम्। एवं पञ्चभूतबलं ज्ञेयम्॥ अथ सिद्धसाध्यसुसिद्धारिपरीक्षार्थं कोष्ठोद्धारक
मः कथ्यते॥ तत्र चतुष्पदयुक्तकोष्ठचतुष्टयं कृत्वा। तत्र कोष्ठचतुष्टयाद्यपदेषु चतुर्षु प्रादक्षिण्यक्रमेण अकारादिस्वरचतुष्ट
यं लिखेत्। द्वितीयेषु उकारादि तृतीयेषु ऌकारादि चतुर्थेषु ओकारादि विलिखेत्। अवशिष्टानपि तथा। एवमुक्तप्रदक्षिणक्रमेण रा॰
ककारादितकारान्तान् षोडशवर्णानालिख्य पुनस्तेनैव क्रमेण थकारादिसकारान्तांश्च षोडशवर्णान् विलिख्य हलक्षद्वन्द्व १४

शिष्टवर्णत्रयं प्रोक्तक्रमेण प्रथमद्वितीयतृतीयकोष्ठाद्यपदेषु विलिखेत्। तत्र कोष्ठचतुष्टये स्वनामाद्यवर्णो यत्र कोष्ठे तिष्ठति। त
त्कोष्ठमादिं कृत्वा प्रदक्षिणक्रमेण सिद्धसाध्यसुसिद्धारीन् कल्पयेत् वलापि स्वनामवर्णयुक्तकोष्ठान्तर्गतचतुष्पदेष्वपि। तथा
विधपदमादिं कृत्वा सिद्धपूर्वकसिद्धादिचतुष्टयं कल्पयेत्। द्वितीयकोष्ठचतुष्केपि। स्वनामार्णषट्कयोगिपदसमसंख्याकं पदमा
दिं कृत्वा। क्रमेण साध्यपूर्वकसिद्धादिचतुष्टयं कल्पयेत्। एवं तृतीयकोष्ठपदचतुष्टयेष्वपि तथाविधमादिं कृत्वा सुसिद्धपूर्व
कसिद्धादिचतुष्टयं कल्पयेत्। तथा चतुर्थकोष्ठचतुष्पदेष्वपि। तथाविधमादिं कृत्वा। अरिपूर्वकसिद्धादिचतुष्टयं कल्पयेत्। ए
तेषु षोडशस्थानेषु मध्ये मन्त्राद्यवर्णो यत्कोष्ठपदे तिष्ठति। तत्कोष्ठपदनामांकितः स मन्त्रो भवति। एतत्कोष्ठगतफलमुच्यते। सि
द्धः सिध्यति कालेन साध्यः सिध्यति वा न वा सुसिद्धस्तत्क्षणादेव अरिर्मूलं निकृन्तति। सिद्धसिद्धो यथोक्तस्तु द्विगुणात् सिद्धसाध्य
कः सिद्धः सुसिद्धोऽर्धजपात्सिद्धारिर्हन्ति गोत्रजान्। साध्यसिद्धो द्विगुणतः साध्यसाध्यो निरर्थकः। साध्यः सुसिद्धोऽर्धजपात् सा
ध्यारिर्हन्ति गोत्रजान् सुसिद्धसिद्धोऽर्धजपात् तत्साध्यः साधिकाज्जपात्। ग्रहणात्तत्सुसिद्धस्तु तदरिर्ज्ञातिहा भवेत्। अरिसिद्धः
सुतं हन्यादरिसाध्यस्तु कन्यकां। पत्नीमरिसुसिद्धस्तु अरिरात्महा। दुष्टर्क्षराशिभूतारिर्वर्णप्रचुरमन्त्रकम्। सम्यक् परीक्ष्य नं य
त्नाद्वर्जयेन्मतिमान्नरः। आदौ सिद्धस्तथान्ते च सर्वसिद्धिफलप्रदः। आदावन्ते भवेत्साध्यः कृच्छ्रसाध्य उदाहृतः। आदावन्ते सुसि



For Private And Personal

द्रुस्तुक्षिप्रमेव प्रसिध्यति। अदावन्ते रिपुर्यस्तु साधकं स निकृन्तयेत्। आदौ सिद्धोन्त्यसाध्यो यो द्विगुणेन स सिध्यति। आदौ साध्य
स्त्वसिद्धोन्ते प्रोक्तमार्गेण सिध्यति। स्वसिद्धादिस्तु साध्यतश्चतुर्गुणमपेक्षते। आद्यन्तयोर्यदा सिद्धो मध्ये साध्यः प्रजायते। आद्यन्त
योर्यदा साध्यो मध्यसिद्धः प्रजायते। तावुभौ साध्यसिद्धौ हि जपाधिक्येन सिध्यतः। आदौ सिन्त्येन संयुक्तः सुसिद्धेन तथान्ततः। श्र
वणादेव सिद्धो स्यात् साधकस्य न संशयः। सिद्धान्तरितसाध्यस्तु सुसिद्धान्तरितोथवा। शीघ्रं सिध्यति मन्त्रो वै यथोक्तं मन्त्रवित्तमैः॥
सिद्धेनान्तरितः शत्रुः सुसिद्धेनापि चेद्भवेत्। नासौ रिपुर्भवेन्मन्त्रः किं तु कष्टेन सिध्यति। साध्येनान्तरितः सिद्धः सुसिद्धोपि तथा य
दि। सिध्यत्यतीवकष्टेन साधकस्य न चान्यथा। रिपुणान्तरितं सिद्धं सुसिद्धं च न तथा त्यजेत्। रिपुणान्तरितो मन्त्रो नैव ग्राह्यः कदा
चन। नामाक्षरं समारभ्य यावन्मन्त्रादिदर्शनम्। त्रिधा कृत्वा सुरैर्हृत्वा तदन्यद्विपरीतकम्। कृत्वाधिकोऽऋणी ज्ञेयः ऋणी चेन्मन्त्र
मुत्तमम्। स्वयमृणी चेत्तन्मन्त्रं त्यजेत्सूर्वे ऋणीयतः। त्रिभिर्गुणित्वा सप्तभिर्हरेत्। तद्विपरीते सप्तभिर्गुणित्वा त्रिभिर्हरेदित्यर्थः। त
त्र शर्मे प्रसिद्धनाम्नो मध्ये किं वा ग्राह्यमित्याकांक्षायां कल्पान्तरे प्रोक्तम्॥ प्रसिद्धनाम गृह्णीयात्सुप्तो येन च जागृयादिति। तत्रा
पवाद उच्यते॥ प्रणवस्त्र्यक्षरी माया व्योमव्यापि षडक्षरः। प्रासादो बहुरूपी च सप्तसाधारणाः स्मृताः। सौरमन्त्राश्च येपि स्युर्वैष्णवा
नारसिंहकाः। सिद्धसाध्यसुसिद्धारिविचारपरिवर्जिताः। नृसिंहार्कवराहाणां प्रासादप्रणवस्य च। सपिण्डाक्षरमन्त्राणां सिद्धा

दीक्षेव शोधयेत्। एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्वति। वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत्। हंसस्याष्टाक्षरस्या
पि तथा पञ्चाक्षरस्य च। स्वप्नदत्तस्य मन्त्रस्य स्त्रियादत्तस्य चैव हि। नपुंसकस्य मन्त्रस्य सिद्धारीन्नैव शोधयेत्। एकद्वित्र्यादिबी
जस्य सिद्धारीन्नैव शोधयेत्। अकारादिक्षकारान्तैर्बिन्दुमन्मातृकाक्षरैः। अनुलोमविलोमस्थैः क्लृप्तया वर्णमालया। प्रत्येकवर्ण
संयुक्ता जप्ताः स्युः सर्वसिद्धिदाः। वैरिमन्त्रा अपि नृणामन्ये मन्त्राश्च किं पुनः। मन्त्रादिषु च सर्वेषु हृल्लेखां कामबीजकम्। श्रीबीजं
वा विनिक्षिप्य जपेन्मन्त्रविशुद्धये। नारसंपु टितो वापि दुष्टमन्त्रोपि सिध्यति। स्त्रीपुन्नपुंसकत्वेन त्रिधा स्युर्मन्त्रजातयः। स्त्री
मन्त्रा वह्निजायान्ता नमोन्ताश्च नपुंसकाः। शेषाः पुमांसस्ते शस्ता वश्योच्चाटनकेषु च॥ क्षुद्रक्रियायां विध्वंसे स्त्रियोन्येषु न
पुंसकः। नारान्त्याग्निवियत्प्रायो मन्त्र आग्नेय दृष्यते। शिष्टाः सौम्याः प्रशस्तौ तौ कर्मणोः क्रूरसौम्ययोः। आग्नेयमन्त्रः सौम्यः स्यात्प्राय
शोन्ते नमोन्वितः। सौम्यमन्त्रस्तथाग्नेयः फट्कारेणान्वितोन्ततः। स्वापकाले वामवहो जागरे दक्षिणावहः। आग्नेयस्य मनोः सौ
म्यमन्त्रस्य तद्विपर्ययः। प्रबोधकालं जानीयादुभयोरुभयोर्वहः। स्वापकाले तु मन्त्रस्य जपो नर्थ फलावहः। वश्याकर्षणसन्ता
पे होमे स्वाहां प्रयोजयेत्। क्रोधोपशमाने शान्तौ पूजने च नमो वदेत्। वौषट् संमोहने दीपपुष्टिमृत्युंजयेषु च॥ ॐकारं प्रीति
नाशे च छेदने मारणे तथा। उच्चाटने च विद्वेषे तथाधीविकृतौ च फट्। विघ्नग्रहविनाशे च हुं फट्कारं प्रयोजयेत्। मन्त्रो दीप

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· नकार्ये चलाभालाभे वषट् स्मृतः। एवं कर्मानुरूपेण तत्तन्मन्त्रं प्रयोजयेत्। ग्रथितादिप्रभेदश्च मन्त्राणां वक्ष्यतेऽधुना। ग्रथि
१६ तं संपुटं ग्रस्तं समस्तञ्च विदर्भितम्। तथा चाक्रान्तमाद्यन्तं गर्भस्थं सर्वतोवृतम्। तथा युक्तिविदर्भञ्च विदर्भग्रथितं तथा। इ
त्येकादशधा मन्त्राः प्रयुक्ताः कार्यसिद्धिदाः। साध्यनामार्णमेकैकं मन्त्रार्णैः संप्रचोदितम्। ग्रथितं तत्समाख्यातं वश्याकृष्टिकरं
परम्। मन्त्रमादौ वदेत्सर्वं साध्यसंज्ञामनन्तरम्। विपरीतं पुनश्चान्ते मन्त्रं तत्संपुटं स्मृतम्। शान्तिपुष्टिकरं श्रेयं मन्त्रे लोकैश्वर्यदा
यकम्। अधमर्धं तथाद्यन्ते मन्त्रं कुर्याद्विचक्षणः। मध्ये चास्य भवेत्साध्यं ग्रस्तमित्यभिधीयते। अभिचारेषु सर्वेषु प्रयोजयेन्मारणे
षु च। अभिधानं वदेत्पूर्वं पश्चान्मन्त्रं तथा वदेत्। एतत्समस्तमित्युक्तं शत्रूच्चाटनकारकम्। द्वौ द्वौ मन्त्राक्षरौ यत्र एकैकं साध्यवर्णं
कम्। विदर्भितं तु तत्प्रोक्तं दुष्टग्रहनिवारणम्। मन्त्रेणान्तरितं साध्यं समन्तात्तिष्ठते यदि। आक्रान्तं तद्विजानीयात्क्षयः सर्वार्थसि
द्धिदम्। स्तोभस्तंभसमावेशवश्योच्चाटनकर्मसु। सकृत्पूर्वं वदेन्मन्त्रमन्ते चैव तथा पुनः। मध्ये चास्य भवेत्साध्यमाद्यन्तमिति तद्वि
दुः। अन्योन्यप्रीतियुक्तानां विद्वेषणकरं परम्। आदौ चान्ते तथा मन्त्रं द्विवारं संप्रयोजयेत्। साध्यनाम सकृन्मध्ये गर्भस्थं तु तदु
च्यते। मारणोच्चाटनं वश्यं प्रयुक्तं कारयेत्ररणाम्। हेतिनौसैन्यधीगर्भस्तंभनं च गतेस्तथा। त्रिधा मन्त्रं वदेत्सर्वं तथैवान्ते पुनस्त्रिधा। राम:
सकृत्साध्यं वदेन्मध्ये तद्विद्यात्सर्वतोवृतम्। सर्वोपसर्गशमनं महामृत्युनिवारणम्। सर्वसौभाग्यजननं मृतानाममृतप्रद १६

For Private And Personal

म्।आदौमन्त्रान्ततोनामपुमेन्त्रंसमालिखेत्।एवमेवविधाकृत्वाभवेद्युक्तिविदर्भितम्।सर्वव्याधिहरंप्रोक्तंभूतापस्मारमर्द्
नम्।एकैकंसाध्यवर्णंतुकृत्वामन्त्रविदर्भितम्।पूर्वं वत्तत्रग्रथितन्त्वान्यत्तस्याद्यन्तेप्रकल्पयेत्।विदर्भग्रथितंनाममन्त्र
लक्षणमुत्तमम्।सर्वकर्मकरंप्रोक्तंसर्वैश्वर्यफलप्रदम्।एवमेतेप्रयोगास्युःसिद्धमन्त्रस्यसिद्धिदाः॥एवमुक्तेषुशुभेषुमासेषूप
देशंकुर्यात्।तत्रप्रथमंप्राक्पञ्चमषष्ठयोः पटलयोःउक्तेनमार्गेणवादीक्षाहोमकलशादीन्कृत्वा।तत्रतत्रमन्त्रोक्तिसमये
संकोचेनकेवलकलशमात्रमुक्तेनप्रकारेणवा स्मिन्नेवपटलेउपरिवक्ष्यमाणमातृकावर्णौषधीनांमध्येतत्तत्साध्यमन्त्राणांये
वर्णास्तेषामेवौषधानिक्वाथयित्वाकेवलंनिष्पीड्य।आर्द्रीकृत्यतेनजलेनवा।उपरिअष्टमेपटलेस्वयंवराविधानेनवक्ष्यमा
णदशविधपुष्परसैर्वाअश्वत्थवटोदुंबरप्लक्षाणांत्वचःक्वाथयित्वा।तैर्जलैर्वाशुद्धजलैरेववा कलशमापूर्य।उपरिसप्तविंश
तिपटलेप्रसङ्गात्वक्ष्यमाणधन्वन्तरिविधानेवक्ष्यमाणकलशसामान्यपूजाक्रमेणतत्तन्मन्त्रविधानोक्तविशेषपूजाक्रमेण
च।संपूज्यगुरुःशिष्यमभिषिच्यमन्त्रमुपदिशेत्।अथवाचिदंबरकल्पोक्तप्रकारेणदीक्षांकुर्यात्।तत्प्रकारउच्यते।संपूज्यदेवंपूजा
न्तेशिष्यमाहूयसद्गुरुः।स्वर्णपुष्पैरर्चयित्वादेवन्तत्रप्रणामयेत्।शंखतोयेनसंप्रोक्ष्यपुरतःस्थापयेत्तुतम्।स्वयंपरशिवोभू
त्वानिःसंदिग्धमनागुरुः।निजहस्तेनशिष्यस्यसमन्त्रंमूर्द्धिसंस्पृशेत्।स्पर्शदीक्षेतिसाप्रोक्तामलत्रयविमोचिनीति।अथवाशारदा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· तिलकोक्तप्रकारेण दीक्षां कुर्यात्। अथ वर्णात्मिकां वक्ष्ये दीक्षामागमचोदिताम्। पुंप्रकृत्यात्मिका वर्णाः शरीरमपि तादृशम्। यस्मा-
१७ त्तस्मात्तनौ न्यस्येद्वर्णान् शिष्यस्य देशिकः। तत्तत्स्थानयतान्वर्णान् प्रतिलोमेन संहरेत्। स्वज्ञाने देवताभावविधानाद्देशिकोत्त-
मः। तदा विलीनतत्त्वोऽयं शिष्यो दिव्यतनुर्भवेत्। परमात्मनि संयोज्य तच्चैतन्यं गुरुर्द्धिया। पश्चादुत्पादनाद्वर्णान्न्यसेच्छिष्यत-
नौ पुनः। सृष्टिक्रमेण विधिवच्चैतन्यञ्च नियोजयेत्। जायते देवताभावः परानंदमयः शिशोः। निवृत्तिर्जानुपर्यन्तं तलाद्या-
रभ्य संस्थिता। जानुतो नाभिपर्यन्तं प्रतिष्ठा व्याप्य तिष्ठति। नाभेः कंठावधि व्याप्ता विद्या शान्तिस्ततः परम्। कंठाल्ललाटपर्यन्तं व्या-
प्ता तस्माच्छिरोवधि। शान्त्यतीतकला ज्ञेया कलाव्याप्तिरितीरिता। संहारक्रमयोगेन स्थानात्स्थानान्तरे गुरुः। संयोज्य वेधयो-
द्विद्वानाज्ञया ताः शिवावधि। इयं प्रोक्ता कलादीक्षा दिव्यभावप्रदायिनी। ततो वेधमयीं वक्ष्ये दीक्षां संसारमोचनीम्। ध्याये-
च्छिष्यतनोर्मध्ये मूलाधारे चतुर्दले। त्रिकोणमध्ये विमले तेजस्त्रयविजृंभिते। बलित्रितयसंयुक्तं तडित्कोटिसमप्रभाम्।
शिवशक्तिमयीं देवीं ज्वलन्तीं मंत्रविग्रहाम्। सूक्ष्मात्सूक्ष्मतरां शक्तिं भित्त्वा षट्चक्रमंजसा। गच्छन्तीं मध्यमार्गेण दिव्यां परशिवा-
वधि। वादिसान्तान्दलस्थार्णान्संहरेत्कमलासने। तं षट्पत्रमये पद्मे बादिलान्ताक्षरान्विते। स्वाधिष्ठाने समायोज्य वेधये- रामः
दाज्ञया गुरुः। तान्वर्णान्संहरेद्विद्वांस्तं पुनर्नाभिपंकजे। दशपत्रे डादिफान्तान्वर्णाढ्ये योजयेद्गुरुः। तान्वर्णान्योजये- १२

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्रुद्रे तं पुनर्हृदयांबुजे। कादिठान्तार्कपत्राद्ये योजयित्वेश्वरे गुरुः। तान्वर्णान्संहरेत्तस्मिन्स्तंभूत्यः कंठपंकजे। स्वराद्ये षोडशदले योजयित्वा स्वरान्पुनः। सदाशिवे तान्संहृत्य तं पुनर्भ्रूसरोरुहे। द्विपत्रे हक्षलसिते योजयित्वा तयोर्गुरुः। तद्वर्णौ संहरेद्विंदौ कलायान्तं नियोजयेत्। तं नादे तन्त्र नादं नादान्ते योजयेद्गुरुः। तद्व्यापिन्यां समायोज्य विषुवत्कान्तरे च तम्। तत्सुनर्गुरुवक्त्रे तु योजेये। देशिकोत्तमः। स हेवमात्मनाशक्तिं वेधयेत्परमे शिवे। गुर्वाज्ञया च्छिन्नपाशः स्त दाशिष्यः पतेद्भुवि। संजातदिव्यबोधोसौ सर्वं वदति तत्क्षणात्। सा साच्छिवो भवन्न्येषनात्र कार्या विचारणा। एषा वेधमयी दीक्षा प्रोक्ता संवित्प्रदायिनी। क्रमाच्चतुर्विधा दीक्षा तन्त्रेस्मिन्समुदीरिता। कल्पान्तरे प्रोक्तम्। गुरोरालोकमात्रेण भाषणात्स्पर्शनादपि। सद्यः संजायते ज्ञानं सा दीक्षा शांभवी स्मृता। चित्तं तत्त्वे समाधाय परतत्त्वोपबृंहितान्। उच्चरेत्संहतान्मन्त्रान्वाग्दीक्षेति निगद्यते। निमील्य नयने ध्यात्वा परतत्त्वं प्रसन्नधीः। सम्यक्पश्येद्गुरुः शिष्यं दृग्दीक्षा सा भवेत्प्रिये। तत्र दीक्षा कलशाभिषेकं स्तौति संक्षेपादिति कथिता हिताय दीक्षा जन्तूनां प्रवरफलप्रदा चिराय। प्राप्येनां जपविधिरादरेण कार्यो विद्वद्भिः सहुतविधिर्निजेष्टसिध्यै। प्रोक्तेनैवं कलशविधिनैकेन वानेककुंभैर्भक्त्या योवासुमतिरभिषिञ्चेत्नरोमन्त्रजापी। कामान्प्राप्नोत्ययमिह परत्रापि किं तत्र चित्रं लोके भिन्त्यो न खलु मणिमन्त्रौषधीनां प्रभावः। अनेककुम्भैरिति। पञ्चनवपञ्चदिशत्या

For Private And Personal

श्र·सं· दिसंख्याकैरित्यर्थः।पुनस्तस्मिन्नुपदेशसमये पूर्वं गुरुप्रणामविधिं वक्ष्ये।दोर्भ्यां पादाभ्यामंसाभ्यामुरसा शिरसा दृशा मन
१८ सा वचसा चेति प्रणामोऽष्टांग ईरितः॥ बाहुभ्यां च सजानुभ्यां शिरसा वचसा धिया॥ पञ्चांगकः प्रणामः स्यात्पूजासु प्रवरावि
मौ।एवमष्टांगनमस्कारं पञ्चांगनमस्कारं वा कृत्वा गुरुमुपसर्प्य दक्षिणां च दद्यात्। तत्संख्याविशेष उच्यते। वाससी च पुनरं
गुलीभूषां हेमकुसुमस्रजप्रवरेषु। दम्भरार्पणमिति दत्वा वह्निनो द्विजमुखे रितवाः।भनत्वा पुनस्तनुमर्पयते परमात्मने स्वंद्र
व्यार्धमेव गुरवे चतुरंशकं वा। दत्वा दत्वा दशांशमथवापि च वित्तशाठ्यं हित्वार्प्पयेन्निजतनुं तदधीनचेताः॥ एवं गुरु
दक्षिणां कृत्वा दीक्षाकलशमभिषेचयित्वा पश्चाद्दक्षिणां दत्वा वा उपदेशं गृह्णीयात्।पुनरुपदेशविधिस्तद्ग्रहणविधि
श्चोच्यते। तत्र पूर्वं गुरुः शिष्यं षडङ्गादीन् कारयित्वा। पश्चान्मन्त्रं शिष्यायोपदिश्यात्। तदुक्तं च।रहस्योपनिषदि।अंग
हीनानि वाक्यानि गुरुर्नोपदिशेद्बुधः। शंकरभाष्ये देवताधिकरणेऽप्युक्तम्।यो ह वा अविदितार्षेयच्छंदोदैवतब्राह्मणेन म
न्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यते। तस्मादेतानि मन्त्रे विद्यादिति।पुनरुभाभ्यां गुरुशिष्याभ्यां
तस्मिन्समये कर्त्तव्यविशेषः।अस्मिन्नेव कल्पे षष्ठपटलान्ते उक्तः।विमले परिधाय वाससी पुनराचम्य गुरुं प्रणम्य च। राम:
निकटे समुपासतो वदेदथ शिष्यस्य मनुं क्रमो गुरुः।गुरुणा समनुग्रहीतं मन्त्रं स दोजपेच्छुता दत्या।गुरुदेवताम १८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नूनां ऐक्यं संभावयन्स्थियाशिष्यो मन्त्रे मन्त्रगुरौ अपि मन्त्री मन्त्रस्य देवतायां च। त्रिषु विहितः सम भक्तिः प्रेत्येह निजे
प्सितं फलं लभते। तत्र गुरुदेवतामनूनामैक्यमिति गुर्वादीनामात्मनाऐक्यमनुध्यायन्नित्यर्थः तदुक्तं रामकल्पे। देवता
गुरुमन्त्राणां भावयेदैक्यमात्मना। एवं सञ्चिन्तयन्मन्त्री मन्त्रं प्रतिदिनं जपेदिति। उपदेशानन्तरं गुरुः स्वशक्तिहानान
वाप्तये सहस्रं जप्यादिति संप्रदायः। क्रमदीपिकायामप्येवमेवोक्त उपदेशविधिः। परिहितसितनरवसनद्वितयो वाचंय
मः समाचान्तः। बहुशः प्रणम्य देशिकनामानं हरिमथोपसंगम्य तं दक्षिणतउपास्तामभिमुखमेकाग्रमानसः शिष्यः न्यासै
र्यथाविधितमच्युतसाद्विधाय गंधाक्षतादिभिरलंकृतवपुर्भूषणोऽस्य। ऋष्यादियुक्तमथमन्त्रवरं यथावत्ब्रूयात्त्रिशो गुरुस्तर्प्य
म वामकर्णे गुरुणा विधिवत्प्रसादितं मन्त्रमष्टोर्ध्वशतं प्रजप्य भूयः। अभिवंद्य ततः शृणोतु सम्यक्समयान् भक्तिभरायनम्रमू
र्तिः। दत्वा शिष्याय मन्त्रं न्यस्त्वाथ गुरुः कृतात्मयजनविधिः। अष्टोत्तरं सहस्रं स्वशक्तिहानानवाप्तये जप्यादिति। मन्त्रदेवताप्रका
शिकायामुक्तम्। अथाचार्यः शिष्येण गुरुभक्तिनमस्कारादि कारयित्वा। शिष्यस्य देहे प्रणवमातृकाभुवनेश्वरीन्यासपूर्वकम्।
विघ्नेश्वरसरस्वतीमूलमन्त्रन्यासं कृत्वा। स्वहृदये स्थितान्तेजोमयीं मन्त्रमूर्तिं दीपाद्दीपान्तरन्यायेनाम्रतनाडीमार्गतो निर्ग
मय्य शिष्यहृदये प्रविशच्चिन्तयन्। तन्मस्तके अमृतमयं हस्तं निधाय। तद्दक्षिणकर्णप्रदेशे मन्त्रं त्रिवारमुच्चार्यावयोरयं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मन्त्रः सिद्धोस्त्वित्युपदिशेत्। तत्र स्त्रीशूद्रयोस्तु प्रणवं वैदिकमन्त्रञ्च विना मन्त्रान्तरमुपदिशेत्। तत्र प्रणवस्थाने चतुर्दे
शस्वराक्षरमौंकारं योजयेत्। अथ सर्वमन्त्राणां ग्रहणे गुरोरसंभवे कल्पान्तरोक्तप्रकारेण उपायविशेषो लिख्यते। गुरोरभावे
मन्त्राणां ग्रहणक्रम उच्यते। कृष्णपक्षे त्रयोदश्यां दक्षिणामूर्तिसन्निधौ। लिखित्वा राजते पत्रे तालपत्रेऽथवा पुनः। मन्त्रं तं स्थं
डिले स्थाप्य पूजयित्वा महेश्वरम्। पायसादि निवेद्यञ्च कृत्वा तं प्रणिपत्य च। शतकृत्वः पठेन्मन्त्रं दक्षिणामूर्तिसन्निधौ। सर्वे
षाञ्चैव मन्त्राणामेवं ग्रहणमिष्यते। अथवा। नद्यास्तु सिंधुगामिन्यास्तीरे चोत्तरसंस्थिते। स्थंडिलं कारयेत्तत्र सुचौ देशे शुभे
दिने। तालपत्रे लिखित्वा तु मन्त्रं तत्र निधाय च। आवाह्य भास्करं तत्र यथाविधि सुपूजयेत्। तत्सन्निधावष्टशतं पठेद्देशिक
तो यथा। एवं सुगृहीतमन्त्रि मानपूर्वोपं विधिः स्मृतः। इति मन्त्रग्रहणोपायः। एवं यथोक्तलक्षणगुरोर्मुखाच्छ्रुत्वा मन्त्रं यथोक्ते स्था
ने यथोक्ते काले यथोक्तेन नियमेन यथोक्तेन संकल्पप्रकारेण यथोक्तयामात्रया पुरश्चर्यां कुर्यात्। गुरुलक्षणं त्वस्मिन्नेव क
ल्पे त्रिपुराविधाने वक्ष्यति। सत्संप्रदायाद्गुरोर्लब्ध्वा मन्त्रमिमं जपन्निति विस्तरेण द्वात्रिंशत्पटले वक्ष्यति। स्थाननियमं तु सु
दर्शनविधाने वक्ष्यति। समुद्रतीरेऽथवाद्रिशृंगे समुद्रगानां सरितां च पारे। जपेद्विविक्ते निजसद्मगेहे विष्णोर्गृहे वा पुरुषो म रामः
नस्वीति। क्रमदीपिकायामप्युक्तम्। अद्रेः शृङ्गे नद्यास्तटे बिल्वमूले ह्रदे पूततोये गोकुले विष्णुगेहे। अश्वत्थाधस्ताद्बुधेश्वा १९

For Private And Personal

पिनीरे। स्थानेष्वेतेष्वाशीन एकैकशस्तु प्रजपेद युतचतुष्कं दशासहस्रं मनुवरं पृथक्क्रमशः इति। शिवगीतायामुक्तम्। बिल्ववृक्षं समाश्रित्य यो मन्त्रान्विविधाञ्जपेत्। एकेन दिवसेनैव तत्पुरश्चरणं भवेत्। यस्तु बिल्ववने नित्यं कुटीं कृत्वा जपेन्नरः। सर्वे मन्त्राः प्रसिध्यन्ति जपमात्रेण केवलम्। पर्वताग्रे नदीतीरे बिल्वमूले शिवालये। अग्निहोत्रे केशवस्य सन्निधौ तु जपेत्तु यः। नैवास्य विघ्नं कुर्वन्ति दानवा यक्षराक्षसाः। तं न स्पृशन्ति पापानि शिवसायुज्यमृच्छति। मन्त्रदेवताप्रकाशिकायामपि पुरश्चरणविधिरुक्तः। ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्वमुपोषितः। नद्यां समुद्रगामिन्यां नाभिमात्रांभसि स्थितः। ग्रहणादि तु मोक्षान्तं जपेन्मन्त्रं समाहितः। अनन्तरं दशांशाच्च क्रमाद्धोमं समाचरेत्। तदन्ते मन्त्रसिध्यर्थे गुरुं संपूज्य तोषयेत्। ततश्च मन्त्रसिद्धिः स्याद्देवता च प्रसीदति। अथवा देवतारूपं गुरुं भक्त्या प्रतोषयेत्। पुरश्चरणहीनोपि मन्त्रसिद्धो न संशयः। एवं साधितमन्त्रस्तु काम्यकर्माण्यथाचरेत्। तत्र तन्त्रोक्तमार्गेण काम्यसिद्धिस्ततो भवेत्। कालनियमस्तु रामकल्पे उक्तः। सर्वेषां श्रुतिमूलानां नित्यनैमित्तिकात्मनाम्। कर्मणामविरोधेषु कालेषु जप उच्यते। शिवगीतायामप्युक्तम्। ब्राह्म्यं मुहूर्तमारभ्य आमध्याह्नं जपेन्मनुम्। अत ऊर्ध्वं कृते जापे विनाशो भवति ध्रुवम्। पुरश्चर्याविधावेवं सर्वकामफलेष्वपि। नित्ये नैमित्तिके वापि तपश्चर्यासु वा पुनः। सर्वदैव जपः कार्यो न दोषस्तत्र कश्चनेति। नियमस्तु क्रमदीपिकायामुक्तः। कृत्वा स्नानाद्यं कर्म देहार्चनान्तं पद्मास्थित्य प्राग्गिरि

प्र·सं· तंमन्त्रिमुख्यः। देहार्चनंनामबाह्यपूजावत्देहेपिमानसपूजेत्यर्थः। शुद्धोमौनीसन्ब्रह्मचारीनि शीजप्याच्छान्तात्मा
२० शुद्धपद्मासदाम्। कुर्वन्शुश्रूषांगोषुताभ्यःप्रयच्छन्ग्रासंभूतेषुप्रोद्वहंश्चानुकंपां। मन्त्राधिष्ठात्रींदेवतांवंदमानोदुर्गोद् स।
बोधध्वान्तभानुंगुरुंच। कुर्वन्नासीयंकर्मवर्णाश्रमस्थंमन्त्रंजप्त्वाद्भिःस्नानकालेभिषिञ्चन्। आचामन्यापस्तत्वसं
ख्यभिजप्तंभुंजानश्चान्नंसप्रजस्त्वांजनाद्यामिति। पुनरपिक्रमदीपिकायामेवोक्तम्। शाकंमूलंफलंगोस्तनभवदधि
नीभैक्ष्यमन्नंचवसक्तुम्। गौडान्नंच्वेत्यदानःक्षितिधरशिखरादौक्रमात्स्थानभेदे। एकंवैषामशक्तौगदितमिदमस्येति।
संकल्पप्रकारस्तु। अस्यप्रपञ्चसारस्यैवसत्संप्रदायसर्वस्वाभिधानेविवरणेउक्तः। सर्वेषांमन्त्रविद्यादीनांपुरणेसम श्च
येसाध्यदेवतान्तदुक्तेनविधानेनसमभ्यर्च्यतदग्रेतांदेवतांप्रतिदिवसमेवंसंख्यंजपहोमादिभिस्त्वांभजामीतिसंक
ल्पपश्चात्प्रतिदिवसमन्यूनातिरिक्तमनुष्ठानंविधायपरिपूर्णेसंकल्पेप्रागवदभ्यर्च्यपुरतःप्रांजलिःप्रागवत्प्रतिदिवसमेवंसं
ख्यंस्वामिनित्यंभजामीतिविज्ञाप्यप्रतिदिवसंजपस्तुशनैःशनैरारोहावरोहणेकुर्यात्। तत्रारंभसमयेएवंक्रियतदुत्कृत्तरो
त्तरसंख्यानुरूपेणैवप्रार्थ्यंतथाकुर्यात्। समापनसमयेतुतद्विपरीतेनप्रार्थ्यंक्रमेणह्रासयेदित्यर्थः। तत्रमन्त्रदेवताप्रका रामः
शिकोक्तप्रकारेणस्थाननियमपुरश्चरणादिविधिर्लिख्यते। तत्रपुरश्चरणंनाममन्त्रफलसिद्ध्यर्थमुपोद्घातत्वेनपूर्वसेवनंतत्र २०

श्च

स्थानादिनियम विशेषा उच्यन्ते। पर्वताग्रे नदीतीरे बिल्वमूले जलाशये। गोष्ठे देवालयेश्वत्थउद्याने तुलसीवने। पुण्यक्षे
त्रे गुरोः पार्श्वे चित्तैकाग्र्यस्थलेपि वा। पुरश्चरणकृन्मन्त्री सिद्ध्यत्येव न संशयः। क्षीराहारी फलाशी वा शाकाशी वा हविष्यभुक्।
भिक्षाशी वा भवेद्वा यकृच्छ्रचान्द्रायणादिकृत्। लवणं क्षारमाम्लञ्च गृंजनं कांस्यभोजनं। तांबूलञ्च दिवा भुक्तञ्च दुःसंवासं प्रम
त्तनां। श्रुतिस्मृतिविरोधञ्च जपं रात्रौ च वर्जयेत्। भूशय्या ब्रह्मचारित्वं मौनं चर्य्यानसूयता। नित्यं त्रिषवणस्नानं क्षुद्रकर्मवि
वर्जनम्। नित्यपूजा नित्यदानं देवतास्तुतिकीर्तनम्। नैमित्तिकार्चनञ्चैव विश्वासो गुरुदेवयोः। नैमित्तिकार्चनं संक्रान्त्यादिषु
पूजनम्। जपनिष्ठा द्वादशैते नियमास्सुमन्त्रसिद्धिदाः। नित्यं सूर्यमुपस्थाय तस्य चाभिमुखो जपेत्। देवताप्रतिमादौ वा वन्हौ वा
भ्यर्च्य तन्मुखः। अनिर्वेदस्तथा त्वग्रः शास्त्रोक्ताचारपालकः। स्नानपूजाजपध्यानहोमतर्पणतत्परः। निष्कामो देवताया
ञ्च सर्वकर्मनिवेदकः। एवमादींश्च नियमान् पुरश्चरणकृच्चरेत्। यदि ग्रामे जपेन्मन्त्री तत्र कूर्मम्। निरीक्ष्य च। सिद्ध्यर्थं तन्मु
खेति शेत्तत्कूर्माकृतिरुच्यते। कूर्मस्यांगानि चाष्टसु मुखं हस्तौ च पार्श्वकौ। पादौ पुच्छमिति प्राक्प्रशस्तं मुखमेव तु। स्वरद्वंद्व
क्रमाद्दिक्षु पूर्वादिष्वष्टसु न्यसेत्। तथा कादीन् सप्त वर्गान्न्यसेच्चैव दिशं विना। ग्रामनाद्यवर्णस्त ग्रस्तां दिशि त्त्व मौन तत्र कूर्ममु श्रि।
खं ज्ञेयमन्याङ्गानीतराणि च। मुखेन तत्फलं विद्यात्करयोरल्पकं फलम्। नैष्फल्यं पादयोर्मध्ये त्वौदासीन्यं तु पार्श्वयोः। न पवप

प्र·सं· न दुःखानि पुच्छदेशे भवन्ति च। इत्थं ज्ञात्वा कूर्मं चक्रन्त तत्कर्माणि साधयेत्। आसनस्थो जपेत्सम्यक् मन्त्रार्थेगतमानसः।
२१ कौशेयञ्चर्म वैयाघ्रं क्षौलं नैलमथापि वा। दारवन्तालपत्रं वा कांबलं दार्भमासनम्। राग्ये पृकाम्म धरणी तृणपल्लवनिर्मित
म्। वर्जयेदासनं मन्त्री दारिद्र्यव्याधिदुःखदम्। वीरं वा स्वस्तिकं वापि बध्वान्यतरदासनम्। उदङ्मुखः प्राङ्मुखो वा जपहोमादि
कञ्चरेत्। पद्मं वा मुक्तकं वापि बध्वा ध्यानादिकञ्चरेत्। एकं पादमथैकस्मिन्विन्यस्योरुणि संस्थितः। इतरस्मिंस्तथा चोरुं वीरा
सनमुदाहृतम्। जानूर्वोरन्तरे सम्यक्कृत्वा पादतले उभे। ऋजुकायः समासीनः स्वस्तिकन्तत्प्रचक्षते। सीवन्यामात्मनः पार्श्वे
गुल्फौ निक्षिप्य पादयोः। सव्ये दक्षिणगुल्फन्तु दक्षिणे दक्षिणेतरम्। एतद्वा स्वस्तिकं प्रोक्तं सव्येन्यस्येतरं करम्। अंगुष्ठौ चनिबध्ना
यात् हस्ताभ्यां व्युत्क्रमेण तु। ऊर्वोरुपरि विप्रेंद्र कृत्वा पादतले उभेः पद्मासनं भवेदेतत्सर्वेषामपि पूजितम्। मं पीड्य सीव
नीं सूक्ष्मां गुल्फेनैव तु सव्यतः। सव्यं दक्षिणगुल्फेन मुक्तासनमुदीरितम्। एवमासनयुक्तः सन् भूतशुद्धिं समाचरेत्। पृथि
व्या मेरुपृष्ठ ऋषिः सुतलं छन्दः। कूर्मो देवता। आसनार्थे विनियोगः। आसनञ्चापि देवेभ्यो ब्रह्मकर्म समारभेत्। उत्पतन्ती
ह भूतानि पृथिव्यां नागवासिनः। पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता त्वञ्च धारय मां देवि पवित्रं कुरु चासनम्। राम:
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया। ॐ ह्रीं अं अनन्तासनाय नमः। आधा २१

रशक्तिकमलासनायनमः हुं फट् दूत्यासनमन्त्रः। जपस्य मानानि यमस्त्वस्मिन्नेव शास्त्रे उपरि वैसस्वाशासीपटले वक्ष्यते।
नातिद्रुतनातिविलंबितञ्चेति। कल्पान्तरेप्युक्तम्। उच्चैर्जपोधमः प्रोक्तः उपांशुर्मध्यमः स्मृतः। उत्तमो मानसो देवि त्रिवि
धः कथ्यते जपः। अतिह्रस्वो व्याधिपीडा अतिदीर्घस्तपःक्षयः। अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवदिति। एवं मातृकामन्त्र
पुरश्चर्यां कृत्वा। तदन्ते मधुरत्रयसिक्तैस्तिलैः श्रुतं पुरश्चरणहोमं कुर्यात्। अथवा प्रत्यहं जप्त्वा जुहुयात्तद्दशांशतः। नैरन्त
र्यविधिः प्रोक्तो न दिनं प्रति लंघयेत्। दिवसातिक्रमात्पुंसो मन्त्रसिद्धिर्भवेन्न हि। यावत्संख्यं जपेदन्हि पूर्वस्मिंस्तावदेव तु।
दिनान्तरेपि प्रजपेदन्यथा सिद्धिरोधकृत्। तत्र मधुरत्रयं नाम। क्षौद्रं गुडाज्यमिश्रितं क्षौद्रं क्षीराज्यमिलितञ्चेति। पक्षविशे
षः तत्र विद्वेषविषये चेत् क्षौद्रं गुडाज्यमिश्रितमेव। शान्तिविषये चेत्प्रायेण लदेव तु। तत्र होमे अशक्तश्चेत् जपसंख्यापे
क्ष्या वेदसंख्यागुणितो ब्राह्मणैर्मन्त्रो जप्तव्यः षट्संख्यागुणितः क्षत्रियैर्जप्तव्यः अष्टसंख्यागुणितो वैश्यैर्जप्तव्यः। होमे न सा
कञ्चेत् एषां त्रयाणामपि समानैव संख्या। पुनर्वर्णानां त्रयाणां मध्ये होमे हितासंख्यौ रहितेऽपि यस्य वर्णस्य योक्तात्स्त्रीणा वि
ञ्च तद्वर्णमाश्रितस्य शूद्रस्यापि संख्या विहितेति संप्रदायः। तदुक्तञ्च क्रमदीपिकायाम्। अशक्तानां होमे निगमरसना
गेन्द्रगुणितो जपः कार्यश्चेति द्विजन्म प्रविश्यामाहुः परे। स होमश्चेदेषां समद्वहजपो होमरहिते यउक्तो वर्णानां सखलु वि
महे।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· हितस्तच्चलदृशाम्। यें वर्णमाश्रितो यः शूद्रः स च तन्न तस्मूवं विहितम्। विदधीत विधिवत् श्रद्धावान् भक्तिभावनम्रतनुरिति।
२२ तत्राक्षरपर इति द्विगुणातिक्रमेणेति शेषः। तदुक्तम्। यद्यदंगं विहीयेत तत्संख्याद्विगुणो जपः। कर्त्तव्यः स्वांगसिध्यर्थं तन्त्र दश
क्तेन भक्तितः। विप्राराधनमात्रेण व्यंगं सांगमवाप्नुयादिति। तत्र भक्तस्यैव तु शूद्रस्यापि मन्त्रे धिकारोस्तीति वर्णयन्ति।
तदुक्तं क्रमदीपिकायाम्। क्षितिसुरनृपवैश्यतुर्यजानां मुनिवनवासिगृहस्थवर्णिनां च। जपहुतयजनादिभिर्मनू
नां फलति हि कश्चन कस्यचित्कथञ्चित्। सर्वेषु वर्णेषु तथाश्रमेषु नारीषु नानाह्वयजन्मभेषु। दाता फलानामभिवाञ्छितानां
द्रागेव गोपालकमन्त्र एषः। न्यूनमप्युतकटास्तपातने कारणं भवति भक्तिरञ्जसा। तच्चतुष्टयफलाप्तये ततो भक्तिमानधि
कृतो हरौ गुरौ विति। अथ होमार्थे कुंडलक्षणविधिमस्मिन्नेव प्रपञ्चसारोक्तप्रपञ्चमे दीक्षापटले उक्तेन प्रकारेण वक्ष्ये। प्रा
गेव लक्षणयुक्तानि च मंडपेस्मिन्कुंडानि कारयतु सम्यगथो दिशासु। आखण्डलार्कसुतवारिपनाथपानां दोमोत्कटाणि
बिलसद्गुणमेखलानि। चतुरस्रमर्धशशिबिंबविलसितमथ त्रिकोणकं पद्मदलरुचिरवृत्तमिति बुवते बुधा विधिषु कुं
डलक्षणम्। विंशाङ्गिश्चतुराधिकाभिरंगुलीभिः सूत्रेणाप्यथ परिसूत्र्य भूमिभागम्। खाभिश्च प्रखनतु तावतीभिरेकांत्य क्षा गमः
चांगुलिमपि मेखलाश्च कार्याः। सप्तपूर्वकगुणान्विताः क्रमात् द्वादशाष्टचतुरंगुलोच्छ्रिताः। सर्वतोंगुलिचतुष्कविस्त २२

For Private And Personal

तामेखलाः सकलसिद्धिदा मताः। योनिस्तस्मिन्मस्यामथ दिशि चतुरस्रस्थलारभ्य नाला तन्मध्योल्लासि रंध्रोपरि परिविततां
श्वत्थपत्रानुकारा। उत्सेधायामकाभ्यां प्रकृतिविकृतिसंज्ञांगुलाष्टांगुला स्याद्विस्तृत्या द्वादशार्धांगुलिमितनमितांग्रा निविष्टेव
कुंड इति। अस्यार्थः। तत्र दीक्षाविधाने तु चतुर्दिक्षु चतुर्विधं कुंडमुक्तं तेषां मध्ये चतुरस्रकुंडं तु सार्वकामिकं तेन तस्मि
र्वे होमसाधारणं तेन तदेवं कुंडं कुर्यात्। तदुक्तं तंत्रे व दीक्षापटले। अथवा। दिशि कुंडमुत्तरस्यां प्रविदध्याच्चतुरस्र
मेकमेव। यदि तैरपि लक्षणैः समेतायद्य न दृष्टिमनोहरं च कांत्येति। तेन चतुरस्रकुंडलक्षणमेवात्र कथ्यते। प्रथमन्ता
वच्चतुर्विंशत्यंगुलप्रमाणमायामविस्तारेण तावदंगुलिप्रमाणं निम्नेन च भूमिभागं सूत्रेण परिसूत्र्य निखन्य नि
म्नीकृत्य पुनस्तस्मान्निम्नस्थलादेकांगुलतो बहिः परितः सूत्रमास्फाल्य तद्बहिस्ततो द्वादशांगुलमानेन च परितः सूत्रमा
स्फाल्य अत्रानयोरास्फालितसूत्रयोर्मध्ये चतुरंगुलविभागेन तिस्रो मेखलाः कार्याः इत्थं मेखलास्थानम्। अथ मेखलालक्षणमु
च्यते। दोःप्रमाणदीर्घेण द्वादशांगुलोत्सेधेन चतुरंगुलविस्तारेण प्रथमां मेखलां विरचय्य तस्या मेखलाया बहिः पार्श्वे अष्टांगुलो
त्सेधेन चतुरंगुलविस्तारेण द्वितीयां मेखलां तद्बहिस्तत्पार्श्वे चतुरंगुलोत्सेधविस्तारेण तृतीयां मेखलां च विरचय्य पुनस्तत्रकुं
डस्य पश्चिममेखलामध्यदेशे भूमौ प्रथममेखलामध्यदेशसंश्लिष्टं द्व्यंगुलायामविस्तारमेकांगुलोत्सेधं चतुरस्रं कृत्वा तस्य पू

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·मं· वेदेशमारभ्य ऊर्ध्वक्रमेण दण्डवद्दृजुतः द्वितीयमेखलाग्रान्तं वृत्ताकारेण ना¯लं विरचय्य तन्मध्ये मेखलायां परिस्तरणार्थं छि
२३ द्रं विधाय तस्माद्द्वितीयमेखलाग्रादारभ्य तृतीयमेखलाविस्तारस्य प्राग्भागावधि अश्वत्थपत्राकारां योनिं चतुर्विंशत्यंगुल
प्रमाणां तृतीयमेखलातो यवमात्रसमुन्नतान्तां अश्वत्थपत्राकारां मध्यतोष्टांगुलविस्तारां अग्रात् षडंगुलतः पश्चिमभागादार
भ्य उभाभ्यां पार्श्वाभ्यां क्रमेण संकोचवतीं मूलभागात् अग्रावधि क्रमेण किंचिन्निम्नस्थलां अग्रतो यवमात्रेण किंचित् कुण्ड
स्यान्तर्निविष्टामिव कुर्यात्। तत्र अश्वत्थपत्रस्य चतुर्विंशत्यंगुलप्रमाणत्वन्तु प्रथममेखलामारभ्य द्वितीयमेखलाग्रावधि ख
लु नालन्तदग्रादारभ्य खलु पत्रारंभः। तत्रैव द्वितीयमेखलातस्तृ¯तीयमेखलोच्छ्राय चतुरंगुलः खलु तेन तत्रैव पत्रस्य¯
चतुरंगुलसंख्या जाता पुनर्मेखलात्रयस्य विस्तारं प्रत्येकं चतुरंगुलप्रमाणं खलु तत्र द्वादशांगुलप्रमाणं पत्रस्य जातं संभू
य ¯षोडशांगुलप्रमाणं जातम्। पुनरष्टांगुलविस्तारञ्च संभूय ¯चतुर्विंशत्यंगुलप्रमाणा अश्वत्थपत्राकारा योनिः। अथवा प्र
थममेखलादारभ्य द्वितीयमेखलाग्रावधि पत्रस्य नालन्तदष्टांगुलिप्रमाणं खलु तत आरभ्य तृतीयमेखलाग्रावधि चतुरंगु
लप्रमाणम्। तत आरभ्य मेखलात्रयस्य विस्तारदेशं प्रत्येकं चतुरंगुलं संभूय द्वादशांगुलसंख्या जाता एतानि सर्वाण्यंगुलानि एम:
संभूय चतुर्विंशत्यंगुलानि जातानि। एवं वा चतुर्विंशत्यंगुलप्रमाणा अश्वत्थपत्राकारा योनिः। तस्मादुक्तेन प्रकारेण कुं २३

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

डस्य गर्त्तायामविस्तारोक्तः पयोनीनां प्रत्येकं चतुर्विंशत्यंगुलमानेन निर्माणं तेन सर्वं चतुर्विंशति तत्त्वात्मकमिति संप्रदा
यइति। कर्त्तुर्दक्षिणहस्तस्य मध्यमांगुलिपर्वणः मध्यस्य दीर्घमानेन मात्रांगुलिरितीरिता। यवानामष्टभिः क्लृप्तं मानांगुलमु
दीरितं। इत्थं सर्वहोमसाधारणं कुंडलक्षणमुक्तं तत्र मन्त्रदेवताप्रकाशिकायां तु होमसंख्यानुसारेण कुंडस्य हस्तपरिमा
णविशेष उक्तः। तत्प्रकारो लिख्यते कोटिहोमे अष्टहस्तं अर्धकोटिहोमे सप्तहस्तं दशलक्षहोमे षट्हस्तं पञ्चलक्षहोमे पञ्च
हस्तं एकलक्षहोमे चतुर्हस्तं अर्धलक्षे त्रिहस्तं अयुते द्विहस्तं सहस्रे एकहस्तं कुंडं कुर्यादिति केचित्। अन्यच्च क्रूरप्रयो
गे दक्षिणदिशि त्रिकोणं कुंडं कुर्यात् व्याधिमृत्युपरिहारार्थं पश्चिमदिशि वर्त्तुलं कुर्यात् उच्चाटने शोषणार्थं वायुदिग्भा
गे षट्कोणं कुंडं कुर्यात् श्रीसमृध्यै उत्तरदिशि पद्माकारं कुर्यात् ज्ञानार्थं ईशदिग्भागे अष्टकोणं कुर्यात् तत्रैकहस्तमा
नानुसारेण खलु पूर्वं कुंडस्य गर्त्तमेखलादीनां चतुर्विंशत्यंगुलमानमुक्तं तदपि हस्तमानाधिक्यानुसारेण वर्द्धनीयं।
अथ शारदातिलकोक्तप्रकारेण कुंडस्य हस्तमानमुच्यते। मुष्टिमात्रमितं कुंडं शतार्धे संप्रचक्षते। शते होमे रत्निमात्रं बाहु
मात्रं सहस्रके। द्विहस्तमयुते लक्षे चतुर्हस्तमुदीरितं। दशलक्षे षट्हस्तं कोट्यामष्टकरं स्मृते। एकहस्तमितं कुंडं एक
लक्षे विधीयते। लक्षाणां दशकं यावत्तावद्धस्तेन वर्द्धयेत्। दशहस्तमितं कुंडं कोटिहोमेपि शस्यते। सर्वसिद्धिकरं कुंडं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र॰सं॰ श्चतुरस्रमितीरितं। पुत्रप्रदं योनिकुंडं अर्द्धं धामं शुभप्रदं। शत्रुक्षयकरं त्र्यस्रं वर्तुलं शान्तिकर्मणि। छेदमारणयोः कुंडं षड
२५ स्रं पद्मसंनिभं। पुष्टिदं रोगशमनं कुंडमष्टास्रमीरितं। विप्राणां चतुरस्रं स्याद्राज्ञां वर्तुलमिष्यते। वैश्यानामर्द्धचन्द्राभं शू
द्राणां त्र्यस्रमीरितम्। चतुरस्रन्तु सर्वेषां केचिदिच्छन्ति तान्त्रिकाः। कुंडस्य रूपं जानीयात्परमं प्रकृतेर्वपुः। प्राच्यां शिरः समा
ख्यातं बाहू दक्षिणसौम्ययोः। उदरं कुंडमित्युक्तं योनिः पादौ तु पश्चिमे। नित्यनैमित्तिकं होमं स्थंडिले वा समाचरेत् हस्त
मात्रेण तत्कुर्यात् वालुकाभिः सुशोभितं। अंगुलोत्सेधसंयुक्तं चतुरस्रं समन्ततः। एवं कुण्डलक्षणान्युक्तानि। अथ होमसाम
न्यविधिं विघ्नेशकल्पोक्तप्रकारेण वक्ष्ये। विविक्ते रुचिरे रम्ये सुखासीनः समाहितः। आत्मानमात्मना ध्यात्वा जपहोमादिकाः क्रियाः।
स्वगृह्योक्तविधानेन अग्निं प्रज्वाल्य देशिकः। कुण्डे वा स्थण्डिले वापि ब्राह्मणैरथ वा स्वयं। औपासनेऽथ दिस्वार्थमितरेषां तु लौ
किके इति। त्र्यंबककल्पे। तत्र कृत्वाज्यभागान्तं सर्वमुल्लेखनादिकम्। स्वगृह्योक्तविधानेन ततो होमं समाचरेदिति। स्वगृह्योक्ते
ति आचार्यस्य कर्तुर्वा इति विकल्पः। धन्वन्तरिविधाने उक्तम्। अग्निमुखादिकमखिलं स्वचरणविहितक्रमेण कृत्वाऽग्नौ। आवा
ह्यैव घनाद्यं परिवारयुतं प्रपूज्य गंधाद्यैरिति। अस्मिन्नेव शास्त्रे प्राक् दीक्षापटले उक्तम्। तत्राद्योसद्गुमतीमतीद्रियाभांसंस्मृ राम॰
त्वा सकलजगन्मयीं च शक्तिम्। तद्योनौ मणिभवमारणेयकं वा तारेण क्षिपतु गृहोत्थमेव वाग्निम्। चित्पिङ्गल हन हन दहद २५

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हपचपचसर्वज्ञाज्ञापयस्वाहा। अनेनाऽनलं ज्वालयेत्। अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं। सुवर्णवर्णमनलं समिद्धं सर्वतोमुखम्। अनेन ज्वालितमन्त्रेणोपतिष्ठेद्धुताशनम्। ततः प्रविन्यसेद्देहे जिह्वामन्त्रैर्विभावसोः। सलिङ्ग-गुदमूर्धास्यनासानेत्रेषु च क्रमात्। सर्वाङ्गेषु च जिह्वाश्च वक्ष्यन्ते त्रिविधात्मिकाः। हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा। बहुरूपातिरिक्ता च जिह्वाः सप्तेति सात्त्विकाः। पद्मरागा सुवर्णा च तृतीया भद्रलोहिता। लोहिताख्या तथा श्वेता धूमिनी सकरालिका। राजस्यः कथिता जिह्वाः क्रमात् कल्याणरेतसः। विश्वमूर्तिः स्फुलिंगिन्यो धूम्रवर्णा मनोजवा। लोहिता च करालाख्या काली तामस जिह्विकाः। अनलेरार्थे विइन्ताः। सादियान्ता सरान्विताः। सात्त्विका दिव्यपूजासु राजसाः काम्यकर्मसु। तामसाः क्रूरकार्येषु प्रयोक्तव्या विपश्चिता। सुराः सपितृगंधर्वा यक्षा नागाः पिशाचकाः। राक्षसाश्च क्रमादग्नेराश्रिता रसनास्वमी। जिह्वासु त्रिदशादीनां न तत्कार्यसमाप्तये। जुहुयाद्वाञ्छितां सिद्धिं दद्युस्ता देवतामताः स्वनामसदृशाकाराः प्रायो जिह्वा हविर्भुजः। तत्रानलेराघींषादेरयमर्थः। अनल इति रेफः। ईर् इति यकारः। अघीं न्यूकारः षष्ठस्वरः बिंदुरिति अनुस्वारः प्रतिलोमेन सकारादीन् यान्ते वर्णे योजयेत्। एतदुक्तं भवति। सकाररेफषष्ठस्वरबिंदूनां कूटं स्रूं मितिप्रथमः षादिष्वपि एवमेव योजयेत्। एवं सप्त जिह्वामन्त्रादौ योजयेत्। अथ श्रीविद्याकल्पसूत्रोक्तप्रकारेणाग्निजननविधिर्लिख्यते। अथ स्वेष्टमन्त्रस्य होमविधानं व्याख्यास्यामः॥

यकार

प्र·सं· चतुरस्रं कुंडमथवा हस्तायामं अंगुष्ठोन्नतं स्थंडिलं वा कृत्वा सामान्यार्घ्यमुमशोध्य सामान्यार्घ्योपशोधं नंनामपरिखपूरणं विधिः
२५ ।तेनावोक्ष्य प्राचीरुदीचीस्तिस्रः स्तिस्रो रेखा लिखित्वा तासु रेखासु ब्रह्मयमसोमरुद्रविष्णिन्द्रान् षट्तारनमः संपुटितानभ्य
र्च्य। षट्तारनमः संपुटितानिति। ऐं ह्रीं श्रीं ऐं क्लीं सौः ब्रह्मणे नमः। एवं यमादिष्वपि योजनीयम्। सहस्रार्चिषे हृदयाय न
मः। स्वस्तिपूर्णाय शिरसे स्वाहा। उत्तिष्ठपूरुषाय शिखायै वषट्। धूमव्यापिने कवचाय हुम्। सप्तजिह्वाय नेत्रत्रयाय वौषट्।
धनुर्धराय अस्त्राय फट्। इति स्वदेहे षडङ्गं विधाय। अग्निमन्त्रस्य भृगुऋषिः। गायत्री छन्दः। हुताशनो देवता। इति ऋष्यादि
कं विन्यस्य। अनेनैव षडङ्गेन कुण्डमभ्यर्च्य। तत्राष्टपत्रकोणत्रिकोणात्मकमग्निचक्रमन्तरन्तः क्रमेण विलिख्य। पीतायै।
श्वेतायै अरुणायै कृष्णायै धूम्रायै तीव्रायै स्फुलिङ्गिन्यै रुचिरायै ज्वालिन्यै नम इति त्रिकोणमध्ये वह्नेः पीठशक्तीः संपू
ज्य। तत्तमसे रजसे संसत्वाय आत्मने अन्तरात्मने ज्ञानात्मने परमात्मने नम इति तत्रैवाभ्यर्च्य। जनिष्यमाणवह्नेः पि
तरौ वागीश्वरी————वागीश्वरौ पीठे समभ्यर्च्य। तयोर्मिथुनीभावं ध्यात्वा। ह्रां वागीश्वरीवागीश्वराभ्यां नम इति ध्यात्वा
अरुणेः सूर्यकान्तात् द्विजगृहाद्वा वह्निमुत्पाद्य मृत्पात्रे ताम्रपात्रे वा। आग्नेय्यामैशान्यां नैर्ऋत्यां वा निधाय अग्निशकलं क्र राम:
व्यादांशं नैर्ऋते विसार्ज्य निरीक्षणप्रोक्षणताडनावगुंठनादिभिरग्निं विशोध्य निरीक्षणादिकं नाम हृदयमन्त्रेण निरीक्षणं शिरसे २५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मन्त्रेण प्रोक्षणं अस्त्रमन्त्रेण ताडनं कवचमन्त्रेणावगुंठनमिति विशोध्य। ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्मा
णि साधय स्वाहेति मूलाधाराद् उत्थितं वह्निं ललाटनेत्रद्वारा निर्गमय्य तं बाह्याग्नियुक्तं पातयेत्। ततोऽस्त्रेण संरक्ष्य संपूज्य ह्रौं
वौषडिति मन्त्रेण धेनुमुद्रया अमृतीकृत्य दीपकुण्डस्योपरि प्रदक्षिणं त्रिः परिभ्राम्य वागीश्वरबीजाय नमः। वागीश्वरबीजमि
दं ध्यात्वा वागीश्वरीगर्भनाड्यां वागीश्वरेण क्षिप्तं विभाव्य कुंण्डेऽग्निं निधाय नाभिदेशे समूह्य परिधानस्य संवृतिं विभाव्य शौचा
चमनार्थं तोयबिंदुं हृदयमन्त्रेण दत्वा। अग्निं प्रज्वलितं वंदे जातवेदं हुताशनम्। सुवर्णवर्णममलं समिद्धं विश्वतोमुखम्। इ
त्युपस्थाय। कवचमन्त्रेण इंधनैराच्छाद्य उत्तिष्ठ पुरुष हरितपिंगल लोहिताक्ष सर्वकर्माणि साधय स्वाहेति वह्निमुत्थाप्य चित्
पिङ्गल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहेति प्रज्वाल्य। वागीश्वरीगर्भे धृतं ध्यात्वा गर्भाग्नये नम इति गर्भस्थाऽग्निं
संपूज्य गर्भरक्षार्थमस्त्रमन्त्रेण सप्तदर्भकंकणं देव्या हस्ते बध्वा गर्भाधानं पुंसवनसीमन्तोन्नयनजननजातकर्मनामकरणान्नप्राशन
चौलोपनयनव्रतसमावर्तनविवाहकर्माणि षट्तारनमोन्तमन्त्रेण कुर्यात्। तद्विशेषो लिख्यते। ऐं ह्रीं श्रीं ऐं क्लीं सौः नम इत्यभ्य
र्च्य हृदयमन्त्रेणाहुतित्रयं तिलैः कुर्यादिति। गर्भाधानं विधाय पुंसवनार्थं तृतीये मासि षट्तारैरभ्यर्च्य शिरोमन्त्रेणाहुतित्रयं
तिलैर्दत्वा सीमन्तोन्नयननिमित्तं षष्ठे मासि षट्तारैरभ्यर्च्य शिखामन्त्रेणाहुतित्रयं तिलैर्दत्वा जननार्थं दशमे मासि षट्तारै

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शा.स. भ्यर्च्य कवचमन्त्रेणाहुतित्रयं तिलैर्दत्वा जातस्य गर्भमलापहृत्यानार्थं वह्निं दर्भाग्रैः षट्तारमन्त्रेण संप्रोक्ष्य देवीदत्तस्य दर्भ
२६ कंकणमुन्मुच्य स्वर्णबंधनादीन देव्याः कृतमिति ध्यात्वा हृदयमन्त्रेणाभ्यर्च्य सद्यः सूतकनिवृत्तये कुंडमस्त्रमन्त्रं जप्त्वांभसा
संसिच्य दर्भेणास्त्रमन्त्रेण ताडनं कृत्वा वह्निरक्षार्थं पूर्वादिमेखलासूत्तरपूर्वाग्रन्दर्भेणास्तीर्यैतेषु परिधिविष्टरान् संस्थाप्य वक्ष्माणाला
लापनोदनायाग्नेः पुष्टयेच मूलाग्रयोर्घृतसिक्तं पालाशाः पञ्चसमिधः अस्त्रमन्त्रेण हुत्वा परिधिषु ब्रह्मणे नमः। विष्णवे नमः रुद्रा
यनमः ईश्वराय नमः। इति षट्तारनमः संपुटितान् पूर्वादिपरिधिस्थान् संपूज्य विष्टरेषु पूर्वादीशानान्तमिन्द्रादीनभ्यर्च्यार्घ्या
द्युपचारान् दत्वा इति विघ्नसंघातं निवार्य ततः स्रुक्स्रुवौ याज्ञियवृक्षकृतौ वा ताम्रकृतौ वा सकुशावूर्ध्ववदनावधोमुखौ वाग्र
हीत्वा तत्र जुह्वा ऊर्ध्ववदनत्वं स्रुवस्याधोवदनत्वं चेत्यर्थः। अस्त्रमन्त्रेण संप्रोक्ष्य कवचमन्त्रेणावगुंठ्याग्नौ प्रताप्य परिभ्राम्य
कुशाग्रेण तदग्रं संमृज्य पुनः परिभ्राम्य मध्येन मध्यं संमृज्य पुनः परिभ्राम्य मूलेन मूलं संमृज्य प्रताप्य पुनः परिभ्राम्य। त
योः कुशसंमार्जितप्रदेशेषु अग्रे शिवतत्वाय नमः। मध्ये विद्यातत्वाय नमः। मूले आत्मतत्वाय नमः। इति तद्दर्भेण विन्यस्य शक्ति
रूपां स्रुचं पुरुषात्मकं स्रुवम्। भावयित्वा तद्ग्रीवायां कवचमन्त्रेण त्रिसूत्रेणावेष्ट्यात्मनः सव्यभागे कुशोपरि संस्थाप्य तद्दर्भा राम
नग्नौ प्रक्षिप्य स्रुक्स्रुवौ हृदयमन्त्रेण पूजयेत्। अथ गव्यमाज्यं दारुपात्रे मृत्पात्रे ताम्रपात्रे वा दाय। वीक्षणप्रोक्षणताडनावगुंठ २६

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नैः प्रागुक्तमन्त्रैर्विशोध्य। स्वदेहं ब्रह्ममयं विचिन्त्याज्यमादाय। कुण्डस्योर्ध्वे त्रिधा कृत्वा। आग्नेय्यामधिश्रित्य कुशाग्रेणाज्यबिं
दुमादाय। ॐ ह्रां ब्रह्मणे स्वाहेति हुत्वा। पुनर्विष्णुमयं स्वदेहं विचिन्त्याज्यमादाय सेशान्यामधिश्रित्य कुशाग्रेणाज्यबिंदुमादाय।
ॐ ह्रीं विष्णवे स्वाहेति हुत्वा। पश्चात् स्वदेहं रुद्रमयं ध्यात्वा। नाभिस्थानेऽधिश्रित्य। ॐ ह्रूं रुद्राय स्वाहेति आज्यबिंदुं कुशाग्रेण जु
हुयात्। उदग्रद्वासकुण्डनाभौ संस्थाप्य ग्रंथियुक्तपवित्रेणास्त्रमन्त्रेणोत्सूय ग्रंथिमुन्मुच्याग्नौ क्षिपेत्। हृदयमन्त्रेण दग्धदर्भो
ल्कमस्त्रमन्त्रेण घृते प्रदीप्यास्त्रमन्त्रेणाग्नौ क्षिपेत्। दीप्तेनान्येन दर्भेण कवचमन्त्रेण नीराज्याग्नौ क्षिपेत्। ततः प्रादेश — मा
त्रमध्यग्रथि कुशद्वयं प्रणवेन घृतमध्ये न्यस्य दक्षिणवामक्रमेण शुक्लपक्षकृष्णपक्षद्वयं विभाव्य पुनर्दक्षिणवाममध्यभागेषु
पिङ्गलेडासुषुम्नानाडीत्रयञ्च संभाव्य सव्यभागात् स्रुवेणाज्यमादाय। ॐ ह्रां अग्नये स्वाहेत्यग्निदक्षिणनेत्रे हुत्वा वामभागादाज्य
मादाय। ॐ ह्रां सोमाय स्वाहेति वामनेत्रे हुत्वा मध्यादाज्यमादाय। ॐ ह्रां अग्नीषोमाभ्यां स्वाहेत्यग्निमध्यनेत्रे हुत्वा। ॐ ह्रां अग्नये
स्विष्टकृते स्वाहेति शुक्लपक्षेन। ॐ ह्रां सोमाय स्वाहा। ॐ ह्रां अग्नये स्वाहा। ॐ ह्रां सोमाग्निभ्यां स्वाहा। अग्नये स्विष्टकृते स्वाहेति अ
ग्निवक्त्रे च स्वाहेति किंचिद्धुत्वा शेषमाज्यन्तद्धुत्। आज्यस्थाल्यां स्वाहेति निक्षिपेत्। कृष्णपक्षेऽप्येवमाहुतिः। वामदक्षिणमध्यनेत्रे
षु च वक्त्रे च हुत्वा आज्यस्थालीं वेदादिनाभिमन्त्र्य अस्त्रमन्त्रेण संरक्ष्य कवचमन्त्रेणावगुंठयेत् तन्मूलमन्त्रेण धेनुमुद्रयामृतीक

For Private And Personal

प्र॰सं॰ स्यमूलमन्त्रेणसंपूज्यासंस्कृताज्यंसंस्कृताज्यंकिंचिद्विसृज्यसंशोधयेत्।अथनामकरणार्थंषट्तारैरभ्यर्च्यास्त्रमन्त्रेणानिलेराहु
२० तिन्त्रयंदत्वान्नप्राशनमप्येवंस्वौलोपनयनव्रतसमावर्त्तनविवाहकर्मणांषट्तारैः।पृथकुपृथगभ्यर्च्यषट्तारपूर्वैकैस्त
त्तन्मूलमन्त्रैःपृथक्पृथकनिलैःसप्ताहुतीर्जुहुयात्।एवंगर्भाधानादिद्वादशसंस्कारैरग्निमुपचर्यहृदयमन्त्रेणवागीशांव
भ्यर्च्यविसृज्य।त्रिनयनमरुणाभांबद्धमौलींसुशुक्लांशुकमरुणमनेकाकल्पमंभोजसंस्थम्।अभिमतवरशक्तिस्वस्तिकाभी
तिहस्तंरमतकनकमालालंकृतांसंकृशानुमितिध्यात्वापूर्वोक्ताग्निचक्राष्टकोणेजातवेदसेसप्तजिह्वायहव्यवाहनाय।अ
श्वोदरजायवैश्वानरायकौमारतेजसेविश्वमुखायदेवमुखायनमः।इत्यभ्यर्च्यषट्कोणेपूर्वोक्तानिषडंगान्यभ्यर्च्य।त्रिकोणे
अग्निंपूजयित्वा।उत्तिष्ठपुरुषहरिपिंगललोहिताक्षदेहिमेददापयस्वाहा।इत्यनेनाग्निमन्त्रेणअग्निंसंपूज्यहिरण्यायैकनका
यैरक्तायैकृष्णायैसुप्रभायैअतिरक्तायै।बहुरूपायैनमइत्यग्नेःसप्तजिह्वामन्त्रैराज्येनपृथक्पृथक्सप्ताहुतीर्जुहुयात्।ग
र्भाधानादिसंस्कारपूरणार्थंवौषडन्ताग्निमूलमन्त्रेणपूर्णाहुतिंकुर्यात्।तत्रघासर्पिषास्रुचमापूर्य्यपुष्करोपर्यधोमुखम्स्रु
वंनिधायपुष्करोपरिस्रुचउपरिइत्यर्थः।तदग्रेपुष्पमारोप्यवामदक्षिणहस्ताभ्यांशंखवत्सक्ताभ्यांपुरस्सव्येनलग्नौना राम:
भौस्रुक्स्रुवावादायसमःपादःसमस्थायऊर्ध्वकायोनाभ्यान्तिर्यग्विधायस्रुगग्रदत्तदृष्टिःवौषडन्तमूलमुच्चरन्।वामस्त २०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नान्तंसुचमानीयपयवप्रमाण धारयासमस्तमाज्यंवन्हौसिपेत् इति पूर्णाहुतिः। वैश्वानरोत्तिष्ठचित्पिङ्गल हन दन दह दहप
चपचसर्वंज्ञाज्ञापयस्वा देति आहुतित्रयंविधायबहुरूपायांजिह्वायामिष्टदेवतामावाह्यावरणैः सहसमर्चयेत्। अथाग्नि
साध्यदेवतयोरैक्यभावनाप्रकारः। अग्नेत्वमेश्वरस्तेजः पावनंपरमंयतः। तस्मात्वदीयहृत्पद्मेसंस्थाप्यतर्पयाम्यहम्। इत्यग्निंसं
प्रार्थ्यअग्नेर्विग्रहमध्यनाड्यांस्वयंप्रविश्यतदीयहृत्पद्मेस्वेष्टं देवतामावाह्य। तत्रभास्वरंदेवंसावरणमभ्यर्च्यतन्मूलमन्त्र
मुच्चार्यवन्हिस्थदेवतांनासाविनिर्गतांज्योतिरूपशिखामग्नौलीनांरश्मिमात्राविप्रयोगेनाविच्छिन्नामुभयत्रकृतास्पदांएकेने
वात्मनाध्यायेत्। एवंकुण्डयागाग्न्यात्मनामैक्यम् भावयेत्। एवंअग्निजननंकृत्वाअस्मिन्नग्नौपीठावरणार्चनादिपूर्वकंहोमं
कुर्यात्। अथमहालक्ष्मीत्न्कोशेप्रोक्तहोमसामान्यविधिर्लिख्यते। कुण्डस्यमध्यमेभागेहुतभुग्वर्त्ततेपुनः। अग्निरूपमहंव
क्ष्येसिध्यर्थंसर्वकर्मणाम्। यतोयस्मिन्नविज्ञातेहोमोभवतिनिष्फलः। हिरण्याकनकारक्ताकृष्णाचैवतुसुप्रभा। अतिरक्ताबहुरू
पाजिह्वाःसप्तप्रकीर्त्तिताः। हिरण्यावारुणेजिह्वावायव्येकनकातथा। रक्ताचोत्तरजिह्वातुकृष्णायाम्यदिशिस्थिता। सुप्रभापूर्व
जिह्वास्यादतिरक्तानलेस्थिता। बहुरूपातुनैरृत्याजिह्वास्थानंप्रकीर्त्तितम्। जिह्वाभेदंवदंत्यन्येमरणुवक्ष्येविधानतः। कुंड
स्यपूर्वदिग्भागेकालीजिह्वाप्रकीर्त्तिता। आग्नेयान्तुकरालीस्याद्दक्षिणेतुमनोजवा। सुलोहितनैरृत्यांधूम्रवर्णातुवारु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. णे। स्फुलिङ्गिनी तु या पश्चे सौम्ये विश्वरुचिः स्मृता। कल्यांकराल्यां जिह्वायां शान्तिकं पौष्टिकं भवेत्। मनोजवायां जिह्वायां अभि
२८ चारो विधीयते। भूतप्रेतपिशाचादिशान्तिर्लोहितजिह्वके। जुहुयाद्धूम्रवर्णायां दृष्टिकामो विधीयते। स्फुलिङ्गिन्यां तु जिह्वाया
न्तस्यामुच्चाटनं विदुः। या तु विश्वरुचिर्जिह्वा कुण्डस्योत्तरभागतः। सर्वार्थसाधिनी जिह्वा लक्ष्मीस्तत्र प्रतिष्ठितां। एवं ज्ञात्वा तु जु
हुयात तत्कार्यानुरूपतः। अथ तन्त्रसमुच्चयोक्तप्रकारेणापि होमसामान्यविधिर्मूलग्रन्थैर्विना केवलमर्थतो लिख्यते। प्रथ
मन्त्रावदाज्यभागान्तं कृत्वा इष्टात्मा गेववागं ध पुष्पाभ्यामभ्याराधनमभितः पर्युक्षण पूर्वं कृत्वा पीठपूजावाहनावरणपू
जां निवेद्यपर्यन्तां कृत्वा निवेद्यस्थाने होमं समाचरेत्। प्रथमं प्रणवव्याहृतिपूर्वकं पीठमन्त्रैः सकृत् आज्याहुतिं कृत्वा आवा
हनस्थाने मूलेन चतुर्वारमाज्यं हुत्वा। अकारउकारमकारैर्विंदुसैस्त्रिभिर्हुत्वा। प्रणवेन च हुत्वा जितन्त इत्यादितत्तदुप
चारमन्त्रैर्हुत्वा ततन्मूलेन चतुर्वारं हुत्वा षडङ्गमन्त्रैर्हुत्वा। तत न्मन्त्रवर्णैर्हुत्वा किरीटादिभिर्भूषणैर्ध्वजटादिभिर्वा तत्र तन्त्रो
क्तायुधैश्च हुत्वा पुनरंगाद्यावरणे निर्माल्यधार्यवसाने च हुत्वा आज्येन चतुर्गृहीतपूर्वकमुत्थाय पूर्णाहुतिं मूलमन्त्रेण
वौषडन्तेन हुत्वा। तत्र तन्त्रोक्तद्रव्यहोमं समाचरेत्। तत्रापि द्रव्यान्तरारंभे च मन्त्रान्तरारंभे च पूर्णाहुतिं कुर्यात्। पुनर्होमाव राम:
साने मूलेन चतुर्वारं प्रसन्नपूजार्थमाज्यं हुत्वा वक्ष्यमाणब्रह्मार्पणमन्त्रेण चाज्यं हुत्वा। व्याहृतिप्रणवेन च हुत्वा संस्रावं क २८

For Private And Personal

त्वा होमं समापयेत्। पुनरग्नौ प्रसन्नपूजनं कृत्वा। अग्न्यलंकरणादिकं कृत्वा साध्यमाहूयते नाग्निसमर्चनादिकं कारयित्वा। तस्य
मूर्ध्नि मूलमन्त्रं जप्त्वा। तस्माद्दक्षिणां गृहीत्वा अग्निं विसृजेत्। अथ होमद्रव्यपरिमाणं शारदातिलकोक्तप्रकारेण लिख्यते। अथा
त्र होमद्रव्याणां प्रमाणन्तु विधीयते। कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतम्। कर्षं षोडशमाषैर्मितं तद्द्विगुणं शुक्तिः। उक्तानि पञ्च
गव्यानि तत्समानि मनीषिभिः। तत्समं मधु दुग्धान्नमसमात्रमुदाहृतम्। अक्षमात्रं कर्षद्वयमानं। दधि प्रसृतिमात्रं स्याल्लाजास्तु
मुष्टिसंमिताः। पलद्वयं प्रसृतिः। पृथुकास्तत्प्रमाणास्युः सक्तवोपि तथोदिताः। गुडं पलार्द्धमानं स्याच्छर्करापि तथा स्मृता। ग्रासार्द्ध
न्नमानं स्यादिक्षुः पर्वावधिः स्मृतः। एकैकं पत्रपुष्पाणि तथापूपानि कल्पयेत्। कदलीफलनारङ्गफलान्येकैकशो विदुः। मा
तुलिङ्गं चतुःखण्डं पनसं दशधा कृतं। अष्टधा नालिकेराणि खण्डितानि विदुर्बुधाः। त्रिधा कृतं फलं बैल्वं कपित्थं खण्डितं द्विधा।
उर्वारुकफलं होमे चोदितं खण्डितं त्रिधा। फलान्यन्यान्यखण्डानि समिधस्तु दशाङ्गुलाः। दूर्वात्रयं समुद्दिष्टं गुडूची चतुरङ्गुला व्रीह
यो मुष्टिमानास्युर्मुद्गमाषयवा अपि। तंदुलास्युस्तदर्धांशाः कोद्रवा मुष्टिसंमिताः। गोधूमा रक्तकलमा विहिता मुष्टिमानतः। तिला
श्चुलुकमात्राः स्युः सर्षपास्तत्प्रमाणकाः। शुक्तिप्रमाणं लवणं मरीच्यान्यपि विंशतिः। पुरं बदरमात्रं स्याद्रामठं तत्समं विदुः। च
न्दनागरुकर्पूरकस्तूरिकुंकुमानि च। तिंतिणीबीजमानानि समुद्दिष्टानि देशिकैः। वैश्वानरं स्थितं ध्यायेत्समिद्धोमेषु देशिकः।

म. शायानमात्स्यतोमेषुनिषण्णंशेपवस्त्रकेषु।आस्यान्तर्जुहुयाद्वन्हेर्विषश्चित्सर्वकर्मसु।कर्णहोमेभवेद्याधिर्नेत्रेंधत्वमुदीरितम्।ना
२९ सिकायांमनःपीडामस्तकेधनसंक्षयः।काष्ठानिकर्णधूमस्तनासिकांगारकादृशः।भस्ममूर्धामुखंज्वालाविज्ञेयापवतत्रच।
स्वर्णसिंदूरबालार्ककुंकुमक्षौद्रसंन्निभाः।सुवर्णरेतसोवर्णाःशोभनाः परिकीर्तिताः।भेरीवारिदहस्तींद्रध्वनिर्वन्हे शुभावहः।
नागचंपकपुंन्नागपाटलीयूथिकानिभः।पद्मेंदीवरकल्हारसर्पिर्गुग्गुलसन्निभः।पावकस्यशुभोगंधः इत्युक्तंतन्त्रवेदिभिः
प्रदक्षिणास्यक्तकयाच्छत्राभाः शिखिनःशिखाः।शुभभायजमानस्यराष्ट्रस्यापिविशेषतः।ऽऽदंदुष्टवलोधूमोवन्हेःप्रोक्तः शुभा
वहः।कृस्नःकृस्नगतेर्वर्णोयजमानंविनाशयेत्।भ्यतोराष्ट्रंनिंहत्याशुवायसस्वरसन्निभः।स्व. त्रसमोवन्हेर्ध्वनिःस वंवि
नाशकृत्।पूतिगंधोहुतभुजोहोत्ट दुःखप्रदोभवेत्।छिन्नवर्तार्चिस्त्वाकुर्यान्मृत्युंधनपरिक्षयम्।शुक्लपक्षनिभोधूमः पाराव
तसमप्रभः हानिंतुरंगजातीनांगवांचकुरुतेचिरात्।एवंविधेषुदोषेषुप्रायश्चित्तानिदेशिकः।मूलेनाज्येनजुहुयात्पञ्चविंश
तिमाहुतेः।अथास्यामात्रकासरस्वत्याः पूजार्थंयन्त्रंवक्ष्ये।सर्वाश्चदेवतायन्त्रेस्वतुसंपूज्याःतदुक्तंरामकल्पेय.त्रेमन्त्रयंप्रो
क्तंमन्त्रात्मादेवतेरिता।पुराभगवताप्युक्तंतन्त्रेसंमोहनाह्वये।देहात्मनोर्यथाभेदोयंत्रदेवतयोस्तथा।तस्मात्पीठेमह. यन्त्रं राम:
लिखित्वातत्रपूजयेत्।विनायन्त्रेणचेत्पूजादेवतानप्रसीदति।क्रमदीपिकायामप्येवमेवोक्तम्।शालग्रामेमणौयन्त्रेस्थंडिले २९

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रतिमासु वा। नित्यं पूजा हरेः कार्या न तु केवलभूतल इति। तस्याद्य यन्त्रप्रकारो लिख्यते। ओमाविःस चतुर्दशस्वरविसर्गार्णस्फुर।
त्कर्णिकं किंजल्कालिखितस्वरं प्रतिदलप्रारब्धवर्गाष्टकं। स्माबिंबेन च सप्तमार्णवयुजा श्रीशांसु संवेष्टितं वर्णाब्जं शिरसि स्मृतं वि
षगदप्रध्वंसिमृत्युंजयम्। अस्यार्थः। प्रथमम् अष्टदलं पद्मं विलिख्य तन्मध्ये कर्णिकायां हकारं चतुर्दशस्वरोख्य औकारविसर्गाणी
कूटं ह्रैं इत्येतद्विलिख्य तन्मध्ये साध्यनामयन्त्र्या घादीन् उपरि विंशत्यष्टलेख्यं वक्ष्यमाणविधाने प्रसंगाद्दृश्यमाणे तत्क्रमेण
लिविख्य पुनस्तस्मात्कर्णिकावृत्तात् बहिरष्टसु दिक्षु एकैकस्यां दिशि तिर्यग्रेखाद्वंद्व ऊर्ध्वरेखारूपेण विलिखेत्। एवं विलिखिते
षोडशरेखासंख्या भवति तत्र द्वयोर्द्वयोरेखयोस्तिर्यक्रूपेण विलिखितयोरन्तरालं किंजल्ककेसरादिसंज्ञं भवति। सर्वयन्त्रेपि
केशरस्थानमिदमेव तत्र चतुर्दलपक्षेपि षोडशादिदलपक्षेपि अष्टदलपक्षोक्तरीत्या तत्तद्दलसंख्याद्वैगुण्येन केशरस्थानसंख्या
पि त्र्ह्नीया इत्येव विशेषः एवं किंजल्कस्थानं संपाद्य तेष्वष्टसु किंजल्कस्थानेषु षोडशस्वरवर्णान् सबिंदुकान् एकैकस्मिं स्थाने द्वौ
द्वौ विलिखेत्। एवं सर्वत्र केसरस्थाने स्वराक्षरलेखनविषये न्यायः। पुनरष्टसु दलेषु क्रमेण कवर्गं प्राग्दले विलिख्य तदनन्तरद
लमारभ्य क्रमेण चवर्गं टवर्गं तवर्गं पवर्गं यादिचतुष्टयं शादिचतुष्टयं लादिद्वयं च एतानि सबिंदुकान्यालिखेत्। सर्वयन्त्रवि
षयेपि दलेषु वा केसरेषु कादिवर्गाक्षरलेखनविधौ सबिंदूनेव वर्गान् विलिखेत्। यत्र यत्र केसरे कादिवर्गा लेखनीया भवन्ति

For Private And Personal

प्र·मं· तत्रसर्वत्रप्रायेणयथास्थानंविभज्याक्षराणिविलिखेत्। अवशिष्टाक्षराणिमालिखेत्। उपरिवक्ष्यमाणयोर्यन्त्रेतुअवशिष्टाक्षरा
३० णिचविलिखेत्। एवंसर्वत्रयन्त्रन्यायः। पुनरस्मिन्नेवप्रकृतेमातृकायन्त्रेपक्षविशेषोस्तितत्रषष्ठसप्तमयोर्दलयोर्यादिपञ्चकं
च्चालिख्य अष्टमेदले प्रथमतृतीयपञ्चमपञ्चदशषोडशस्वराक्षराणिपञ्चविलिखेत्। इत्येकेषामाचार्याणांपक्षः पुनर्वह्नि
श्चतुरस्रंसमूलाग्रंविलिखेत्। तत्रतुयत्रयत्रचतुरस्रलेखनविधिः तत्रसर्वत्रानुक्तेपिसमूलाग्रमेवचतुरस्रंविलिखेत्। एवमत्र
चतुरस्रंविलिख्यतस्यपूर्वादिदिक्चतुष्टयेवमिति। आग्नेयादिकोणचतुष्टये ठंकारं उभावप्येवंसबिंदुकौविलिखेत्। एवमक्षर
रूपमंबुजंसाध्यशिरसिस्थितमुक्तफलदंस्यादिति। अस्मिन्यन्त्रेपीठार्चनंकुर्यात्॥ अथसकलदेवतासमर्चनसाधारणपीठपू
जाविधानमुच्यते॥ गुंगुरुभ्योनमः गंगणपतयेनमः इतिपीठस्यदक्षिणवामयोःसमभ्यर्च्यआधारशक्तयेमूलप्रकृत्यै। आ
दिकूर्माय अनन्ताय पृथिव्यै क्षीरसमुद्राय श्वेतद्वीपाय रत्नमंडपाय कल्पवृक्षाय श्वेतछत्राय ——। सितचामराभ्यांरत्न
सिंहासनाय इत्यन्तैराधारशक्त्यादिभिरत्नसिंहासनान्तैर्मन्त्रैः नमोन्तैः सर्वाधस्तादारभ्यउपर्युपरिक्रमेणपीठमध्येसमर्चयेत्।
तत्रवैष्णवपीठविषयेचेत् क्षीरसमुद्रस्थानेइक्षुसमुद्रायेतियोजयेत्। शैवादिविषयेतदुभयमपिनास्तिपुनरपिकेवलंवरुण राम:
चविषयेश्वेतद्वीपायेतितत्राप्यैश्वर्यप्रधानविषयेरत्नद्वीपायेतियोजयेत्। शैवादिविषयेकैलासगिरयेइतियोजयेत्। पुन ३०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रपि केवलशैवादौ कल्पवशादयश्च न संन्ति। तत्राप्यैश्वर्य्यप्रधानविषये चैवं यथायोग्यं योजनीयाः इतरत्। सर्वं देवतापीठार्च्च
नेपि तुल्यमेव। पुनः धर्माय नमः। ज्ञानाय नमः। वैराग्याय नमः। ऐश्वर्य्याय नमः। एतान् पीठपादरूपान् पीठस्याग्नेयादि को
णेषु समर्च्चयेत्। तत्र कल्पान्तरमते। धर्मकंदाय। ज्ञाननालाय वैराग्यकर्णिकायै ऐश्वर्य्यदलेभ्यो। नम इति। अस्मिन्मते उप
र्य्युपरि कंदादीन् यथोचितस्थानेषु समर्च्चयेत्। पुनः अधर्माय अज्ञानाय अवैराग्याय अनैश्वर्य्याय एतान्पीठस्य फलकारू
पान् प्रागादिदिक्षु समर्चयेत्। सं सत्वाय रं रजसे तं तमसे मं मायायै विं विद्यायै अं अनन्ताय पं पद्माय अं सूर्यमण्डलाय उं सोममंड
लाय मं वन्हिमण्डलाय अं आत्मने उं अन्तरात्मने मं परमात्मने। ॐ ह्रीं ज्ञानात्मने नमः। सं सत्वायेत्यादौ ज्ञानात्मने नमः। इत्य
न्तैः आस्तरणरूपैर्मन्त्रैः पीठमध्ये समर्च्चयेत् तत्र वैष्णवपूजायामनन्तः। तत्र पुनर्मध्ये अष्टदलं पद्मं विचिन्त्य प्रागादि दले
षु कर्णिकायाञ्च नव शक्तयश्च आसनमन्त्रदेवताश्च समर्चनीयाः। क्वचित्क्वचित्। आसनमन्त्रो नास्ति तत्र सर्वत्र केवल पद्मे
समर्चयेत्। इतरपीठमन्त्राः। सर्वत्र समाना एव। अयमेव सर्वदेवताविषये पीठार्चनन्यायः। तत्र तु नव शक्त्यासनमन्त्राणा
मेव सर्वत्र विशेषः। इतरत्सर्वं सकलदेवतापूजाविषये पि तुल्यमेव तत्र तु यैष्णवपीठे समर्च्चयेदित्युक्ते तन्त्र वक्ष्यमाणासन
मन्त्रा एव विवक्षिताः। तथा दौर्गे वैनायके सौरादौ सारस्वते च। अथ पुनरक्रमात्तत्कायानव शक्तय उच्यन्ते। मेधायै। प्रज्ञा

प्र·सं· ये।प्रभायै।विद्यायै·धियै·धृत्यै·स्मृत्यै·बुध्यै·विद्येश्वर्यै· इति नवशक्तयः॥ ॐ ह्रीं वर्णात्माय सरस्वत्या। सनायनम इति पी
३१ ठमन्त्रः।एतास्तु अष्टसु केसरेषु अष्टौ शक्तयः।नवमी तु कर्णिकायां देवतास्थाने एवमेवसर्वत्र नवशक्तिस्थानानि आसन
मन्त्रश्च कर्णिकायामेव इत्थं पीठं संपूज्य अस्मिन्मातृकासरस्वतीं मूलमन्त्रेण समावाह्य आवरणैः।सहममर्च्चयेत्। प्रथमं मा
तृकाषडंगैः। प्रथमावरणे केसरेषु समर्चयेत्। तत्रकारस्तु तत्रतत्रांगान्यासे उक्तं मन्त्रमुच्चार्य हृदयाय नमः। शिरसे नमः। शिखा
यै नमः। कवचाय नमः। नेत्राभ्यां नमः। अस्त्राय नमः। इत्येवं प्रकारेण चतुर्थ्यन्तेन समर्चयेत्। सर्वत्रांगार्च्चनाविधावेवमेव न्या
सः। तत्र हृदयादिचतुष्टयमाग्नेयादिचतुष्टय ———— केसरेषु पुरतो नेत्रञ्चतुरपु दिस्वस्त्रं समर्च्चयेत्। क्वचि
त्क्वचिदन्यथा पूर्वादिदिक्षु हृदयादि विदिक्ष्वस्त्रं यथा वाराह्यादिविधाने तन्त्रसमुच्चये तु शैवे आग्नेयैशान्यनैर्ऋत्यादिषु
हृदयादिचैवस्त्रे प्रागादिति विशेष उक्तः। अङ्गावृतौ सर्वत्रैवमेव स्थाननियमः। तदुक्तं स्वास्मिन्नेव प्रपञ्चसारे प्राक् दीक्षा
पटले हृदयाद्यस्त्रपुरतो नयनं दिशांक मात्। पुनरस्त्रं च समर्चयेत्। क्रमादिति पुनरेतासामंगदेवतानां रोचीष्युच्य
न्ते। हारस्फटिककल्यायांजनपिंगलवन्हिरोचिषो ललनाः अभयवरोद्यतहस्ताः प्रधानतनवोंगदेवताः कथिता इति क्रम रामः
दीपिकायामप्येवमेवोक्तं नेत्रोरूपास्त्र हृदि रंगानि च केसरेषु समभियजेत। हुतवहनिर्ऋतिसमीरणशिवदिक्षु हृदादिवर्म ३१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पर्य्यन्तम्। पूर्वादिदिक्षयास्तं क्रमेणागधादिभिः सुसुद्धमनाः। मुक्तदुकान्तकुवलयदद्दरिनीलद्रुताशनप्रभाः प्रमदाः अभय
वरस्फुरितकराः प्रसन्नमुख्योंगदेवताः स्माय्यी इति तत्र तेजोरूपा इत्यस्य पदस्य ..र्वत्रान्वयः। तत्र पूर्वादिकुनियम उच्यते पू
ज्य पूजकयोर्मध्यं पूर्वमित्यभिधीयते। प्राद्दक्षिण्ये नवि ज्ञेया प्राच्याग्नेयादिकल्पना। यत्र भास्वानुदयं प्रयाति प्राचीमिमां वेद
विदो वदन्ति। मध्ये तथा पूजकपूज्ययोश्च सदागमज्ञाः प्रवदन्ति तान्तु। इन्द्रादीनामपि कल्पि.. दिक्क्रमेणैव पूजाक्रमः। नतु
यथास्थितदिक्क्रमेण पुनः। अं कं खं गं घं ङं आं नमः इं चं छं जं झं ञं ईं नमः उं टं ठं डं ढं णं ऊं नमः ऋं तं थं दं धं नं ॠं नमः लृं पं फं बं भं
मं लॄं नमः एं यं रं लं वं ऐं नमः ओं शं षं सं हं औं नमः अं लं क्षं अः नमः एतेन सानुस्वार द्वंद्वपुटितेन वर्गाष्टकेण द्वितीया वृतिः पुनः। ब्र
ह्माण्यै माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै इन्द्राण्यै चामुण्डायै एताभिस्तृतीया वृतिः तत्र मातरः सप्तसंख्याकाः किल पूजावि
धौ नुभर्तत्राष्टसंख्याकाः दस्मादत्राष्टमस्थाने महालक्ष्मीं पूजयेत्। महालक्ष्म्यै नमः इति क्वचिदन्ययासोपादिविषये अरुणाय
नमः इत्यष्टमस्थाने दुर्गाविषये च तत् चंडिकायै नमः इत्यष्टमी अन्यत्र सर्वत्राष्टमी तु महालक्ष्मीः तदुक्तं ग्रन्थास्मिन्नेव प्रबंधे। ब्रह्मा
णी माहेशी कौमारी वैष्णवी च वाराही। इन्द्राणी चामुंडा समहालक्ष्मीः रे ताश्च मातरः प्रोक्त इति। सर्वत्र मातृणामष्टसंख्याकत्वं प्रा
गुक्त ग्रन्थास्मिन्नेव शास्त्रे त्रिगुणात्मिकायाः शक्तेः सकाशात्सर्वस्य जगत उत्पत्ति कथन प्रकरणे यदाष्टधा सा गुणिता तदा प्रकृति भे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· दिनी। अष्टासरादि वस्त्वाशामातृमूर्त्यादिभेदिनी इत्यष्टसंख्याकानां प्रकृत्यष्टाक्षरादीनां मध्ये मातृणां परिगणितत्वात्। तत्र मातृणां
३२ वर्णादि यथोच्यन्ते ताश्च श्वेतास्ववलयपुस्तकधारिण्यः ब्रह्माणी कनकवर्णा अक्षसूत्रकमंडलुवराभयधरा शूलपमुदुंदुमिकपाल
धरा माहेश्वरी अंकुशदण्डखट्वांगपाशधरा कौमारी चक्रघंटाकपालशंखधरा वैष्णवी मुसलखड्गखेटाभयधरा वाराही अंकुशतो
मरपाशकुलिशधरा इन्द्राणी शूलकपालनरशिरःकृपाणधरा चामुंडा रक्ता सस्त्वीजापूरकपालपंकजधरा महालक्ष्मीः पुनर्व्यापि
न्यादिभिश्चतुर्थ्यावृत्तिः व्यापिन्यैः पालिन्यैः चापिन्यैः क्लेदिन्यैः धारिण्यैः मालिन्यैः हंसिन्यैः शांत्यै इत्येतास्त्वकल्पयुग्मराम्भाष्टवर्गा
नीति मूलग्रंथस्य चशब्देन चतुर्थावरणत्वेन सूचिता इति विवरणकारैरुक्तं पुनरिंद्रादिभिः पंचमी इन्द्राय सुराधिपतये कुलिशधरा
यैरावतवाहनाय सरस्वतीपार्षदाय नम इति पूर्वदिशि उक्तविशेषणैः सहेंद्रं समर्चयेत्। पुनः अग्नये तेजोधिपतये शक्तिधराय
मेषवाहनाय सरस्वतीपार्षदाय नमः। यमाय प्रेताधिपतये दंडधराय महिषवाहनाय सरस्वतीपार्षदाय नमः। निर्ऋतये रक्षोधिपत
ये खड्गधराय प्रेतवाहनाय सरस्वतीपार्षदाय नमः। वरुणाय जलाधिपतये पाशधराय नक्रवाहनाय सरस्वतीपार्षदाय नमः। वाय
वे प्राणाधिपतये अंकुशधराय हरिणवाहनाय सरस्वतीपार्षदाय नमः। सोमाय नक्षत्राधिपतये गदाधराय शशवाहनाय सरस्वतीपा रामः
र्षदाय नमः। ईशानाय विद्याधिपतये त्रिशूलधराय वृषभवाहनाय सरस्वतीपार्षदाय नमः। अनन्ताय नागाधिपतये चक्रधराय कू ३२

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्मवाहनाय सरस्वतीपार्षदाय नमः। ब्रह्मणे लोकाधिपतये पद्मधराय हंसवाहनाय सरस्वतीपार्षदाय नमः। एतानींद्रादीन् मूल
मादित तद्बीजपुरस्सरं उक्तविशेषणैः। सहैव सर्वत्र प्रागादिषु दुर्ध्वान्तादिषु दिक्षु समर्चयेत्। यकारादयो शेषवर्णाः वाय्वग्नीद्रवरु
णेश्वरराक्षसेंदुप्रेतेशवीजानि भुवनेशीपाशवीजे च नलह्बीजयोगस्तु विवरणकारैरुक्तः। तदुक्तं त्वास्मिन्नेव कल्पे। इंद्राग्नीय
मनिशान्द्वरवरुणानिलशशिशिवाहिपतिविधयः। जात्याधिपहेतिवाहनपरिवारान्ताः। क्रमेणयष्टव्या इति तत्र कैचित्कश्चिदनं
न्तान्तालोकपालाः। अस्मिन् शास्त्रेतु अहिपतिविधय इतिविध्यन्तत्वेनोक्ताः। क्रमदीपिकायामप्येवमेवोक्तम्। हरिहव्यवाट्त
रणिजक्षपाट्वाक्पतिवायुसोमशिवशेषपद्मजान्। प्रयजेत्स्वदिक्ष्वमलधीरिति तत्रतु सरस्वतीपूजाविषये चेत्सरस्वतीपार्ष
दायेति योजयेत्। इतरत्रतु तत्तद्देवतापार्षदत्वेन योजयेदिति विशेषः। पुनरेतेषामिंद्रादीनां रोचींष्युच्यन्ते॥ पीतःपिङ्गः कृष्णोधू
म्रः श्वेतश्च धूम्रसितशुक्लाः काश्मारुणांबुजाभा लोकेशवासवादयः प्रोक्ताः एवं क्रमेण तेषां रोचींषि ध्येयानि। क्रमदीपिकायाम
प्येवमेवोक्तं कपिशाशकपिलनीलश्यामलश्वेतधूम्रामलसितशुचिरक्तवर्णो वासवाद्याः करकमलविराजत्स्वायुधादिव्यवेषा
ः विविधमणिगणस्रक्प्रस्फुरद्भूषणाढ्या इति लोकपालपूजाविधौ सर्वत्रैवमेवन्यायः। पुनस्तत्रतु यत्रयत्रावरतिविधौ इंद्रादि
भिरेवआवरणावसानमुच्यते। इंद्रादिभिस्तृतीया इंद्रादिभिः पंचमी इति पंचावरणमीरितम्। इंद्रादिभिः सप्तमी इति सप्तावरणमि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. रितम्। इत्याद्येवं प्रकारेण तत्रापि यत्र पुनः इंद्रादिभिः चतुर्थी वज्रादिभिः षष्ठी इत्येतावदेवोक्तं आवरणावसानग्रहणं च न क्रिय
१२ ते। वज्राद्यावरणग्रहणं च न क्रियते तत्रोभयत्र एते वज्राद्युपलक्षण परिषत्त्वादादिविशेषणैर्विशिष्टानामेवेंद्रादीनां समर्चितत्वा
त्। वज्रादयः न पृथगावरणैः समर्चनीयाः। यत्र पुनरिंद्रादिभिः पञ्चमी वज्रादिभिः षष्ठी इंद्रादिभिः सप्तमी वज्रादिभिरष्टमी इ
त्याद्येवं प्रकारेण वज्राद्यावृत्तिः पृथगेवोच्यते। तत्र तु सर्वत्र यद्यपि वज्राद्या वुध ऽनिविशेषणयुक्ता एवेंद्रादयः समर्चिताः तथा
पि वज्रादयस्तु पृथगावृत्तौ समर्चनीयाः। तत्प्रकार उच्यते। वज्राय· शक्त्यै· दंडाय· खड्गाय· पाशाय· अंकुशाय· गदायै· त्रिशूलाय· च
क्राय· नलिनाय· एतानींद्रादीनामस्त्राणि प्रागादिक्रमेण समर्चनीयानि तदुक्तं च्चास्मिन्नेव कल्पे वज्रं शक्तिं दंडः। खड्गः पाशां
कुशौ गदाशूलौ रथचरणनलिनसंज्ञौ प्रोक्तान्यस्त्राणि लोकपालानाम्। क्रमदीपिकायामप्येवमेवोक्तं दंभोलिशक्त्यभिधदंडरूपा
णपाशचंडांकुशाह्वयगदात्रिशिखारिपद्माः। अर्च्यावदिर्निजसुलक्षितमौलियुक्ताः स्वस्वायुध मयसमुद्यतपाणिपद्मा इति ए
तेषां गेहीष्वुच्यन्ते पीतहिमजलदतारानाचिरप्रभारक्तकुंदनीलरुचः। करवंदारुणा वर्णाः प्रोक्ताः सुवर्णतोऽपि वज्राद्याद्युतिः। क्र
मदीपिकायामुक्तम्। कनकरजततोयदाभशंखारुणहिमनीलजपाप्रवालभासः। क्रमत इति रुचानुवज्रपूर्वा रुचिरविलेपन रामः
वस्त्रमाल्यभूषा इति एते वज्रादिभिः पञ्चम्यावृत्तिः। स्वयं दिनशो मात्रकासरस्वतीं पूजयेत्। अथ सकलदेवतापूजासामान्य ३२

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्रमं वक्ष्यते तत्र पूजापञ्चविधा तदुक्तञ्च मन्त्रदेवताप्रकाशिकायाम्। अभिगमनमुपादानमिज्यास्वाध्यायो योग इति
श्रीपञ्चरात्रे पञ्चविधमभिहितम्। तत्र अभिगमनं नाम देवतास्थानमार्गस्य संमार्जनोपलेपनादि निर्माल्यनिर्हरण
करणं उपादानं नाम गंधपुष्पादिपूजासाधनसंपादनम्। इज्या नाम पीठपूजादिकप्रधानदेवतापरिवारदेवतापूजनम्। स्वा
ध्यायो नाम अर्थानुसंधानपूर्वकमन्त्रजपसूक्तस्तोत्रपाठनामकीर्तनम्। तत्त्वप्रतिपादकशास्त्राभ्यासश्च योगो नाम देवता
स्वरूपं स्वस्वरूपं देवतामूर्तिरूपं स्वस्य मूर्तिरिति भावना एवं पंचविधप्रकारपूजानां सालोक्यसामीप्यसारूप्यसार्ष्टिसायुज्य
रूपाणि पञ्चफलानि यथाक्रमं भवन्ति। इत्येतच्च पञ्चरात्रेभिहितमिति तत्र प्रथमं प्राक् अस्मिन्नेव मातृकाविधाने आदौ सामा
न्येन सकलदेवतासाधारणजपपूजारंभविधिरुक्तः। किल तेन प्रकारेण स्वासने उपविश्य सर्वगुरुगणपतिवंदनादिकं कृत्वा
पूजामारभेत्। तत्र प्रथमं तावत्सकलदेवतापूजासाधारणशंखपूरणविधिः। क्रमदीपिकोक्तप्रकारेण वक्ष्यते। आरंचय्य
भुवि गोमयांभसा स्थंडिलं निजमनुत्र विशंन्यस्य तत्र विहितास्य दोंभसा शंखमस्त्रमनुना विशोधयेत्। तत्र गंधसुमनोक्ष
तानथो निक्षिपेत् हृदयमन्त्रमुच्चरन् आपूरयेद्विमलपायसा सुधीरक्षरैः प्रतिगतैः शिरोंकितैः पीठशंखसलिलेषु मन्त्रवित् त्व
न्हिवासरनिशाकृतां क्रमात् ड लानि विषकृम्भवोसरैरर्चयेद्दहनपूर्वदीपितैः। तत्र तीर्थमनुनाभिवाहयेत्तीक्ष्णसुष्णरु
मं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



न

चिमंडलात्पुनः। स्वीयहृत्कमलतो हरिन्तथागालिनीं च शिखयाप्रदर्शयेत्। तज्जलं नयॅमन्त्रवीक्षितं वर्मणासमवगुंठय दोर्यु
ज्ञामूलमन्त्रसकलीकृतं न्यसेद्द अङ्गदैश्चकलयेद्दिशोस्त्रशः। अक्षतादियुतमंबुतीकृतं संस्पृशन्जपतु मन्त्रमष्टशः। किंच
न क्षिपतु वर्द्धनीजलेप्रोक्षयेन्निजतनुन्ततोमुना। निःक्करेणमनुनाखिलन्तथासाधनं कुसुमचंदनादिकं। शंखपूरणविधिः स
मीरितोगुप्तसषयजनाग्रणीरिह। गङ्गे च यमुने चैव गोदावरि सरस्वती। नर्मदे सिंधु कावेरि जलेस्मिन्संनिधिंकुरु। एषतीर्थमनुः
प्रोक्तो दुरितौघनिवारिणः। कनिष्ठांगुष्ठकौसक्तौ करयोरितरेतरम्। तर्ज्जनीमध्यमानामासंहता भुग्नसर्ज्जता। मुद्रैषागालिनी प्रो
क्ता शंखस्योपरिचालिता इति अरचय्य भुवि गोमयांभसास्थंडिलं निजममुत्रविष्टरं इत्यादि मुद्रैषा गालिनी प्रोक्ता शंखस्योपरि
चालिता इत्यान्तानां ग्रंथानामयमर्थः। प्रथमं निजासने उपविश्य तत्पुरतो गोमयांभसा स्थंडिलशब्दवाच्यं मंडलं विलिप्य पुन
र्य्यदैवताविषया पूजा तन्मूलमन्त्रस्य येषडंगमन्त्रा तेषामन्ते योस्त्रमन्त्रः अस्त्राय फट् इत्यन्तः तेनास्त्रमंत्रेण शंखं प्रक्षाल्य पुन
स्तस्यांगस्य हृदयस्थानोक्तेन हृदयाय नमः इत्यन्तेन मन्त्रेण शंखे गंधपुष्पाक्षतान्निक्षिप्य पुनः। मातृका वर्णं प्रतिलोममु
च्चार्य तदन्ते पूर्वोक्ताङ्गमन्त्राणां मध्ये शिरस्थाने उक्तम्। शिरसे स्वाहेत्यतं मन्त्रमुच्चारन् जलेन शंखमापूर्य पुनः विषशब्दवाच्ये 
नमकारेण वदनपदवाच्य बिंदुयुक्तेन मंवह्निमंडलाय दशकलात्मने नमः इत्येवं शंखपीठे समभ्यर्च्य पुनः ककारेण सूचितं 

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मातृकान्यासे शिरस्थाने उक्तम्। अकारन्तादपि वदनपदवाच्येन बिंदुनायुक्तं वासरकृन्मंडलपदोत्तरं च अं सूर्यमंडलाय द्वादश
कलात्मने नमः इत्येवं प्रकारेण शंखं समभ्यर्च्य पुनः अथ वः पदसूचितं मातृकान्यासे श्रोत्रस्थाने उक्तं उकारं तदपि वदनप
दवाच्यं मातृकान्यासे मुखस्थाने वृत्ताकारन्याससूचितं बिंदुतेन बिंदुनायुक्तं निशाकृन्मंडलपदोत्तरं च उं सोममंडलाय षोडश
कलात्मने नमः इत्येवं प्रकारेण शंखस्थजले समर्चयेत्। गङ्गे च यमुने चैव ______ इत्यनेन तीर्थमन्त्रेण तीर्थमादित्यमं
डलाच्छंखे समावाह्य पुनर्हृदयकमलाद्विसुञ्च साध्यमन्त्रेण तस्मिन् जले समावाह्य पुनः पूर्वोक्तांगमन्त्राणां मध्ये शिखायै व
षट् इत्यन्तेन शिखामन्त्रेण गालिनीमुद्रां तस्मिन् जले प्रदर्शयेत्। गालिनीमुद्राप्रकारस्तु कनिष्ठांगुष्ठकौ सक्तौ करयोरितरेत
रं इत्याद्युक्तप्रकारः। पुनः पूर्वोक्तांगमन्त्राणां मध्ये नेत्राभ्यां वौषट् इत्यन्तेन मन्त्रेण तज्जलं संवीक्षयेत्। तदुक्तं ईक्षणं नेत्रमन्त्रे
णान चेन्मूलेन मन्त्रवित्। पुनः पूर्वोक्ताङ्गमन्त्राणां मध्ये वर्मस्थाने उक्तेन कवचाय हुं इत्यन्तेन कवचमन्त्रेण तत्तीर्थं हस्तद्वयेन
समवगुंठ्य अधोमुखेन गृहीततर्जनीद्वयेन परितो भ्रमणमवगुंठनमुद्रा पुनस्तत्तीर्थस्य देवतात् तन्मूलमन्त्रव्यापकेन सकली
कृत्य मूलमन्त्रस्यांगैरंगन्यासं च कृत्वा। अस्त्राय फट् इत्यन्तेन दशदिग्बंधनं कुर्यात्। पुनरक्षतादियुतं अच्युतस्वरूपीकृतं तज्ज
लं स्पृशन् मूलमन्त्रमष्टवारं जपेत्। पुनस्तज्जलं किंचिदुपस्थितवर्द्धनीपात्रे क्षिपतु। अवशिष्टेन निजतनुं संप्रोक्ष्य। पुनरप्यव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नदुक्तं
प्र·सं· शिष्टेन तीर्थजलेन त्रिवारं मूलमन्त्रमुच्चरन् गंधकुसुमादीन् संप्रोक्षयेत्। एवं शंखपूरणविधिः। अर्घ्यादिपात्रनियमस्तु गौ
३५ तमीये। अर्घ्यस्य त्रीणि पात्राणि पाद्यस्यापि त्रयं भवेत्। तथैवाचमनीयानि पात्राणि च विभागशः। तथाकरणदौर्बल्यादेकमे
व प्रशस्यते। विहाय शंकरं सूर्ये मध्ये शंखः प्रशस्यते। सर्वपूजासाधारणोयम्। एवं शंखपूरणं कृत्वा पुनस्तद्वर्द्धनीपात्रस्थज
लं शंखे किंचिद्विक्षिप्य तेन जलेन प्रथममात्मपूजां कुर्यात्। आत्मस्फूर्त्यर्थं पुनरावाहनार्थं च। शिवपूजाकल्पे नारुद्रो रुद्रम
र्चयेत्। नाविष्णुर्विष्णुमर्च्चयेदिति। पुनरपि तत्रैवोक्तम्। आत्मपूजां कृत्वा हृदयकमलस्थस्यान्तर्यामिणः अभिव्यक्तिं संपाद्य
दीपाद्दीपान्तरमिव अरण्यां मथनेनाभिव्यक्तमग्निमाहवनीयादाविव हृदयकमलान् प्रतिमामावाहयेदिति। अथात्मपू
जाविधिस्तन्त्रसमुच्चयोक्तप्रकारेण लिख्यते। न्यासक्रमान्निजतनौ प्रयजेत्तपीठं हृद्वारिजन्मनि समर्च्य परं महस्तत्। आधारमंत्य
णुमहांसि निरंजनां शौरिश्च जपेत्स्त्रणवतः क्रमवित्तदैक्यम्। आयम्य वायुमणुनास कलीक्रियाञ्च कृत्वा मनाग्युपहृतीः क्रम
शः समर्च्य तारोपचारनिजमूलतदक्षराद्यैर्न्यासक्रमादभियजेज्जलगंधपूर्वैः। मूलेन गंधरसलिप्ततनुर्मुरारौ स्वैर्मूर्तिपंजर
पदेष्वणुभिर्द्विषड्भिः। भाले गले सयुगले हृदि पञ्चमन्त्रैरीशोनुलिंपतु परोष्विवमूलतोघ्र। मूलेन मूर्द्धि मनुना निखिलेन पञ्चकृत्वः राम:
किरीटामनुनाचरयांगपाणौ। स्थाण्वात्मकेन कुसुमांजलिमीश्वरे च कृत्वा यजेद्द्विविधसूनवरैरथेति। श्वेतारुणक्रमकृतोभयपा ३५

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



र्व्वयोगान्न कुर्याद्दूर्वादितुलसीकरवीरपद्मान्। नाभ्यात्मचित्स्ववधिके षडशेषमंगेशेषेषि वेकेयुगपूर्वकमेतदिष्टम्। धूपं चै
समर्प्य तस्मै नैवेद्यं बुध्या परचित्सुधाख्यम्। दत्वार्चयित्वा परितोष्य चैनं तयोगनिष्ठश्च समादधीत। इत्यात्मपूजायाः समुच्चयो
क्तौ मूलग्रंथः। अस्य विवरणमिदानीमात्माराधनमाह। न्यासक्रमादिति हृद्वारिजन्मनीति। हृत्पद्मे समर्च्य परमं महस्तदिति
प्राक्। तस्मिन्परिकल्प्य पेत्यत्र कल्पनामात्रं चेदिहापि कल्प्य नैव तत्रावाहनादिकृतश्चेदिहापि न कर्त्तव्यं नात्र विग्रहः। किं
तु तेजोरूपमेवेति परमं महस्तदिति। यदेवोक्तं मूलमन्त्रेणैव समर्च्य नन्व्याधारभांत्य ˉ णुमहां ˉ सीति। तदेवमात्रं महो मूला
धारे हृदये पुनर्भ्रूमध्ये ब्रह्मरंध्रे वा तदीयपद्मकर्णिकायां प्रणवं शेरकारादिभिस्तारपुटितैर्नमोन्तैर्विहृत्य तैरेव जलगंधा
दिभिः पूजयेत्। पीठपूजायां कृतायां मूर्तिपूजां कृत्वा तस्यामाधारत्रयमपि शक्त्यंशैर्विभाव्य पुनर्हृदि मात्रं महः पूजनीयं क्रमवि
त्पदे नैतत्सर्वमुक्तम्। प्रणतस्तदैक्यं नयेदिति प्लुतं प्रणवमुच्चरन्मूलाधारगतमहंसो हृदवधिनी वारसूकाभतयो द्गमनम्। त
दा तन्महसैकीभावः। ततश्च तदुपर्याधारवधितयोद्गमनम्। तथा च तद्गतेनैकीभावः। पुनर्द्वादशान्तावधितयोद्गमनञ्च वि
भावयेदिति भावः। पुनर्मूलमन्त्रेण त्रिवारं प्राणायामं कृत्वा देहत्रयव्याप्तिं विभाव्य व्यापककरांगायुधन्यासैः सकलीकुर्यात्। ज
लगंधपूर्वैरिति दीपान्तानां ग्रहणम्। तत्र पुष्पानन्तरं किंचित्कर्तव्यमस्तीत्याह। मूलेनेति त्रिप्रेति। मूर्द्धादि पादान्तं गंधार्द्र

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· करतलद्वयेन व्यापकाभिप्रायम्। मुरारौ स्वैर्द्विषड्भिरणुभिर्मूर्तिपंजरपदेष्वनुलिंपत्विति संबंधः द्वादशमूर्तिमन्त्राः केशव ना
३६ रायणादिमन्त्राः। तत्स्थानानि च अलिंककुक्ष्योर्हृद्गले दृत्याद्युक्तानि द्वादशार्णयोगस्त्विहापीष्यते द्वादशार्णेन वासुदेव द्वा
दशाक्षरी इत्यर्थः ऊर्ध्वपुंड्रानुलेपनं चैतत्। ईशो फाले गले सयुगले हृदि पंचमन्त्रैरनुलिंपत्विति। ईशानादिपंच ब्रह्माणीह पं
चमन्त्राः तिर्यक् त्रिपुंड्रानुलेपनञ्चैतत्। यदुक्तम्। मात्मानमभ्यर्च्य सुगंधपिष्टैरालिप्य पुंड्राणि ललाटमध्ये कंठे च चांसद्वि
तये सितेन हृदन्तरे पंचपवित्रमन्त्रैरिति। पुनर्भस्मनिक्षेपोपि कार्यः। यथोक्तं केवक्के हृदि गुह्ये च पादयोर्वदनेषु च ईशा
दिपंञ्चमन्त्रैस्तु निक्षिपेद्भस्म मन्त्रिनम्। अष्टत्रिंशत्कलास्थानेष्वादरात्ताभिरेव च। जस्थानि हृदयन्तेन रक्षार्थं दिक्षु निक्षि
पेदिति स्नात्वाचम्य विधानत इत्यनन्तरञ्चैवं कृत्वा। सुगंधपिष्टैरित्याद्युक्तेन येन तेन भस्मनैव सर्वं विधाय पुनरपि विधा
नेनाचम्य सुरगृहं प्राप्येत्यादि सर्वं कार्यम्। पुनरिह चैतावद्विधेयमिति परेष्विति मूलत इति। हरिहरादिषु एवं गंधरसाले
पनपूर्वकं भालगलादिपञ्चस्थानेषु मूलतोनुलिंपत्वित्यर्थः। दुर्गायां हरिवत् स्कंदगणपत्योः शिववत् इतरयोस्तिर्यक्
ऊर्ध्वपुंड्रविकल्प इति किरीटमनुना चेति स्थाण्वात्मकेणा मनुना चेति। अत्रापि पंचकृत्व इति संबध्यते। स्थाण्वात्मकः स्था रामः
णुमन्त्रः अथ विविधसूनवरैरिति यजेदित्यन्वयः। विविधानि सूनवराणि विशिष्टकुसुमानि इति शब्दो वक्ष्यमाणप्रकारा ३६

For Private And Personal

र्थः॥ तदेवाह श्वेतारुणेति हरेर्हरितुलसीकरवीरपद्मान्यम्यात्म चिल्यवधि कुर्यादित्यन्वयः॥ पादतलादिनाभ्यन्तन्तु तुलसी
द्वयन्तदादिहृदयान्तं करवीरद्वयन्तदादि चिल्लिपर्यन्तं पद्मद्वयञ्च कुर्यात्। श्वेतारुणक्रमकृतोभयपार्श्वयोगानिति तेषा
न्तत्कालविशेषणं श्वेतारुणक्रमेण कृतउभयपार्श्वयोगो येषामिति समासः यथा तुलसीद्वये श्वेततुलसीं पादतलादि
क्राष्टकविभूषितं ॥ बिंदौ मायां लिखेद्वह्नित्रिकोणेषु रमां स्मरं ॥ प्रणवं तत् कपोलेषु साध्याख्यं कर्मगर्भितं ॥ षट्
कोणेषु रमामाये लेख्ये अष्टदलांबुजे ॥ गोपालाष्टादशार्णान्वै त्रित्रिशो विलिखेद्दले ॥ देव्याः पंचदशार्णेतु सप्त
न वर्णांततो लिखेत् ॥ त्रित्रिशोंसदलें संतु विलिखेच्च यथाक्रमं ॥ मिलित्वा वा लिखेद्देव मंत्यमंत्य दले लिखेत् ॥ केसरे
षु स्वरा लेख्याः प्रादक्षिण्यक्रमेण तु ॥ वृत्तत्रयस्य पिर्योस्तु मार मालामनुं लिखेत् ॥ भूगृहद्वयसंधौतु मातृका
र्णान्क्रमाल्लिखेत् ॥ लक्ष्मीमीं यां लिखेद्द्वार पार्श्वयोस्तु क्रमाद्बुधः ॥ पाशांकुशौ दिग्विदिक्षु विलिखेच्चक्रबाह्य
तः ॥ वाराहं नारसिंहं च कपोलेषु समालिखेत् ॥ एतत्त्रिपुरसुंदर्या यंत्रं त्रैलोक्यमोहनं ॥ सर्वसंपत्करं नृणां स
द्यः सिद्धिकरं परं ॥ गोपाल मिलितं ह्येतद्गोपनीयं प्रयत्नतः ॥ राज्यदं राज्यकामानां वश्यदं वश्यमिच्छतां ॥ सु
तार्थीनां च सुतदं रोगिणां रोगशांतिदं ॥ दारिद्र्यो पिधनाध्यक्षो भवेद्यंत्रप्रपूजनात् ॥ हाटके राजते पट्टे लिखि
त्वा संप्रपूज्य च ॥ प्राणस्थापन पूर्वं तु धारयेद्यंत्रमुत्तमं ॥ सर्वान्कामानवाप्नोति राजवल्लभ्यतेजनैः ॥ राजानो
वशतां यांति नरानार्यस्तथोरगाः ॥ गंधर्वा यक्षरक्षांसि पिशाचा डाकिनी ग्रहाः ॥ शाकिन्यो लाकिनश्चैव दृष्टा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं तं भैरवग्रहाः॥ यं प्रधारणमन्येयेन मस्कृत्वा तु दूरतः॥ देशं विसृज्य धावंति तं तु नत्वा पुनः पुनः॥ अस्यार्थः॥ प्रथमं
११२ त्रिकोणं विलिख्य तन्मध्ये बिंदु विलिख्य तन्मध्ये भुवनेशीं विलिख्य त्रिषु कोणेषु श्रीबीजं विलिख्य कोणक
पोलेषु कामबीजं च प्रणवं च साध्य नाम गर्भितं पार्श्वद्वय विभागेन विलिखेत् पुनस्तद्बहिः षट्कोणं विलिख्य
तस्य प्रागग्रकोणत्रितये रमाबीजं इतरत्रितये भुवनेशीं च विलिखेत् पुनस्तद्बहिरष्टदलपद्मं विलिख्य तत्के
सरेषु स्वरद्वंद्वं विलिख्य॥ पुनः षट्कदलेषु कामबीजादि गोपालाष्टादशवर्णान् त्रिशस्त्रिशो विलिखेत् अव
शिष्टदलद्वये तु श्रीविद्या पंचदशार्णे तु आदित आरभ्य सप्त वर्णान् त्रिशस्त्रिशो विलिख्य अवशिष्टमेकमन्य
स्मिन्दले विलिखेत् इतरवर्णानां तेषां वा तत्त्वात्तत्र लेखनविधिः पृथगुक्तः अथवा मंत्रौ यंत्रे मिलित्वा लिखेत् तत्प्रकारः श्री
बीजं भुवनेशी बीजद्वयं च श्रीविद्यायाः द्वितीयातृतीयं च विहाय मूलमंत्रे कामबीजादित्रयस्त्रिंशद्वर्णान् दलेषु चतुरश्चतुरो वि
लिखेत् अवशिष्टमेकमन्यतेदले विलिखेत् तद्बहिर्वृत्तत्रयं विलिख्य तद्बाह्योल्लसन्मारमालामंत्रेण चतुःशतं मारगा
यत्र्याच स्वयंवराविधाने वक्ष्यमाणया संवेष्ट्य तद्बहिश्चतुरस्रद्वयं विलिख्य तद्बाह्यं मातृकावर्णैः संवेष्ट्य चतुरस्रस्य चतुरद्वा एमः
रेषु पार्श्वद्वये श्रीबीजं च भुवनेशीं च विलिख्य चतुरस्रस्य दिक्षु आमिति पाशाक्षरं विदिक्षु क्रोमित्यंकुशाक्षरं च विलिख्य चक्रस्य सर्वतो बहि ११२

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्चतुरश्रकोणपार्श्वयोः भूमिति वराहबीजं च क्ष्रौमिति नारसिंहबीजंच विलिखेत् चतुरश्रेरेखासु वज्रायुधाष्टकं
च विलिखेदिति अथासनन्यासविधिः ।। सव्यं पादमुपादाय दक्षिणे परि विन्यसेत् ।। तथैव दक्षिणं पादं सव्य
स्योपरि विन्यसेत् ।। विष्टभ्य कटुरोग्रीवानासाग्रन्यस्तलोचनः ।। पद्मासनं भवेदेतत्सर्वेषामपि पूजितं इति श्लो
कोक्तेन पद्मासनेन उपविश्य पुनर्गुरुगणपति वंदनादीन् पूर्वसप्तम पटलादाउक्तेन प्रकारेण कृत्वा भूतशु
द्धिं तत्रैवोक्त प्रकारेण कृत्वा हंस इत्युच्चार्य मूलाधारस्थ जीवं सुषुम्नया द्वादशांतं नयेत् मूलेनव्याप्य अ
मिति षोडशवारं दक्षिणनासिकया विरच्य उमिति द्वादशवारं वामनासिकया पूरयित्वा मकार पूर्वक विद्यासहि
तमंत्रराजं द्वादशवार मावर्त्तयेत् कुंभकं कुर्यात् एवं प्राणायामत्रयं कृत्वा वैष्णवपीठन्यासं सप्तदशपटलेव
क्ष्यमाण प्रकारेण कृत्वा मानसपूजांच प्राक् मातृकाविधाने उक्तेन प्रकारेण कृत्वा मूलमंत्रं प्रतिलोममु
च्चार्य तेजोरूपतामापाद्य तत्तेजतः करतले दक्षिण नासिका श्वास मार्गेण निपात्य करन्यासं कुर्यात् तत्प्र
कारश्चोपरिष्टात् सप्तदश पटले गोपालकाष्टादशाक्षरी विधाने वक्ष्यते अत्र तु दशाक्षरी वर्णैकैकेन स
हविंशत्यक्षर्याः पूर्वाद्वर्णैकैकमपि क्रमेण पुरतो योजयेदिति विशेषः पुनरपि विंशत्यक्षरी मंत्रषडंगै

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



रपितत्रैवोक्तप्रकारेण करन्यासं कृत्वा पुनः श्रीविद्याषडंगैरपि प्रागुक्तैः करन्यासं कृत्वा वैष्णवषडध्वन्या
संकुर्यात् तत्प्रकारो लिख्यते स पुनः षड्विधः कलातत्त्वभुवनवर्णपदमंत्रभेदेन तत्र प्रथमं कला
न्यासो लिख्यते ह्रौंनमः पराय शांत्यतीतकलात्मनेनमः ह्रैं नमः पराय शांतिकलात्मनेनमः ह्रूंनमः परायवि
द्याकलात्मने॰ ह्रींनमः परायप्रतिष्ठाकलायन॰ ह्रांनमः पराय निवृत्तिकलात्मनेनमः मूर्द्धास्यहृदयगुह्यपादेषु
न्यसेत् पुनस्तत्वंन्यासः तत्प्रकारस्तु उपरिष्टात्सप्तदश॰१पटले वक्ष्यते पुनर्भुवनन्यासः ॐ भूर्लोकायनमः
ओं भुवर्लोकाय॰ ओंसुवर्लोकाय॰ ओं महर्लोकाय॰ ओंजनलोकाय॰ ओं तपोलोकाय॰ ओंसत्यलोकाय॰
एतैर्नाभ्युदरहृत्कंठननभ्रूमध्यमूर्द्धसु न्यसेत् अं अतलायनमः अं वितलाय॰ अं सुतलाय॰ अंनि
तलाय॰ अंमहातलाय॰ अंरसातलाय॰ अं पातालतलायनम॰ एतैः कट्यूरुजानुजंघागुल्फपदतद
ग्रेषु न्यस्य पुनर्वर्णन्यासं कुर्यात् स तु लिपिन्यासः काननवृत्त्येत्याद्युक्तप्रकारः पुनः पदंन्यासं कुर्यात् ॐ
ह्रींजाग्रत्पदात्मनेनमः हंसः स्वप्नपदात्मनेनमः सोहं सुषुप्तिपदात्मनेनमः स्वाहा तुरीयपदात्मनेनमः रामः
कट्यादिपादांतं कंठादिकट्यंतं शिरआदिकंठांतं शीर्षादिपादांतंच व्याप्य पुनर्मंत्रंन्यासः स तु पुरुषस ११३

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कन्यासः तत्प्रकारउच्यते वामांगाद्यंकरचरणजानूरुयुग्मेषु नाभौ हृत्कंठारस्सद्दिनयवदनाक्ष त्तमांगेषु मेत्री
तत्राक्षीत्येकमेवस्थानं अयंतु संहारन्यासः एतद्विपरीतक्रमेण सृष्टिन्यासः पुनर्नाभेरारभ्यवामकरां
तंन्यस्त्वा वशिष्टाभिः ऋग्भिः शिरदिहृदंतं न्यसेत् एवं स्थितिन्यासः एवं षडध्वन्यासं कृत्वा पुनः पंचत
त्वन्यासंकुर्यात् षोंनमः पराय परमेष्ट्यात्मने वासुदेवायनमः यंनमः पराय पुरुषात्मने संकर्षणायन
मः रांनमः पराय विश्वात्मने प्रद्युम्नायनमः दंनमः पराय निवृत्यात्मने अनिरुद्धायनमः लोनमः पराय
सर्वात्मने नारायणायनमः क्ष्रौंनमः पराय कोपतत्वात्मने नृसिंहायनमः एतैर्मूर्धास्यहृदयगुह्यपादेषु न्य
स्त्वा षष्ठेन शिर आदि पादांतं न्यस्त्वा पुनर्मूर्तिपंजरन्यासंकुर्यात् तत्प्रकारस्तुउपरिष्टात्सप्तदशपटलेवक्ष्य
ते पुनर्दशतत्वन्यासंकुर्यात् तत्प्रकारश्च तत्रैववक्ष्यते पुनर्विंशत्यक्षरंन्यासंकुर्यात् तत्प्रकारश्चतत्रैवविंशत्स
हस्रीविधानेवक्ष्यते पुनर्विद्यायाअक्षरन्यासंकुर्यात् कापारेहृदयेनेत्रत्रितयेश्रवणास्यके बाह्वोश्च पृष्ठके
जान्वोजठरे चाक्षरन्यसेत् एवमक्षरन्यासंकुर्यात् पुनर्वाग्देवताःएकन्यासंकुर्यात् तदुच्यते ऐंह्रींश्रींअं
आं॰अंअः ब्लूंवशिनी वाग्देवतादेविश्री पादुकांपूजयामि २ कंखंगंघंडं कलह्रींकामेश्वरी वाग्देवताश्री॰मि २

श्र.सं. चंछंजंझंञं श्रूं मोदिनीवाग्देवतादेविश्री०मि ३ टंठंडंढंणंम्लूं विमलावाग्देवतादेविश्री०मि ३ तंथंदंधंनंज्म्रूं
११४ अरुणावाग्देवतादेविश्री०मि ३ पंफंबंभंमं हसकलव्रूं जयनीवाग्देवतादेविश्री०मि ३ यंरंलंवंशं झ्म्रूं स
र्वेश्वरीवाग्देवतादेविश्री०मि ३ षंसंहंळंक्षं क्ष्म्रं कौलिनीवाग्देवतादेविश्री०मि मूर्ध्नि फाले भ्रुवोर्मध्ये कण्ठहृ
न्नाभिगुह्यकमात् लिंगेत्वपदयोर्न्यस्येद्वाग्देवताष्टकं सुधीः पुनः चतुःपीठन्यासं कुर्यात् तदुच्यते ऐंह्रीं श्रीं
कएईलह्रीं अग्निचक्रे कामगिर्यालये मित्रीशनाथात्मिके श्रीकामेश्वरीदेविश्रीरुद्रात्मशक्तिश्रीपादुकां
पूजयामि ३ हसकहलह्रीं सूर्यचक्रे जालंधरपीठे ओड्डीशनाथात्मिके श्रीवज्रेश्वरीदेविश्रीविष्ण्वात्मशक्ति
श्रीपादुकां पूजयामि ३ सकलह्रीं सोमचक्रे पूर्णगिर्यालये षष्ठीशनाथात्मिके श्रीभगमालिनिदेविश्रीब्र
ह्मात्मशक्तिश्रीपादुकां पूजयामि ३ कएईलह्रीं हसकहलह्रीं सकलह्रीं परब्रह्मचक्रे ओड्याणपीठे श्रीचर्या
नाथात्मिके श्रीमहात्रिपुरसुंदरीदेविश्रीपरब्रह्मात्मशक्तिश्रीपादुकां पूजयामि ३ मूलेन हृदयभ्रूमध्य
मूर्धसु न्यसेत् पुनश्चतुस्तत्वानि विन्यसेत् ऐंह्रींश्रीं कएईलह्रीं आत्मतत्वेश्वर्यै श्रीमहात्रिपुरसुंदर्यै नमः ३ रामः
हसकहलह्रीं विद्यातत्वेश्वर्यै श्रीमहात्रिपुरसुंदर्यै नमः ३ सकलह्रीं शिवतत्वेश्वर्यै श्रीमहात्रिपुरसुंद ११४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऐंनमः ३ खंडत्रयस्तर्वतत्वेभ्यः यैं श्री महात्रिपुरसुंदर्यै नमः कड्याादि पादांतं कंठादिकंध्यं तं शिरआदिकंठांतं
शिरआदि पादांतं च व्याप्य पुनर्मूलमंत्रेण शिरआदि पादांतं त्रिर्व्याप्य गोपालमंत्रैश्च श्री विद्या षडंगैश्च षडं
गानि कृत्वा जपेत् अथ श्रीविद्या मंत्रप्रसंगात् शाक्तेयत्वसामान्येन राजमातंगी मंत्रविधानमपि कल्पांतरो
क्तं लिख्यते मतंग ऋषिः महाविराट् छंदः राजमातंगेश्वरी देवता ऐं बीजं स्वाहा शक्तिः सर्ववशकरी कीलकं म
म इष्टकाम्यार्थे विनियोगः ॥ ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति हृदु ऐं ह्रीं श्रीं ऐं क्लीं सौः श्री मातंगीश्वरि सर्व
जन मनोहरी शिरः बीजान्युक्त्वा सर्वमुखरंजनी क्लीं ह्रीं श्रीं शिखा बीजान्युक्त्वा सर्वराजवशंकरी सर्वस्त्रीपुरुषव
शंकरी कवचं बीजान्युक्त्वा सर्वदुष्टमृगवशंकरी सर्वसत्ववशंकरी सर्वलोकवशंकरी अमुकं मे वशमानय स्वाहा
नेत्रं सौः क्लीं ऐं श्रीं ह्रीं ऐं अस्त्रं ध्यानं ध्यायेयं रत्नपीठे शुककलरगितं शृण्वतीं श्यामगात्रीं न्यस्तैकांघ्रिं सरोजे
शशिशकलधरां वल्लकीं वादयंतीं ॥ कल्हारा बद्ध माला नियमित विलस च्चूलिकां रक्तवस्त्रां कर्णोद्यच्छं
खपत्रां कठिन कुचभराक्रांत कोलावलग्नां तन्वी लग्नां वनोद्यन्निबिड मदभरो द्वेललीला विलासां रत्नग्रैवेयभारां
गदकनकरनिःमूलमंजीरभूषां ॥ आनीयार्थानभीष्टान् स्मितमधुरदृशा साधकांस्तर्पयंतीं देवीं ध्याये स्तुकाभां

१९५ मुक्तामणिरचिताकल्परूपमस्थापार्श्वे ।। वामे विसृति शालिनी स्तनतटे विन्यस्य वीणामुखं तंत्रीं तारविराविणी
न.म. स्वकरजेनास्फालयंती नखेः ।। अर्द्धोन्मीलदपांगमंसवलितग्रीवं मुखं बिभ्रती मायाकांचनमोहिनी विज
यते मातंगकन्यामयी ।। ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति श्रीमातंगेश्वरि सर्वजनमनोहरि सर्वमुखरंजि
नि क्लीं ह्रीं श्रीं सर्वराजवशंकरि सर्वस्त्रीपुरुषवशंकरि सर्वदुष्टमृगवशंकरि सर्वसत्त्ववशंकरि सर्वलोकवशंक
रि अमुकं मे वशमानय स्वाहा सौः क्लीं ऐं ह्रीं श्रीं ऐं इति मंत्रः विद्यागानविद्ये श्वर्यप्रधानोयं मंत्रः ।। अथ राजमा
तंगेश्वरि मंत्रप्रसंगात् शारदातिलकोक्तप्रकारेणापि राजमातंगेश्वरी मंत्रविधानं लिख्यते ऐं ह्रीं श्रीं ओं नमो
भगवती श्रीमातंगेश्वरी सर्वजनमनोहरी सर्वमुखराजी सर्वमुखरंजिनी सर्वराजवशंकरी सर्वस्त्रीपुरुषवशं
करी सर्वदुष्टमृगवशंकरी सर्वसत्व वशंकरी सर्वलोकममुकं मे वशमानय स्वाहा इत्यष्टाशीत्यक्षरो मंत्रः ।। ऐ
श्वर्यविद्यावश्यगानफलप्रधानोयं मंत्रः अंगानि मंत्रवर्णान् विभज्य वक्ष्यमाणक्रमेण ऋषिध्यानादिकम् ।म:
पंचदेवं अथास्य मंत्रस्य न्यासः शिरो ललाट भ्रूमध्य तालु कंठ गलोरसि भुजद्वंद्वे च जठरे विन्यसेन्नाभिमं १९५
डले स्वाधिष्ठाने गुह्यदेशे पादयोर्दक्षिणान्ययोः मूलाधारे गुदे न्यस्येत्सदा न्यष्टादशक्रमात् गुणेक ह्वि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दुः षड्विंशकः षट् सप्तकाष्टभिः ॥ दशपंक्त्यष्टवेदाग्नि चंद्रयुग्मगुणास्त्रिभिः ॥ पदकृप्तिरियं प्रोक्ता मंत्रवर्णैयथाक्रमें ॥ पंक्तिशब्दो दशाक्षरः ॥ चंद्र इत्येकं पुनः ऐं ह्रीं श्रीं रत्यै नमः ऐं ह्रीं श्रीं प्रीत्यै नमः ऐं ह्रीं श्रीं मनोभवायै नमः ऐं ह्रीं श्रीं मातंग्यै नमः इति मूलाधार हृदयभ्रूमध्येषु न्यसेत् मातंग्या व्यापयेत् ऐं ह्रीं श्रीं हृल्लेखायै नमः गंगगनायै नमः रक्तायै नमः करालिकायै नमः महोच्छुष्मायै नमः मातंग्यै नमः एतान् बीजत्रयादि सबिंदुकस्वस्वनामाद्यवर्णपूर्वकाः शिरोहृदय वदन गुह्यपादेषु विन्यस्य मातंग्या व्यापयेत् पुनः षडंगानि कुर्यात् मूलमंत्रस्य चतुर्विंशतिभिर्वर्णैर्हृदयं त्रयोदशभिः शिरः अष्टादशभिः शिखा वर्मं च तावद्भिः त्रयोदशभिर्नेत्रं द्वाभ्यामस्त्रं पुक द्रां द्राविण्यै शों शोषिण्यै बं बधिन्यै मों मोहिन्यै आं आकर्षिण्यै नमः मूर्धपादास्य गुह्येषु हृदंभोजे प्रविन्यसेत् मातंग्यै नमः इति गात्रे पुनः ऐं ह्रीं श्रीं मन्मथाय नमः बीजत्रयादि मकरध्वजाय नमः बीजादि मदनाय नमः बीजादि पुष्पधन्विने बीजादि कुसुमायुधाय बीजादि कंदर्पाय बीजादि मनोभवाय ऐं ह्रीं श्रीं रतिप्रियाय नमः वदनांसपार्श्वे कटिनाभि कटि पार्श्वांसकेषु विन्यस्य मातंग्यै नमः इति देहे विन्यस्य पुनः अनंगकुसुमायै अनंगमेखलायै अनंगमदनायै अनंगमदनातुरायै अनंगम

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir




दनवेगायै अनंगसंभवायै अनंगपवनपालिन्यै अनंगशशिरेखायै मातंग्यै नमः एताः पूर्वोक्तमदनादीनामुक्तस्थानेषु वि
न्यसेत् लक्ष्म्यै नमः सरस्वत्यै नमः प्रीत्यै कृत्तिकायै शांत्यै पुष्ट्यै मातंग्यै नमः मूलाधारात्स्वाधिष्ठानमणिपूरकहृत्कंठास्ये
भ्रूमध्यमस्तकेषु सर्वांगे च न्यसेत् पुनः मूलमंत्रं सर्वमेव वक्ष्यमाणस्थानेषु विन्यसेत् मूलमंत्रं प्रविन्यस्येत्तिजमह्र्दनिमंत्रवि
त् पुनः आधारदेशे धिष्ठाने नाभौ पश्चाद नाहते कंठदेशे भ्रुवोर्मध्ये बिंदौ भूयः कलापदे तिरोधिकायामर्द्धे दौ नादनादांतयोः
पुनः उन्मन्यां विषुवे वज्रे ध्रुवमंडलदेशके मातंग्यंतां प्रविन्यसेत् इतिस्थानानि पुनः एषु स्थानेषु शक्तयः वामायै नमः ज्ये
ष्ठायै रौद्र्यै प्रशांत्यै श्रद्धायै माहेश्वर्यै क्रियाशक्त्यै लक्ष्म्यै सृष्ट्यै मोहिन्यै प्रथमाश्वासिन्यै विद्युल्लतायै चिच्छक्त्यै असुरा
नंदायै सुरानंदायै आनंदाढ्यै नमः इति मातंग्या व्यापयेत् अथवात्र मातंग्ये पदन्यासस्तत्र तत्तन्मंत्रांते संयोज्य तत्तन्मंत्रो
क्तस्थानेष्वपि रत्यै मातंग्यै नमः प्रीत्यै मातंग्यै नमः इति रतिन्यासमारभ्य सर्वत्र एवं प्रकारेण संयोजयेत् पुनर्मा
तंग्यै मातंग्यै नमः महापदन्यासस्तत्र तत्र तत्तन्मंत्रांते संयोज्य तत्तन्मंत्रोक्तस्थानेष्वपि रत्यै मातंग्यै
नमः प्रीत्यै मातंग्यै महालक्ष्म्यै मातंग्यै नमः महालक्ष्म्यै मातंग्यै नमः सिद्धलक्ष्म्यै मातंग्यै नमः इति शि राम
रफालहृदाधारे षेतान् बीजत्रयादिकान्मातंग्यंताः प्रविन्यस्येद्यथावत्साधकोत्तमः ॥ त ११६

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न बीजत्रयं सर्वशक्त्या दौ वाग्भव भुवनेशीश्रीबीजानि पुनर्मूलमंत्रं मूलाधारे त्यस्य तेनैव व्यापकं कृत्वाध्या
त्वा अयुतंजपेत् मधुकपुष्पैर्दशांशं हुनत् पुरश्चरणार्थं अथपूजा त्रिकोणकर्णिकं पद्ममष्टपत्रं प्रकल्पये
त् अष्टपत्रावृतं बाह्येवृत्तं षोडशभिर्दलैः चतुरश्रसमायुक्तं कृत्वा दृष्टिमनोहरं अस्मिन्मंडले नवशक्तिभिः पी
ठं समर्चयेत् विभूत्यै उन्नत्यै कांत्यै सृष्ट्यै कीर्त्यै सन्नत्यै पुष्ट्यै उत्कृष्ट्यै वृध्यै इति मातंगीपद्योताः समर्चनी
याः ऐं ह्रीं श्रीं सर्वशक्तिकमलासनायै नमः इत्यभ्यर्च्यास्मिन्समावाह्य समर्चयेत् रत्यै प्रीत्यै मनोभवायै इति त्रि
कोणेषु ह्लेखायै गगनायै रक्तायै करालिकायै महोच्छुष्मायै इति त्रिकोणे दिक्षु मध्ये च तद्बहिरंगानि स
मर्चयेत् तद्बहिः द्रां द्राविण्यै षों शोषिण्यै वं बंधिन्यै मों मोहिन्यै आं आकर्षिण्यै इति बाणपंचकदेवता दिक्षु
पुरतश्च यजेत् तद्बहिरष्टदलमध्येषु मातृभिः समर्चयेत् तद्बहिर्दलाग्रे असितांगाद्यष्टभैरवान् पंचविंशतिप
टले आपदुद्धारविषये ये वक्ष्यमाणान् समर्च्य तद्बहिः षोडशपटलेषु वामाद्यान्यासविधानोक्ताः संपूज्याः त
द्बहिश्चतुरश्रदिक्षु मातंग्याद्या न्यासविधानोक्ताश्चतस्रः पूजनीयाः आग्नेयकोणे विघ्नराजं दुर्गां नैरृत्ये क्षेत्रपालं यजे
त् वायव्ये वटुकं पश्चादैशान्ये क्षेत्रपं जपेत् तद्बहिरिंद्रादिभिः तद्बहिर्वज्रादिभिर्यजेत् अथ प्रयोगः मल्लि

प्र॰सं॰ काजातिपुष्पा गेहीं माद्भाग्यालयो भवेत् जातीशिवशीर्णपकं फलैर्बिल्वसमुद्भूतैस्तत्रैवाहुताद्भवेत् राजपुत्र
११७ स्य राज्याप्तिः पंकजैः श्रियमाप्नुयात् उत्पलैर्वशयेद्विश्वं लक्ष्मीपुष्पैस्तथा पुनः लक्ष्मीश्रीतालि बंधुकपुष्पैर्वकुलै
–पोषैः किंशुकोद्भवैः वश्याय जुहुयान्मंत्रीमधुना सर्वसिद्धये बंधूकंडत्रि——ले——वकुलले किंट्ट किंशुकं मुरु
करु लवणैर्मधुनाप्तैर्हुत्वाकर्षति सुंदरि वंजुलस्य समिधो मेवृष्टिं वितनुते चिरान् वंजुलं नीरवंचि क्षाराक्ते
रमृताखंडै ह्रीं मानाशयति ज्वरं अमृताशिंतिं छुदुर्वाभिरायुराप्नोति कदंबैर्वशमाप्नुयात् कदंबअष्टंबु त्रिकोणम
द्रावथ पंचकोणं म श्राब्जयुग्मेंदुकलांबुजानि वस्वब्जचेदांबुजभूगृहाणि मातंगकन्यावरयंत्रमाहुः ॥अथ राजमा
तंगीमंत्रप्रसंगात् सुरेंद्रसंहितोक्त प्रकारेण लघुमातंगीमंत्रोपि अत्र लिख्यते अंगिराऋषिः अनुष्टुप् छंदः लघु
श्यामला देवता ऐं बीजं स्वाहा शक्तिः ऐं नमः हृत् उच्छिष्टशिरः चंडालिनिशिखा मातंगीकवचं सर्ववशंकरी नेत्रं
स्वाहा अस्त्रं ध्यानं दिव्यामृतरसांभोधौ रत्नद्वीपे मनोहरे कदंबकानने रत्नमंडपांते महेश्वरीं ध्यायेत्सिंहासना रानः
सीनां प्रसन्नवदनांबुजां इंद्रनीलमणिश्यामां नवनीलोत्पलश्रियां रक्तांशुकपरीधानां यावकार्द्रपदांबुजां उल्ल ११७
सद्घनतारुण्यलसुन्नतपयोधरां पीयूषोदधिसंभूतकंबुकुंडलमंडितां विनम्रकामकोदंडसौंदर्यविजयीभ्रुवं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बिंबाधरां स्मितज्योत्स्नां कपोलफलकोज्वलां ॥ लसत्कुरंगशावाक्षीं नासाकलितमौक्तिकां ॥ पृष्ठदेशोल्लसल्लो
लवेणी चामरवेणिकां ॥ कस्तूरितिलकां चारु चंद्ररेखावतंसकां ॥ दिव्यचंदनदिग्धांगीं मदाघूर्णितलोचनां ॥
मुक्ताप्रवालावलिभिर्विभूषितपृथुस्तनीं ॥ मेखलाहारकेयूरमंजीरसमलंकृतां ॥ वीणाक्वणितविस्रंभविश्रांता
श्रांतमानसां ॥ सम्यक्कपोलफलिका मालोलालकवल्लरीं ॥ स्फुरत्कदंबकल्हारप्रसूनैस्तु विराजितां ॥ लीला
शुकं शिक्षयंतीं चतुराम्नायपद्धतीं ॥ आम्नीकसुमुखीभूतां रश्मिभिः परिवारितां ॥ ध्यात्वा हृदि महादेवीं निश्चलेनां
तरात्मना ॥ साधकः परया भक्त्या भुक्तिमुक्ती च विंदति ॥ ऐं नमः उच्छिष्टचांडालिमातंगि सर्ववशंकरि स्वाहा ।
इति विंशत्यर्णो मंत्रः ऐश्वर्यगानविद्यावश्यप्रधानो यं मंत्रः कलौ कलजिते काले साधकस्य प्रसीदति ॥ लघु
शीघ्रेनतेनेयं लघुश्यामेति गीयते ॥ निशादौ लक्षं जपेत् ॥ किंशुकपुष्पैर्वीजपाकुसुमैर्वा रक्तकरवीरैर्वा मधू
कपुष्पैर्वा त्रिमधुरसिक्तैरयुतं जुहुयात् पुरश्चरणार्थं यस्तु विंशति लक्षाणि पूर्ववत्प्रजपेन्मनुं ॥ जुहोति च यथा
पूर्वं तस्य प्रत्यक्षतां व्रजेत् ॥ किंशुकं मरुकं पु मधूकं इलुष्येपु अथ पूजा प्रतिमायां पटे पात्रे स्त्रिनयानौ वा
पि पुस्तके ॥ कन्यामूर्त्तौ तथा खड्गे यंत्रे वा मलदर्पणे ॥ धनलाभो ग्रामलाभः कन्यालाभस्तथा परः ॥ सुलभा मे

For Private And Personal

प्र.सं. त्रिणो नित्यं प्रतिमायां प्रपूजिने ।। डाकिनी शाकिनी दोष शांतये पटपूजने ।। पात्रे तु यो यो येद्देवीं धनाढ्यः सोभि
११८ राद्भवेत् ।। सर्वसौभाग्यसंपत्ति वश्याकर्षण सिद्धये ।। जाति चक्रे तु संस्थायाः पूजनं कुलशासने ।। महाभयस्य शां
त्यर्थं सर्वविघ्नविशुद्धये ।। पूजनं कन्यका मूर्त्तौ खड्गे शत्रुवधोद्यमे ।। अणिमाद्यष्टकं यंत्रे दर्पणे वश्यकर्मणि ।।
सिद्धयश्चैव विज्ञानं भवेयुः पुस्तकेर्चनात् ।। त्रिपंचाष्टदलाष्टारकलाश्रवसुपत्रकं ।। चतुरस्रं भवेद्देव्याः पूजा
यंत्रं वरानने ।। अस्मिन्यंत्रमंडले मूलाधारा द्वाम नाडी द्वारेण हृदयमंत्रेण महादेवीं समावाह्य योनिमुद्रां
हात्रिंशपटलानंतरं वक्ष्यमाणां प्रदर्श्य कवच मंत्रेणा हृत्तनं कुर्यात् शिरो मंत्रेणाभ्यंजनं नेत्रमंत्रेण ती
र्थाभिषेचनं वर्ममंत्रेणाचमनं शिरोमंत्रेण कुसुमानि वासः पुनराचमनं च वर्ममंत्रेण तेनैव दीपालं
कारांश्च दद्यात् पुनरंगैः प्रथमावृत्तिः पुनः त्रिकोण कोणेषु ऐं रत्यै नमः ऐं प्रीत्यै नमः ऐं मनोभवायै नमः
इति समर्च्य पुनरपि त्रिकोणे सर्वस्वरेभ्यो नमः रागेभ्यो नमः रागिणीभ्यो नमः इति समर्च्य पुनरपि तत्रैव राम
त्रिकोणेषु इच्छाशक्त्यै नमः ज्ञानशक्त्यै नमः क्रियाशक्त्यै नमः इति समर्चयेत् वाग्भवं पूर्ववत् मंत्रादौ स
र्वत्र योज्यं पुनस्तद्बहिः पंचकोणे द्रां द्रावि‍णबाणाय नमः द्रीं क्षोभणबाणाय नमः क्लीं वशीकरणबाणाय

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नमः ब्लूं आकर्षणबाणाय नमः सः संमोहनबाणाय नमः इति समर्चयेत् तद्बहिरष्टपत्रेषु सुभगायै भगायै भग
सर्पिण्यै भगमालिन्यै अनंगायै अनंगकुसुमायै अनंगमेखलायै अनंगमदनायै इति समर्चयेत् तद्बहिः
रष्टदले मातृभिर्यजेत् तद्बहिः षोडशदले उर्वश्यै मेनकायै रंभायै घृताच्यै पुंजिकायै सुकेश्यै मंजुघो
षायै महा... यक्षकन्यायै गंधर्वकन्यायै सिद्धकन्यायै किन्नरकन्यायै उरगकन्यायै विद्याधरकन्या
यै किंपुरुषकन्यायै इति समर्च्य तद्बहिरष्टपत्रेषु अणिमादिसिध्यष्टकेन समर्चयेत् तत्र पूर्वादिदि
क्चतुष्टयं ईशान्यादिविदिक्चतुष्टयं च पुनर्वामन्या उच्छिष्टपादुकायै नमः इति समर्चयेत् ॥ इति सुरेंद्रसं
हितोक्तलघुमातंगीपूजाविधिः समाप्ता ॥ अथ मातंगेश्वरीमंत्रप्रसंगात् शाक्तेयत्तसामान्येन स्वयंवरा
मंत्रविधानं मंत्रसारोक्तमपियोग्यतावशाल्लिख्यते ब्रह्मा ऋषिः देवी गायत्री छंदः जगन्माता श्रीपार्वती
देवता ऐं त्रैलोक्यवशमोहिनी हृत् जगत्त्रयवश्यमोहिनी शिरः उरगवश्यमोहिनी शिखा राजवश्यमोहि
नी कवचं स्त्रीपुरुषतशकरी नेत्रं सर्वस्त्रीपुरुषमुखहृदयं मम वशं कुरु कुरु स्वाहा अस्त्रं अथवा ह्रां हृत् एम
ह्रीं शिरः ह्रूं शिखा ह्रैं कवचं ह्रौं नेत्रं ह्रः अस्त्रं इत्यादि षडंगं कुर्यात् ध्यानं बालार्कायुतसप्रभां करत ११६

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· ले लोलंबमालाकुलां मालांसंदधतीं मनोहरतनुं मंदस्मितोद्यन्मुखीं॥ मंदं मंद मुपेयुषीं वरयितुं शंभुं जगन्मो
११६ हिनीं वंदे देव मुनींद्र वंदितपदामिष्टार्थदां पार्वतीं॥१॥ ह्रीं योगिनि योगिनि योगेश्वरि योगभयंकरि सकलस्था
वरजंगमस्य मुखहृदयं मम वशमाकर्षयाकर्षय स्वाहा इति मंत्रः वश्यप्रधानोयं मंत्रः पंचचत्वारिंशद्वर्णः
शीर्षालिक श्रुति विलोचन घ्राण गंड दंतोष्ठ दोश्चरण साबधि संधिकेषु आधार पार्श्व हृदय स्तनक क्षसांस
शीर्षेषु विन्यसेन्मंत्रवरस्य वर्णान् तत्र दोश्चरणेति दोश्चरणयोः साग्रसंधिष्वित्यर्थः शीर्षं दक्षकपोलांसे पा
र्श्वनाभ्यन्यपार्श्वके अंसतालुशिरोवक्त्र पृष्ठहृत्सुपदान्वित एवं पदंन्यासं कुर्यात् पुनः त्रीं चापामनमः इतिभ्रुवो
र्न्यसेत् ज्यांज्यायै नमः इति नेत्रयोरधः द्रां द्रावि ण्यै नमः द्रीं क्षोभिण्यै नमः क्लीं वशीकरिण्यै नमः ब्लूं आकर्षिण्यै
नमः सः संमोहिन्यै नमः एतास्तु बाणपंचकदेवताः नेत्र घ्राणेत्यादि वक्ष्यमाणस्थानेषु न्यसेत पुनरेतासां दे
वतानामायुधवर्णानुच्यते पुष्पबाणेक्षुकोदंड पाशांकुशलसत्कराः रक्ताः रक्तावरालेपाः सुप्रसन्नाननांबुजाः सास्यानरूपशालाश्च प्रमदा
मदविह्वलाः सबाणशिरसो ध्येयाः कामदा बाणदेवताः एवं न्यस्त्वा लक्षत्रयं जपेत् त्रिमधुरसिक्तैः पंकजैर्वा आज्यसिक्तैः क्षीरपायसैर्वा तस्मि रामः
न्नैरुत्पलैर्वा दशांशं पुरश्चरणहोमः उत्पलं नैतत्य अथ पूजाविधिः जयायै विजयायै अजितायै अपराजितायै नित्यायै विलासिन्यै ११६

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दोर्घ्यै अघोरायै मंगलायै इत्यष्टदलेषु अष्टशक्तीः नवमीं कर्णिकायां च संपूज्य अस्मिन् शाक्ते पीठे स्व
यंवरा मूर्त्तीं समावाह्य समर्चयेत् अंगैः प्रथमावृत्तिः सुभगायै भगायै भगसर्पिण्यै भगमालिन्यै अ
नंगायै अनंगकुसुमायै अनंगमेखलायै अनंगमदनायै इति द्वितीयावृत्तिः पंचबाणमंत्रैर्व
क्ष्यमाणैस्तृतीया मातृभिश्चतुर्थी अस्मिन्नेव पटले त्रिपुराविद्यानोक्ताष्टभैरवैः पंचमी इंद्रा
दिभिः षष्ठी वज्रादिभिः सप्तमी एवं संपूज्य पुरश्चर्यं प्रयोगान् कुर्यात् अथ प्रयोगः एवं प्रपूज्या
थ जुहोतु वह्नौ बंधूकपुष्पैस्त्रयुतं नरो यः त्रिःस्वादुयुक्तैर्नियमेन भक्त्या कुर्यात् त्रिलोकीं नचिराद्वशे सो बंधूकं रुचि
त्रिलोचन् अयमर्थः बंधूकपुष्पैस्त्रिमधुरसिक्तैस्त्रयुतं जुहुयात् त्रैलोक्यवश्यार्थं प्रयोगांतरं पाटीरपंकलु
लितैर्बकुलप्रसूनैरष्टोत्तरं दश शतं प्रजुहोति यो सौ षण्मासतः सुविपुलां समवाप्य लक्ष्मीं नारीतरक्षितिप
तीन् स्ववशे विदध्यात् पाटीरपंकं चंदनं बकुलं अयमर्थः पाटीरपंकसिक्तैर्बकुलपुष्पैरष्टोत्तरसहस्रं जुहु
यान्नित्यशः एवं षण्मासे कृते लक्ष्मीश्च सर्वं तस्यैव भवति प्रयोगांतरं पारतीसुमनोभिः स्वादुयुताभिर्हुतं क्रियान्न चिरात् लक्ष्मीकरीं नराणां
रीवस्या त्रिलोकरजनी वशकारा पारतीवेटुम्बि अयमर्थः अनेन कुसुमेन त्रिमधुरसिक्तेन संख्यानुके सहस्रमिति स्यायात् सहस्रं जुहुयात् उक्तफ
लं भवति प्रयोगांतरं २१

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· ससितेन घृतेन च यो हवनं वितनोत्यनले सुसमिध्यतरे अयुतं परमां समवाप्य रमां जगतां त्रितयं कुरुते स वशे
१२० सितशर्करैः अयमर्थः सिताऽऽलोलितेनाज्येन अयुतं जुहुयात् उक्तफलं भवति प्रयोगांतरं सुधालतोत्थै
रयुतं सुशुद्धैः खंडैर्दिनादौ मधुरत्रयाक्तैः जुहोतु वन्हावभिवाह्य देवीं ज्वरापमृत्युप्रहरोगशांतये सुधाल
ताः शीतल्लू अयमर्थः सुधाखंडैस्त्रिमधुरसिक्तैरयुतं जुहुयात् उक्तफलं भवति प्रयोगांतरं जातीप्रसू
नैर्विकसत्यमाशैः पाटीरपंकस्नपितैः सह स्तंसंध्यां तृतीयां समुपास्य पश्चाज्जुहोतु वन्हावनुरंजनाय जाती
स्विचशेणपक्वं पाटीरं चंदनं अयमर्थः जातीपुष्पैः पाटीरपंकसिक्तैः सायंसंध्यायां जुहुयात् उक्तफलं भ
वति अथ प्रातःकालीनध्यानं हेमाभामतिवागतीतगुणशीलां तामशिल्पाकृतिं प्रमारोहमनोहरां क
रलसत्कल्याणदानांचितां भूयामामीश्वरमुद्यतां वरयितुं श्रीलोक्यसंमोहिनीं कामापादनकल्पवल्लि
मनिशं वंदे परां देवतां प्रातःकाले जगद्वश्यां ध्यायेत्सर्वसमृद्धिदां मध्यान्हकालीनध्यानं बालार्कोत्याद्युक्त
श्लोकः सायंकालीनध्यानं विधृतवरणमाल्या सर्वरत्नांगभूषा निखिलनयनचेतोहारिरूपा प्रवेषा भव
तु भवदभीष्टप्राप्तये शैलकन्या पुरुषयुवतिवश्याकृष्टिनित्यप्रहर्षा ॥ दीक्षापूर्वं गुरुवरमुखात्प्राप्यते तेन प्र

रामः
१२०

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दायाविद्यामेनं विमचरितस्तन्त्रियोगक्रमेण ॥ जस्त्वा हुत्वा विधिवदभिबाह्यार्चयित्वा तथैवं योगान्मुंजाद्गुवनद
शान्ताकृष्टिसंक्षोभदक्षान् ॥ नद्यास्तीरे सुविमलमरुल्लोलरम्ये तदंके यद्वा दुर्गे भवनमहिते नीलकंठालये
वा ॥ शुद्धे यद्वा भवनकुहरे विष्टरं न्यस्य तस्मिन्बध्वा पद्मासनमथ तत्स्वस्तिकं वासनाग्र्यं ॥ स्थित्वैवं शोषणाद्यै
रमलतनुरथाचारतो विद्युदाभा मुद्गच्छंती सुषुम्नामुखचरणपरां सार्कसोमप्रभान्तां ॥ पीयूषांबुप्रवाहां मनुसम
यमनिशं स्रावयंतीं निजांगे ध्यायेन्मुच्येत वैरूप्यकदुरितविषक्षोभदारिद्र्यरोगैः ॥ आधारोद्यच्छिखिपुरगतो
वेष्टितो मातृकार्णैः सौषुम्नाध्वाचरणनिपुणो वाग्भवाद्यश्च मंत्रः ॥ सोयं ध्यातो वदनकुहरान्निःसरन्नाशु दद्याद्वा
गैश्वर्यं विबुधतटिनीलोलकल्लोलरम्यं ॥ हृत्सरोजस्य करांशुमंडलं लसद्योन्यंतरालस्थितं मंत्रं मारपुरःसरं
नवजपाशोणं धिया भावयेत् ॥ योमुं ध्यान्परासुवर्णविभवैः संप्रीणयेद्दिंदिरा किंचासौ भुवनत्रयं निजवशे कु
र्यादवश्यं नरः ॥ षट्द्वंद्वांतगपद्ममध्यविलसद्बालार्कबिंबस्फुरद्योनिस्थं कमलादिको मनुरयं कौसुंभपुष्पारुणं ॥ ध्या
तो मंत्रनिधामनर्घविभवस्तोमादिभूतादिकानाथैश्वर्यविनिंदिनी मनुपमां लक्ष्मीं चिरायार्पयेत् ॥ मार्तंडमंडलस्था
मौलींदुगलत्सुधार्द्रतनुलतिकां ॥ मिहिरमृगांकमरुन्मुखनेत्रां मुकुरोपमानगंडतलां मंजिष्ठाधरविलसद्दश्रि

For Private And Personal

प्र.सं. तचंद्रिकां मनोज्ञमुखीं॥ मत्तेंद्र कुंभिकुंभप्रोन्नतकुचकुंभखिन्नमध्यलतां॥ मन्मथपृथुजघनां मुनिमुख्याराध्यमान
१२१ पदकमलां॥ मणिमयमंजीराहद कांचीग्रैवेयकटकमुकुटाद्यां॥ काश्मीरकर्दमनिभां करधृतरत्नाभिपूर्ण॥ क
नकघटां॥ संचिंत्येवं देवीं वसुसंख्यं मंत्रमेनमथ जप्त्वा॥ अमृतांबुस्रावि विविक्त्यां विलोकयंतीं निजानने दृष्ट्वा॥ स्मृ
त्वा हिमगिरितनयां षोडशसंख्यं प्रजप्य भूयश्च॥ आरभ्य पादपीठात्तस्याः संकल्प्य रजतसोपानं॥ स्वांगावधिमनु
मेनां द्वात्रिंशत्संख्यकं प्रजप्य ततः॥ स्मृत्वा परिवारयुतां मार्गेणानेन मंदमवतीर्य तिष्ठंतीं निजपुरतो ध्यात्वाचा
ष्टोत्तरं शतं जप्त्वा रत्नघटाननिर्यत्सुबहलरत्नांबुधारया गौरीं॥ अभिषिंच्य पूरयंतीं निजतनुमनुचिंत्य यो मनुं
जप्यात् अष्टोत्तरसहस्रं मनुवरमेनं महत्तरानुचिरात्॥ संप्राप्नुयान्मनोज्ञा धनधान्यसमृद्धिसुकुलालक्ष्मीः
पुरः साध्यं मंत्री शिवतनुममुं मारविवशं निजां मूर्तिं तद्वद्गिरिवरसुतामुज्ज्वलतनुं शिवौ मारार्त्तौ गावभिमिलि
तदेहौ स्मरयति यमुद्दिश्यासौ नाभवति न चिरादेव वशगः साध्यं शिवातनुममुं नवनीतरूपं नीलं निजे शिव
तनावनलस्वरूपे संचिंत्य साध्यममुना शयनासनाद्यं नित्यं करोति स तिमाननुरंजनाय स्वस्मैकक्षंनरममल राम:
धीः शंभुरूपं भवानी विश्लेषांतं निजतनुमुमां तद्वदत्यंतहृद्यां क्रोधध्वांतं प्रणयमधुरैः कोपयंतीमपांगैर्ध्यायेत् १२१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्योसौ सखलु निखिलं तिष्ठतेकर्तुमिष्टं ततावासगेहे प्रदीपांकुशार्त्तप्रहारद्रुतध्वांतदंतावलेंद्र विविक्तेवितो
नप्रसूनां वराढ्येमनोज्ञैःसुवेषैः प्रविश्यात्रमंत्री सतुगोपधानां समास्तीर्य्य शय्यां स्थितोस्यो निशीथे सितच्छ
दायां सपाशांकुशाविक्षचापार्त्तवेषून् करांभोजैर्दधानांकुसंभाभवर्णां मुरक्तांवरालेपभूषांत्रिनेत्रां भवानीं
स्वसाध्यां विचिंत्यस्वयंच भवान्माथपाशांकुशाद्यंचमंत्रंजपेद्वर्णसंख्यं निजांकेमिरूपे सुधारूपदेहा विलीनांशि
तात्मा विचिंत्याप्टयुक्तं सहस्रं जपेद्यः असावुर्वशीमप्यमर्त्यालयाद्राकुसमाकर्षयेत्किंपुनर्मर्त्यनारीं मदेनमंदि
रंघ्रिमुखस्फुरमदनगां मनुमिंदुनिभंस्मरन् ज्वलनरूपनिजांगुलिघट्टनेर्निजहितांवितनोतुवशेवशां ॥
अथयंत्रश्लोकः ससाध्यंहृल्लेखां प्रथममथषट्कोणविवरे षडर्णं किंजल्केस्वरयुगलमंतःशरमितान्
७मौ मनोःपत्रेष्वर्णान्विलिखतुतथात्वेत्वथपरान् वृत्तंकाद्येर्वैर्निखिलसुखदंभूपुरगतं अस्यार्थः प्रथमषट्
कोणंविलिख्य तत्कर्णिकायां भुवनेशीं विलिख्य तन्मध्येसाध्यनामादीन्विलिख्य षट्सुकोणेषुवाग्भ
वस्मरशक्तिस्त्रीं ब्लूंसः इत्यक्षरतोमनुःषडर्णोमुनिभिःसोयमभीष्टार्थंस्करद्रुमः अस्यार्थः वाग्भवऐंकारः
स्मरःकामबीजं शक्तिः पराबीजं इतरत्रयंस्त्रीं ब्लूंसः इति एतदुक्तं भवति ऐं क्लीं सौः स्त्रीं ब्लूंसः इतिविलि

For Private And Personal

प्र·सं· खेत् तद्बहिरष्टदलं पद्मं विलिख्य तत्केसरेषु स्वरद्वंद्वं विलिख्य दलमध्येषु मूलमंत्रस्य वर्णान् प्रतिदले
२२२ पंचशः पंचशो विलिख्य अवशिष्टानंत्यदले च विलिख्य तद्बहिः कादिवर्णैः संवेष्ट्य तद्बहिश्चतुरस्रं विलिखेत्
यंत्रांतरं स्वयंवराख्यविद्यायायंत्रं वक्ष्ये यथाश्रुतं सुदुश्वर भवस्तत्वादृष्टं दुर्वाससा किल पाशांकुशलसत्पार्श्वो
शक्तिमध्ये विलिख्य च कोणमध्ये लिखेत्स्त्रीं ब्लूं ऐं क्लीं सौः सः इति क्रमात् अष्टपत्रस्य पद्मस्य मंत्रार्णान् मुनिसंख्य
कान् पत्रेषु आलिख्य तद्बाह्ये वृत्तानां त्रितये क्रमात् मारमालामनुं बाणान् मातृकां च धरापुटे दिक्षु शक्तिं मारबी
जं विदिक्षु च समालिखेत् यंत्रं स्वसंवरस्येदं आलिख्य कनकादिषु सुजप्तसिक्तसंपादे द्धानः शोभने दिने
धनधान्यधराधेनुसस्यभूषादिसंयुतां लब्ध्वा ह्युत्तमां लक्ष्मीं त्रैलोक्यमपि रंजयेत् अस्यार्थः प्रथमं षट्
कोणं विलिख्य तन्मध्ये भुवनेशीं विलिख्य तस्याः पार्श्वद्वंद्वे आं क्रों इति पाशांकुशबीजद्वयं विलिख्य पुनः सा
ध्यनामादीन् विलिख्य पुनः षट्सु कोणेषु स्त्रीं ब्लूं ऐं क्लीं सौः सः इति क्रमात् पूर्वोक्तबीजषट्कं विलिख्य तद्बहि
रष्टदलपद्मं विलिख्य तेषु मंत्रवर्णान् सप्तशो विलिख्य अस्मिन्पक्षे योगेभ्यो यदि पदद्वयस्यापि वीप्सा जायते ऋमः
तद्बहिर्वृत्तत्रयं विलिख्य प्रथमे वृत्ते काममालामंत्रैर्वक्ष्यमाणैर्वेष्टयेत् द्वितीये वृत्ते तत्पंचबाणमंत्रैर्वक्ष्यमा १२९

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णैर्वेष्टयेत् तृतीयेवृत्ते मातृकावर्णैर्वेष्टयेत् तद्बहिश्चतुरस्रं विलिख्य तद्दिक्षु भुवनेशीं विदिक्षु कामबीजं
च विलिखेदिति प्रयोगांतरं बिल्वैः पुष्पैस्तत्फलैर्नागपुष्पैर्नंद्यावर्तैरुत्पलैः केरवैर्वा होमं कुर्यात्स्वादुयुक्तं सह
स्रं लक्ष्म्यै कोट्यै लोकसंरंजनाय उत्पलं नैतसुनागपुष्पं रादुष्पुके खं आपल्त्रिमधुरसिक्तैरेतैः प्रातःकाले सहस्रं
जुहुयात् उक्तफलं भवति प्रयोगांतरं मार्तंडमंडलगतामथचेक्षुचापपाशांकुशाद्दशनोज्वलपाणिपद्मां स्थितो
रुदघ्नसलिले प्रविचिंत्य गौरीं जप्यात्श्रियै सुयशसे जनरंजनाय प्रयोगांतरं समाप्य सायंतनकर्म मंत्री मनोज्ञ
वेषा प्रविचिंत्य गौरीं।।प्रत्यङ्मुखोष्टोर्ध्वशतं प्रजप्या नित्यशो जपेत् गौरीं ध्यात्वा तस्मादुक्तफलं भवति प्रयोगांत
रं उद्यद्याकाशशंकांतरपरिविलसंत्त्यप्रसस्यात्त्रिनेत्रां दोर्भिः पाशेक्षुचापांकुशकुसुमशरान्बिभ्रतीमिंदुचू
डां गौरीं गौरांगरागां वररुचिरतनुं चिंतयन्मंत्रमेनं जप्यात्कोट्यै समृध्यै सुविपुलयशसे लोकसंरंजनाय प्र
योगांतरं ऐं क्लीं सौः स्त्रीं ब्लूं सः इति षडक्षरी मंत्रः अस्य मंत्रस्यादौ साध्यनाम संयोजयेत् अनेन मंत्रेण प्रयोग उ
च्यते पुष्यर्क्षेष्ट सहस्रं घृतेन हुत्वा शरावके न्यस्य संपातदशपुष्पैर्वर्तिं कृत्वा च तेन संसिच्य प्रज्वाल्य दीपिकायां
देवीं संपूज्य यंत्रमेय्यमथोन्नतनघटे लिखितो हरिद्रया स्मिन् मर्षां संपाद्य अस्मिन्यात्रे तावन्निक्षिप्य जपे
न्मंत्रं समृध्यै जनरंजनाय।।अस्यार्थः सायंतनानुष्ठानं कृत्वा प्रत्यङ्मुखो भूत्वा अष्टोर्ध्वशतं ६

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र॰सं॰ तु सहस्रमष्टोर्ध्वं त्रैलोक्यमोहिनी ह्रीं ड्रां पीरेया श्रीकरी संप्रोक्ता अथ मर्थः पुष्पनक्षत्रे अष्टोत्तरसहस्रं संख्येय
२२३ तेन हुत्वा संपातं च एकस्मिन् शरावके समपाद्य पुनर्दश पुष्पं पिष्टा तेन वर्त्तिं संपाद्य तां वर्त्तिमनेन संपाताज्येन संसिच्य
अनेन षडक्षरी मंत्रेण तां वर्त्तिं संजप्य पुनर्दीपे स्वयं वरा मूर्त्तिं संपूज्य तस्मिन्दीपे त्वनया वर्त्या मषीं संपाद्य पुनरेक
स्मिन् नूतनघटे हरिद्राजलेन पूर्वोक्तयंत्रं विलिख्य तस्मिन् घटे मषीं विनिक्षिप्य अनेन षडक्षरी मंत्रेण अष्टोत्तरसह
स्रं तत्स्पृष्ट्वा जप्त्वा नेत्रयोर्विलेपयेत् तस्मात्त्रैलोक्य वश्यं च श्रीकरं च भवेत् अथ यंत्रमुच्यते अथ कथया लिखमा
साद परं त्रैलोक्यमोहिनी यंत्रं अष्टदलाशं पत्रं विलिख्य तत्कर्णिकांतरे शक्तिं तस्या मध्ये जीवं साध्याख्यं कर्मपील
मपि कुर्यात् दृष्टी पार्श्वे द्वे द्वे शक्तिं परितश्च बाणमंत्रेण प्राणस्थापनमनुना ख्यावेष्ट्या शाद्दलस्थितां शक्तिं॥ संवेष्ट्य वा
प्रपत्रैश्चतुर्भिरपरैः क्रमेण विशदमतिः आग्नेय्या द्यष्टदलस्फुरन्मनोजन्मबीजमभिवेष्ट्य यंत्रांतरां च संस्थाप्य
रमालामंत्र मूलमंत्रैश्च ऐं क्लीं ब्लूं इत्येतैर्बीजैः संवेष्ट्य चाष्टपत्रस्य अजपा परमात्ममनुं गायत्री मंत्र यंत्रयोः सुलि
पिं विलिखेद्यथावकाशं हेमपट्टे सुवर्णलेखिन्या शोभनतरे मुहूर्ते यंत्रमिदं वांछितार्थदं नृणां अस्यार्थः प्रथमम नाम:
ष्टपत्रं पद्मं विलिख्य तत्कर्णिकामध्ये भुवनेशीं विलिख्य तन्मध्ये साध्यनामादीन् विलिख्य तत्र शक्तिं परितश्चेति २२३

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पश्चो थैहितीया तत्र कर्णिकायां विलिखित तस्य सर्वस्य परितः पंचबाणमंत्रैर्वक्ष्यमाणैः संवेष्ट्य तत्रैव तद्बहिः प्राण प्रतिष्ठां मंत्रेणापि संवेष्ट्य पुनः प्रागादि दिग्दलेषु भुवनेशीं विलिख्य तां बाण मंत्र चतुष्टयेन संवेष्ट्य पुनराग्नेयाद्रिदलेषु काम बीजं विलिख्य पंच बाण मंत्रेण तद्वेष्ट्य पुनस्तद्बाण पंचकं यंत्र मध्ये विलिख्य पुनस्तस्याष्टदलस्य बहिः क्लीं नमः काम देवायेत्यादि काम माला मंत्रैर्वक्ष्यमाणैश्च तद्बहिः कामबीजेन च एतद्बहिः ऐं क्लीं ब्लूं इत्येतैस्त्रिभिश्च पंचवृत्तेषु संवेष्ट्य पुनः हंस इत्यजपां सोहमिति परमात्ममनुं मंत्रराजाय विद्महे त्यादि मंत्र गायत्रीं यंत्रराजायेत्यादि यंत्र गायत्रीं च यथावकाशं विलिखेदिति अथ यंत्रांतरमुच्यते तिसृभिस्त्रिसृभिर्विंदुभिरूर्ध्वाधः संयुक्त षकारं सुसंवेष्ट्य रेखयोर्ध्वं बिंदु कृत्वा तदंतरानीत्वा एतद्यंत्रांतरमिति कथितं ज्ञेयं गुरूपदेशेन अयमर्थः षकारं विलिख्य तस्य बिंदुरेखया पकाराकार रेखया उपरिचाधस्तात्ताद्दशं बिंदुत्रयं यथा भवति तथा विलिख्य तद्रेखाग्रेण परितः संवेष्ट्य तदग्रे बिंद्वाख्यं विलिख्य तदग्रमंतः प्रवेशयेदिति अथ दश पुष्प संज्ञा लिख्यते सहदेवी दूर्वा मधुपा मुसली विष्णुदयिता सदाभद्रा लक्ष्मीः शतमखलताथांजलिकरी अस्यार्थः अस्य दशविध पुष्पस्य योजनार्थं परिमाणमुच्यते एकं धूर्जटिनयनं त्रयोदश हृच्च सप्त मनुरुद्रा फणि रवि दिङ्म भागा विहिताः अयमर्थः सहओनुकटंचु देविसुकटं

प्र.सं. चु इत्यादिप्रभागोक्तक्रमेण गंधद्वारामित्यादि मंत्रैरेकैकेरेकैकं संयोजयेत् अथवा गंधद्वारामित्यादि ऋचा सर्वं संयो
१२४ जयेदिति स्वयंवराकल्पः समाप्तः अथ स्वयंवरामंत्रप्रसंगात् कल्पांतरोक्तस्तन्यासो प्रयोग्यतावशात्लिख्यते
प्रथमं गुरुगणपतिवंदनादीन् कृत्वा ह्सैं सह्रैं एताभ्यां च मूलमंत्रेण च हृदयादारभ्य मूर्धपर्यंतं न्यसेत् एवं मं
त्रोदयं कृत्वा पुनः नववारभुवनेश्वर्या वृत्या रेचकं कृत्वा तद्द्विगुणावृत्या पूरकं कृत्वा द्वात्रिंशद्वारं भुवनेश्वरी पूर्वके
ण मूलमंत्रं त्रिवारेण कुंभक प्राणायामं च कृत्वा पुनः हस्ततले दक्षिण नासिका श्वासमार्गेण तेजस्वीकारपूर्वकं
मूलमंत्रेण देहे व्याप्य पुनः पीठन्यासं उपरि सप्तदश पटले वक्ष्यमाणप्रकारेण कुर्यात् तत्र नवशक्तिः प्रागत्रै
व स्वयंवराविधानोक्तप्रकारेण कुर्यात् पुनः हृदये समावाह्य प्राणप्रतिष्ठां च कृत्वा पुनर्मूलमंत्रेण त्रिवारं कुंभ
कं कृत्वा तेजस्वीकारपूर्वकं अंगैः करन्यासं कृत्वा पुनः पंचबाणैश्च करंन्यासं कुर्यात् द्रां द्रावणबाणाय नमः द्रीं
क्षोभणबाणाय नमः क्लीं वशीकरणबाणाय नमः ब्लूं आकर्षणबाणाय नमः सः संमोहनबाणाय नमः इति पं
चबाणायनमः मूलेन व्याप्य ह्रां हल्लेखायै नमः ह्रीं गगनायै नमः ह्रूं रक्तायै नमः ह्रैं करालिकायै नमः ह्रौं महो रा...
च्छुष्मायै नमः एतानि पंचतत्वानि शिरोवदनहृदयगुह्यपादेषु न्यसेत् पुनः शुद्धमातृकान्यासः पुनर्भुवनेश्व १२...

री पुटित मातृकान्यासः पुनः कामबीज पुटित मातृकान्यासः पुनर्भुवनेशी पुटित मूलमंत्रवर्णन्यासः तस्य स्था
नं शीर्षालिक श्रुतिविलोचन घोण गंड दंतोष्ठ पाणिपाद संधिषु साग्रकेषु आधारपार्श्वहृदय स्तन कक्षांसशी
र्षेषु विन्यसेत् मंत्र वरस्य वर्णान् इति अथ पदन्यासः शीर्षदक्षकपोलांसपार्श्वनाभ्यन्यपार्श्वके अंसतालुशि
रोवं अक्षि पृष्ठहृत्सु पदानि च एवं द्वादशधा विभज्य पदन्यासः पुनः क्षों चापाय नमः ज्यां ज्यायै नमः इति नेत्रद्वये चाप
रूपेण उपरिभागे चापमंत्रेण अधस्ताद्गुण मंत्रेण गुणरूपेण न्यसेत् पुनः पंचबाणामंत्रान् प्रागुक्तान् नेत्रश्रवणा
सिषु न्यसेत् पुनर्मध्यशिरसि चतस्रदिक्षु च पंचबाणान्यसेत् पुनः शिरोविदिक्षु चतत्र मध्ये च पुनः हस्तद्वय पंचसंधि
षु पुनः पादद्वये च तथैव पुनः मूर्धास्य हृद य गुह्य पादेषु च पंचबाणान्यसेत् पुनर्मुखे षट्कोणं संचिंत्य तन्मध्ये
कर्णिकायां ह्रीं क्लीं इति न्यस्य कोणेषु षट्सु वाग्भवं विन्यस्य ब्लूं सिति संधिषु स्त्रीं मिति कोणाग्रेषु विन्यस्य पुनः ह्रीं
कामदेवाय नमः क्लीं मन्मथाय नमः ऐं कंदर्पाय नमः ब्लूं मकरध्वजाय नमः स्त्रीं मनोभवाय नमः इति पंचमनोभ
वमंत्रैः नेत्रघ्राणेत्यादि वक्ष्यमाणस्थानेषु दशधा न्यस्य पुनः नेत्रघ्राणमुखेषित्यादि स्थानेष्वेव पंचबाणान्य
सेत् नेत्रघ्राणमुखेषु पाणिपादयोः साग्रेषु संधिषु अथो मूलाधार सलिंग नाभ्युदर हृत्पार्श्वांसगस्तने कंठांसन्नि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ग्र·स· कवक्त्रगंडरसनाघ्राणाक्षिकर्णालिकेष्वेतान्विन्यसतुक्रमेणदशधाबाणान् जगन्मोहनात् द्रांद्राविणेत्याद्युक्तः
१२५ पंचबाणमंत्रः एवंदशकृत्वापंचबाणान्यसेत् तत्रएकैकावृत्तेर्बाणन्यासस्य एकैकेनमंत्रेणच मध्येमध्येव्यापकंकुर्या
त् तेदशव्यापकमंत्राः कथ्यंते प्रथमंकामबीजं पुनःकामगायत्री पुनःकाममालामंत्रं पुनरश्वारूढा पुनः नित्य
क्लिन्ना पुनः श्रीबीजं पुनर्भुवनेशी पुनर्वाग्भवं पुनःह्रींकामदेवायनमः इत्याद्युक्ताः पंचमनोभवाः पुनर्मूलमंत्रः
एतैर्दशभिर्मध्येमध्येव्यापयेत् कामदेवायविद्महे पुष्पबाणायधीमहि तन्नोनंगःप्रचोदयात् इतिकामगायत्री
क्लींनमः कामदेवाय सर्वजनप्रियाय सर्वजनसंमोहनाय ज्वलज्वल प्रज्वल सर्वजनस्यहृदं ममवशंकुरुकुरुस्वा
हा इतिकाममालामंत्रः ओंह्रींक्रौंएहिपरमेश्वरिस्वाहा इत्यश्वारूढा ह्रींनित्यक्लिन्नेमदद्रवेस्वाहा इतिनित्यक्लिं
न्ना पुनः कामचापायेक्षुधनुषेनमः ज्यांज्यायेनमः इतिवामनेत्रे उपरिभागेचापमंत्रेणचापरूपेणान्यस्त्वा अध
स्ताद्गुणमंत्रेणगुणरूपेणचन्यसेत् पुनःद्रांद्राविण्येमकरध्वजाय द्राविणिबाणाय पद्मोत्पलहं क्लींहुंफट्स्वाहा
द्रीं द्रीं क्षोभिण्येमकरध्वजाय क्षोभिणीबाणायबिल्वोत्पलहं क्लींहुंफट्स्वाहा क्लींवशीकरिण्येमकरध्वजायवशीक रामः
रणिबाणायजंबूमलहं क्लींहुंफट्स्वाहा ब्लूंआकर्षिण्येमकरध्वजाय आकर्षणिबाणायरक्तोत्पलहं क्लींहुंफट्स्वा १२५

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हा सहसंमोहिन्ये मकरध्वजाय संमोहनबाणाय नीलोत्पलं हं क्लीं हुं फट् स्वाहा इति वा मनेत्रे पूर्वन्यस्त गुणे ऊर्ध्वमु
विन स्थिताः क्रमेण पंचबाणान्यस्तव्याः पुनः शुद्धमातृकान्यासं कृत्वा मूलमंत्रस्यांगऋष्यादीन् कृत्वा जप्यात् एवं
स्वयंवरान्यासविधिः अथ स्वयंवरान्यासप्रसंगात् वश्यकरमपि पंचबाणन्यासविधानमुच्यते द्रांद्राविणबाणा
यनमः द्रींक्षोभणबाणायनमः क्लींवशीकरणबाणायनमः ब्लूं आकर्षणबाणायनमः सः संमोहनबाणायनमः इ
ति पंचबाणमंत्राः एतैः स्वशरीरे न्यसेत् अथ स्थानमुच्यते नेत्रघ्राणमुखेषु पाणिपादयोः साग्रेषु संधिषु धोमूलाधा
रसलिंगनाभ्युदरहृत्पार्श्वी परांगस्तने कंठोसत्रिकवक्त्रगंड रसनाघ्राणाक्षिकर्णालिके घेतान्वि न्यसेत् क्रमेणदश
भावाणान् जगन्मोहनान् एतेषु स्थानेषु पंचभिर्बाणमंत्रैर्दशावृत्यान्यसेदित्यभिप्रायः पश्चात् काममंत्रं जपेच्च ॥
अथ वशीकरणादि मंत्रप्रसंगात् शत्रुमनोनयनतिरस्करणीमंत्रविधानमपि कल्पांतरोक्तं योग्यतावशाल्लिख्य
ते प्रजापतिर्ऋषिः महाबृहस्पतिश्छंदः तिरस्करणी देवता ध्यानं नीलं तुरगमधिरुह्य विराजमाना नीलांशुकाभ
रणमाल्यविलेपनाढ्या निद्रापदेन भुवनानि तिरोदधाना खड्गायुधा भगवती परिपातु सा नः ॐ ह्रीं नमो भगवति
महामाये मम सर्वपशुजनमनश्चक्षुस्तिरस्करणं कुरु कुरु हुं फट् स्वाहा अनेन मंत्रजपेन चोरादीनां नेत्रतिरस्करणं

प्र॰सं॰ भवति अथवागीश्वरीविधानमुच्यते कण्वऋषिः विराट्छंदः वागीश्वरीदेवता ऐंबीजं स्वाहाशक्तिः मातृकाव
१२६ दंगानि मंत्रस्यपदैः पंचभिः समस्तैश्चवा कुर्यादंगानि ध्यानं अमलकमलसंस्थालेखिनीपुस्तकोद्यत्करयुगल
सरोजा कुंदमंदारगौरा धृतशशधरखंडोल्लासिकोटीरचूडा भवतु भवभयानां भंगिनी भारती वः वदवदवाग्वा
दिनी स्वाहा इतिमंत्रः कः श्रोत्रवदननासावदनांधुगुदेषु विन्यसेद्वर्णान् अं कुमिति सीवनी प्रदेशः विद्याप्रधानो
यंमंत्रः अक्षरलक्षं जपेत् पुरश्चरणार्थे सितैः कमलैः पयः सिक्तैर्वा तिलैर्वा अयुतं पुरश्चरण होमः अथपू
जा एकपंचाशदक्षरयुतेक पंचाशद्दलमयं पद्मं विचिंत्य तस्मिन्नवशक्तिभिर्यजेत् मेधायै प्रज्ञायै विद्या
यै धियै धृत्यै स्मृत्यै बुध्यै विद्येश्वर्यै इतिपीठं संपूज्य तस्मिन्वागीश्वरीं समावाह्य समर्चयेत् अंगैः प्र
थमावृत्तिः योगायै सत्यायै विमलायै ज्ञानायै बुध्यै स्मृत्यै मेधायै प्रज्ञायै इतिद्वितीयावृत्तिः मातृभिस्तृतीया
वृत्तिः लोकपालैश्चतुर्थी अथप्रयोगः न्यासान्वितं निशातधीः प्रजपेत्सहस्रमन्हो अनुदिवसं प्रपिबेत्तथापः त
न्मंत्रिताः पुनरयत्नत एव वाचः सिद्धिर्भवेदभिमता परिवत्सरेण अयमर्थः अक्षरन्यासोत्क्रमेणान्यस्य प्राप्तः
प्रातः सहस्रसंख्यं मंत्रं नित्यशो जपेत् तथैव जलं चानेन मंत्रेण सहस्रवारं नित्यशोभिमंत्र्यपिबेत् एवंकृते व १२६

त्सराद्यादिसद्धिर्भवेत् प्रयोगांतरं हृदयद्वयसे स्थितोथतोयेरविबिंबे प्रतिपद्यवागधीशां जपतस्त्रिसहस्रसंख्य मर्वोक्कवि
तामंडलनोभवेत्स्रभूवा अस्यार्थः हृदयप्रमाणे जले स्थित्वा रविमंडले सरस्वतीं ध्यात्वा त्रिसहस्रं नित्यशो जपेत्।
एवंकृते मंडलात् कवित्वं भवति प्रयोगांतरं पलाशविल्वप्रसवैस्तयोश्चसमिद्वरैः स्वादुयुतैश्च होमः कवित्वसौ
भाग्यकरः समृद्धिलक्ष्मीप्रदोरंजनकृच्चिराय अयमर्थः पलाशबिल्वयोः पुष्पैश्च तयोरेव समिद्भिश्च त्रिमधुरसे
चितैः संख्यानुक्ते सहस्रमितिन्यायात् सहस्रं जुहुयात् कवित्वादिफलं भवति प्रयोगांतरं चतुरंगुलजैः समि
त्सहस्रैर्जुहुयाद्यो मधुरत्रयावसिक्तैः मनुजः समवाप्य धीविलासानुचिरात्काव्यकृतो भवेत्पुरोगः चतुरंगुलंको
न्ने अयमर्थः चतुरंगुलपुष्पैश्च तत्समिद्भिश्च मधुरत्रयसिक्तैः सहस्रं जुहुयात् कवित्वसामर्थ्यं भवति वा
गीश्वरीयंत्रांतरमुच्यते कण्वऋषिः विराट्छंदः वागीश्वरी देवता ऐं बीजं ह्रीं शक्तिः ऐं हृत् ऐं शिरः इत्याद्यंमानि
ऐं ओं हृत् ऐं ईं शिरः इत्याद्यंगानि ध्यानं हंसारूढां हसितहरहारेंदुकुंदावदाता वाणी मंदस्मितयुतमुखी मौलि
बद्धेंदुरेखा विद्यावीणामृतमयघटाक्षस्रगादीप्तहस्ता शुभ्राब्जस्था भवदभिमतप्राप्तये भारती स्यात् ॐ ह्रीं
ऐं सरस्वत्यै नमः ह्रीं ओं इति मंत्रः विद्याप्रधानोयं मंत्रः ससुषुम्णाये भ्रूयुग्ममध्येन वक्रे तथैव रंध्राणां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विन्यस्य मंत्रवर्णान् द्वादशलक्षं जपेत्पुरश्चरणार्थं अथपूजा ऐं इत्यस्य वाग्भवस्य पार्श्वयोः संस्कृतायै प्रकृतायै
इतिसमर्चयेत् एतदेवपीठम् अस्मिन्पीठे समावाह्य अंगैः प्रथमावृत्तिः प्रज्ञायै मेधायै श्रुत्यै लक्ष्म्यै स्मृत्यै वागी
श्वर्यै सुमत्यै स्वस्त्यै इति द्वितीयावृत्तिः मातृभिस्तृतीया इंद्रादिभिश्चतुर्थी एवंसंपूज्य सितसरसिजैश्च नामपुष्पैश्चं
पकपुष्पैश्च प्रत्येकंचतुःसहस्रसंख्यंजुहुयात् अथपुरश्चरणहोमः नागपुष्पंनागपुष्पु इतिमातृकाविभेदेन प्र
भजन्मंत्र इयंच मंत्रितमः प्रजपेदेनां स्तुतिमपि दिनशो वाग्देव्यनुग्रहाय बुधः अमलकमलाधिवासिनीमनसोवै
मल्यदायिनी मनोज्ञे सुंदरगात्रि सुशीले तवचरणांभोरुहन्नमामि सदा १ अचलात्मजा च दुर्गा कमला त्रिपुरेति भेदि
ताजगती यासात्वमेववाचामीश्वरि सर्वात्मना प्रसीद मम २ त्वच्चरणांबुरुहयोः प्रणामहीनः पुनर्द्विजातिरपि
भूयादनेलमूकस्त्वद्भक्तो भवति देवि सर्वज्ञः ३ मूलाधारमुखोद्गतबिसतंतुनिभप्रभाप्रभावतया विसृतलिपिजातावृ
तमुखकरचरणादिके प्रसीद मम ४ वर्णतनो मृतवर्णे नियतमनिर्वर्णिते पि योगीन्द्रैः निर्णीतिकरणदूरे वर्णयितुं
देहि देवि सामर्थ्यं ५ समुरासुरमौलिवरात्नमणिप्रभादीपितांघ्रिनलिनयुगे सकलागमस्वरूपे सर्वेश्वरि
संनिधिंविधेहि मम ६ पुस्तकजपवटिहस्ते वरदाभयचिन्हचारुबाहुलते कर्पूरामलदेहे वागीश्वरि शोधयाशुभ



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मचेतः ७ क्षौमांबरपरिधाने मुक्तामणिभूषणे मुदावसे स्मितचंद्रिकाविकासितमुखेंदुदिंबें बिके प्रसीद मम ८
विद्यारूपे विद्यानाशिनि विद्योदितेंतरात्मविदा गद्यैस्त पद्यजातैराद्यैर्मुनिभिस्तुते प्रसीद मम ९ त्रिभुवनीत्रयीन्दरू
पत्रिपुर त्रिदशाभिवंदितांघ्रियुगे त्रिक्षणविलासितवक्के त्रिमूर्तिमूलात्मिके प्रसीद मम १० वेदात्मिके निरुक्तज्योति
र्व्याकरणकल्पशिक्षाभिः सछंदोभिः संततकृतषडंगेंद्रिय प्रसीद मम ११ त्वच्चरणसरसिजे स्थितमहित विवि यानल्कि
प्यते दोषः भगवति भक्तिमतस्त्वयि परमो परमेश्वरि प्रसीद मम १२ बोधात्मिके बुधानां हृदयांबुज चारुरंग
नटनपरे भगवति भवभंगकरी भक्तिं भद्रार्थदे प्रसीद मम १३ वागीशी स्तवमिति यो जयार्चनाहवनहूति
षु सजपेत् सकुविमल चित्तवृत्तिर्देहावदि नित्य शुद्धमेति पदं॥ इति गीर्वाणेंद्रविरचिते प्रपंचसारसंग्रहे अष्टमः पट ते
लः॥ अथ सरस्वतीमंत्रप्रसंगात् सारस्वतप्रदं यद्वाग्वदंत्यृचो यंत्रं मंत्रसारोक्तमपि लिख्यते आलिख्य कर्णिकामध्ये
तारं कोणेषु षट्स्वपि अनुलोमविलोमांश्च बालां पत्रेषु चाष्टसु यद्वागिति ऋचा पादाक्रमेणाष्टौ विलिख्य च च
त्वार्यश्वा समर्पर्प्या हृचा मातृकयापि च आवेष्ट्य वाग्भवं बीजं आलिखेद्भूपुराहिषु ऋक्पंचकस्य वा देव्या यंत्रं स्वर्णा
दिनिर्मिते पट्टे संलिख्य चावाह्य वा चंसंपूज्य भक्तितः ऋचकादिषु संयोज्य धारयेद्यः शुभे दिने कवीनां तार्किका

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



णांचचक्रवर्त्ती भवेदसौ वचांपि श्रुलिखित्वैत द्रक्षयेद्यो स्यवे मुखात् घुसरि ल्लोल कल्लोल निभानि यो तिभारति इ
ति अस्यार्थः प्रथमं षट्कोणं विलिख्य तन्मध्ये प्रणवं विलिख्य तन्मध्ये साध्यनामादि यंत्रन्यायात् विलिखेत् पु
नः षट्सु कोणेषु ऐं क्लीं सौः सौः क्लीं ऐं इति एतान् बालामंत्राक्षरान् क्रमेण विलिखेत् पुनः अष्टदलं पद्मं विलिख्य
तेषु दलेषु यद्वाग्वदंत्यविचेतनानीति पूर्वदले विलिखेत् राष्ट्रीदेवानां निषसाद मंद्रा इत्याग्नेय्ये चतस्र ऊर्जं दु
दुहे पयांसि इति दक्षिणे क्वस्विदस्याः परमं जगाम इति नैऋत्ये देवीं वाचमजनयंत देवाः इति पश्चिमे तां विश्वरूपाः
पशवो वदंति इति वायौ सा नो मंद्रेषमूर्जं दुहाना इति सौम्ये धेनुर्वागस्मानुपसुष्टुतैतु इति ईशानदले विलि
खेत् पुनस्तद्बहिर्वृत्तत्रयं विलिख्य प्रथमे वृत्ते चत्वारि वाक्परिमितापदानि तानि विदुर्ब्राह्मणा ये मनीषिणः
गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंति इत्यनया ऋचा वेष्टयेत् पुनः द्वितीये वृत्ते ससर्परी
रमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता असूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्य्यं ससर्परीरभर
त्तूयमेभ्यो धि श्रवः पांचजन्यासु कृष्टिषु सा पक्ष्या ३ नव्यमायुर्दधाना यां मे पलस्तिजमदग्नयो ददुः इत्या
भ्यां ऋग्भ्यां वेष्टयेत् पुनस्तृतीये वृत्ते मातृकया वेष्टयेत् पुनः तद्बहिश्चतुरस्रं विलिख्य तत्कोणेषु ऐं सि



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निवाग्भवं विलिखेत् एवं स्वर्णादिपट्टे वा वचामिश्रित नवनीते वा विलिख्य भक्षयेद्यः तस्य वाक्पटुत्वादि फ
लं भवति ॥ अथ सारस्वत यंत्र प्रसंगात् मंत्रसारोक्तं यश्छंदसामृचो यंत्रमपि सारस्वत प्रदत्वेन लि
ख्यते षट्कोणकर्णिकामध्ये तारं कोणेषु वाग्भवं यश्छंदसामृचो वर्णान् पत्रेष्वष्टसु पंचशः अष्टमे षट् क्ष
रीं मे यो देवानामृचापि च आवेष्टि लिप्या कुग्रहकोणेषु च यथाक्रमं बालाबीजत्रयं मायाबीजं चापि समालिखे
त् यश्छंदसामृचो यंत्रं पट्टे स्वर्णादिनिर्मिते शुभे दिने समालिख्य धारयेद्यो यथाविधि मेधावी दीर्घजीवी चनी
रोगश्च प्रियंवदः बहुश्रुतः शास्त्रकर्त्ता श्रुता वेदागमात्क्वचित् न विस्मरति मर्त्यो सौ सर्वज्ञो भवति ध्रुवं अस्या
र्थः प्रथमं षट्कोणं विलिख्य तन्मध्ये साध्यनामादीन् विलिखेत् पुनः षट्सु कोणेषु ऐमिति वाग्भवं विलिखे
त् पुनरष्टपत्रेषु यश्छंदसामृषभो विश्वरूपः छंदोभ्योध्यमृतात्संबभूव स मेंद्रो मेधया स्पृणोतु अमृत
स्य देवधारणो भूयासं इत्यस्या ऋचो वर्णान् पंचशः पंचशो विलिखेत् अष्टमे पत्रे अवशिष्टाक्षरं विलिखे
त् पुनस्तद्बहिर्वृत्तत्रयं विलिख्य पूर्ववृत्ते शरीरं मे विचर्षणं जिह्वा मे मधुमत्तमा कर्णाभ्यां भूरि विश्रुवं ब्रह्म
णः कोशोसि मेधयापिहितः श्रुतं मे गोपाय इत्यनया ऋचा वेष्टयेत् पुनर्द्वितीयवृत्ते यो देवानां प्रथमं पुरस्ता

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



च
वेष्टयेत् पुनस्तृतीये वृत्ते मातृकयां वेष्टयेत् पुनस्तद्बहिश्चतुरस्रं विलिख्य तत्कोणेषु ऐं क्लीं सौः ह्रीमित्ये
तान्वर्णान् क्रमेण विलिखेत् एवं विलिख्य धृते उक्तफलं भवति ॥ अथ वागीश्वरीमंत्रप्रसंगात् मंत्रदेवताप्र
काशिकोक्तप्रकारेण वागीश्वरीमंत्रांतरं लिख्यते त्रिविक्रमऋषिः गायत्रीछंदः रुद्रवागीश्वरीदेवता वाबीजं
स्वाहाशक्तिः सांसर्वज्ञहृत् सींममृततेजोमालिनित्यतृप्तिशिरः सूंवेदवेदिनि अनादिबोधशिखा सैंव
ज्रिणे वज्रधराय स्वतंत्रकवचं सौंनित्यमलुसशक्तिसहजे त्रिरूपिणे नेत्रं सः अनंतशक्ति श्लीं पशु हुं
फट् पाशुपतास्त्राय सहस्राक्षराय अस्त्रं ध्यानं शुभ्राभां त्रीक्षणां दोर्भिर्बिभ्रती फलपुस्तके वराभ
ये सर्वभूषां रुद्रवागीश्वरीं भजेत् ओं वां श्रीं ह्रीं स्कें ह्रौं स्वाहा इति मंत्रः पूजादिकं दशाक्षरीवागीश्वरीवत्
अथ वागीश्वरीमंत्रांतरे काश्यपऋषिः गायत्रीछंदः विष्णुवागीश्वरीदेवता स्कैं बीजं श्रीं शक्तिः
बीजेनैव षडंगानि ध्यानं हेमाभां बिभ्रती दोर्भिः फलपुस्तककुंभकान् अभयं सर्वभूषाढ्यां विष्णुवा
गीश्वरीं भजेत् ॐ श्रीं स्कैं ह्रीं नमः इति मंत्रः वागीश्वरीमंत्रांतरं कण्वऋषिः विराट्छंदः मु
ख्यासरस्वती देवता वागीति बीजं प्लुः इति शक्तिः ऐं वाचस्पते हृत् अमृतशिरः प्लुवा शिखा प्लुः कवचं



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऐंवाचस्पते अमृतनेत्रे भुवः भुः अस्ले ध्यानं आसीना कमलाकरे जपवटीं पद्मद्वयं पुस्तकं बिभ्राणा
कमलेंदु कान्त्र मकुटा मुक्तेंदु कुंदप्रभा फालोन्मीलितलोचनाकुचभरक्लांता भवद्भूतये भूया द्वागधि
देवता मुनिगणे रासेव्यमाना निशं ऐंवाचस्पते अमृतपु वः भुः इति मंत्रः अथाक्षरन्यासः ब्रह्मरंध्रे
भुवोमध्ये नवरंध्रे च विन्यसेत् पूजादिके दशाक्षरवागीश्वरीवत् गोमूत्रपाचिताम्भ मुक्तापंचदश लक्षं ज
पेत्॥ अंकोलसर्पिषा अष्टसहस्रं पुरश्चरण होमः॥ अथचिंतामणि सरस्वती मंत्रः कण्व ऋषिः त्रिष्टुप् छं
दः ॐ ह्रीं ह्रां ह्रीं ॐ हृत् ॐ ह्रीं ह्रीं ह्रीं ॐ शिरः इत्याद्यंगानि ध्यानं हंसारूढा हरहसित हारेंदु कुंदावदाता
वाणी मंदस्मित युतमुखी मौलिबद्धेंदु रेखा विद्यावीणामृतमयघटाक्षस्रगादीप्तहस्ता शुभ्राब्जस्था भव
दभिमतप्राप्तये भारतीस्यात् ॐ श्रीं हसौं ह्रीं ॐ सरस्वत्यै नमः इति मंत्रः अथाक्षरन्यासः मूर्ध भ्रूमध्य श्रोत्र
नयननासापुटद्वयवदन गुह्य पादेषु एकादश वर्णान्न्यसेत् प्रागुक्त दशाक्षरी पीठे समावाह्य समर्चयेत् तत्र
देव्याः पार्श्वयोः ऐं संस्कृतायै नमः ऐं प्राकृतायै नमः इति अंगैः प्रथमावृत्तिः ॐ ऐं प्रज्ञायै ॐ ऐं मेधायै
ॐ ऐं श्रुत्यै ॐ ऐं स्मृत्यै ॐ ऐं शक्त्यै ॐ ऐं वागीश्वर्यै ॐ ऐं सुमत्यै ॐ ऐं स्वस्त्यै इति द्वितीयावृत्तिः मातृभिस्तृती

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



या इंद्रादिभिश्चतुर्थी वज्रादिभिःपंचमी एवं संपूज्य द्वादशलक्षंजपेत् सितसरसिजनागचंपकैः द्वाद
शसहस्रं पुरश्चरण होमः ॥ अथ सरस्वतीमंत्रांतरं कण्वऋषिः अनुष्टुप् छंदः वीणासरस्वतीदेवता ऐंबी
जं ह्रींशक्तिः विद्यार्थे विनियोगः ऐं ह्रां हृत् ऐं ह्रीं शिरः इत्याद्यंगानि ध्यानं प्रागुक्तसरस्वतीचिंतामणिव
त् पूजाध्याने ॐ ह्रीं ग्लीं सरस्वत्यै नमः ह्रीं ॐ इति मंत्रः अथ अक्षरन्यासः ब्रह्मरंध्रे भ्रुवोर्मध्ये नेत्रयोर्ना
सिकयोरास्ये लिंगे गुह्ये च न्यस्य समस्तेन व्यापकं कुर्यात् एवं न्यस्त्वा द्वादशलक्षं जपेत् त्रिमधुरसिक्तैः सित
सरसिजैर्द्विशतोत्तरसहस्रं पुरश्चरण होमः ॥ अथ सरस्वतीमंत्रप्रसंगात् सरस्वतीमंत्रांतरं ब्रह्माऋषिः ज
गतीछंदः वाग्देवीदेवता ऐंबीजं स्वाहाशक्तिः विद्यार्थे ऐं हृत् नमः शिर भगवति शिखा वद वद कवचं वा
ग्देवी नेत्रं स्वाहा अस्त्रं ध्यानं शुद्धां स्वच्छविलेपमाल्यवसनां शीतांशुखंडोज्ज्वलां व्याख्यामक्षगुणं सु
धाढ्यकलशं विद्यां च हस्तांबुजैः बिभ्राणां कमलासनां कुचनतां वाग्देवतां सुस्मितां वंदे वाग्विभवप्रदां त्रिन
यनां सौभाग्यसंपत्करीं ॥ ॐ नमो भगवति वद वद वाग्देवि स्वाहा इति मंत्रः लक्षजपः आज्यसिक्तैस्तिलैर्दशां रामः
शं पुरश्चरण होमः दशांशतर्पणं अथ प्रयोगः पिबेत्तन्मंत्रितं तोयं प्रातःकाले दिने दिने विद्यावत्सरतो १३०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मंत्री भवेन्नात्र विचारणा प्रयोगांतरं अभिषिंचेज्जुलैर्जतैरात्मानं स्नानकर्मणि तर्पयेत्तांजलैः शुद्धैर
तिमेधामवाप्नुयात् प्रयोगांतरं पुष्पगंधादिकं सर्वं तज्जप्तं धारयेत्सुधीः सभायांपूज्यते सद्भिर्वादे च
विजयी भवेत् ॥ अथ मंत्रदेवता प्रकाशिकोक्त सरस्वती मंत्र प्रसंगात् मंत्रदेवताप्रकाशिकोक्त नकु
लीसरस्वतीमंत्रोपिलिख्यते विश्वामित्र ऋषिः त्रिष्टुप्छंदः नकुलीसरस्वतीदेवता सारस्वतेमम
याद्जयेवाजपे विनियोगः बालाक्षरत्रितयेनानुलोमप्रतिलोमितेन षडंगानि ध्यानं वोष्ठाभ्यां पि
हितैश्च पंक्तिनिशितैर्दंतैर्घनैः संवृता दीक्षावह्निवदत्र सर्वजगतां यास्वामिनीसंततं सामांचारु करोतुवा
दनिभिपुणं सर्वत्र सावाग्रसा येनस्यामहमेवसर्वजगतामत्यर्थमग्रेसरः ताक्ष्यीरूढामहितललितानालु
जन्माविशांकीचंन्वदीणा कलरवशुकीचक्रशंखासिपाणिः राजोत्तं सामनसिनकुली राजतुश्या मलायाः प्र
त्सं गत्वं परिगतवती प्रत्यहं मामकीने ऐं वोष्ठापिधाना नकुली क्लीं दंतैः परिवृता पषिः सौः सर्वस्यै वाच
ईशाना चारुमामिह वादयेत् वदवद्वाग्वादिनीस्वाहा इतिमंत्रः अथन्यासः ससर्परीरमतिंबाधमा
ना इत्यनेनमूलाधारमारभ्यनाभिपर्यंतंन्यसेत् बृहन्निमायजमदग्निदत्ताइत्यनेन हृदयपर्यंतं न्यसेत्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



आसूर्यस्य दुहिता ततान इति कंठपर्यंतं न्यसेत् अवो देवेष मृत मजुर्य मिति ततआरभ्य मूर्धपर्यंतं न्यसे
त् पुनः अस्याः ऋचः प्रथमपादेन अधरोष्ठस्य दक्षिण भागे द्वितीयेन उत्तरोष्ठस्य दक्षिणभागे तृतीयेन उ
त्तरोष्ठस्य वामभागे चतुर्थेनाधरोष्ठस्य वामभागे न्यसेत् अथाक्षरन्यासः नकुली मंत्राक्षरैः प्रादक्षिण्ये
न वदने न्यसेत् समस्तेन जिह्वाग्रे ॥ अथ सरस्वती मंत्र प्रसंगात् मेधाधारणा सरस्वती मंत्रोपि लिख्य
ते व्यास भगवान् ऋषिः त्रिष्टुप् छंदः मेधाधारणा सरस्वती देवता मेधाधारणार्थे विनियोगः यश्छं
दसामृषभो विश्वरूपः इत्यादि श्रुतं मे गोपाय त्वं तं ऐं नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूया
सं क्लीं कर्णयोः श्रुतं मा च्यौ क्लीं ममामुष्य ॐ सौः इति मंत्रः अथ भुवनेश्वरी विधान मुच्यते शक्ति ऋषिः गा
यत्री छंदः बोधस्वरूपा संविद्देवता हं बीजं ई शक्तिः ह्रां हृत् ह्रीं शिरः इत्याद्यंगानि ध्यानं उद्यद्वास्वत्स
माभां विजितनवजपां सिंदुरखंडावनद्ध द्योतन्मौलीं त्रिनेत्रां विविधमणिलसत्कुंडलां पद्मगां चाद्दार ग्रैवेयकां
ची गुणमणिवलया द्यैर्विचित्रां वराढ्यां मंबां पाशांकुशेष्टाभयकरकमलां मंबिकां तां नमामि ह्रीं इति मंत्रः राम
ऐश्वर्यवश्यप्रधानोयं मंत्रः अथान्यासा मंत्र देवता प्रकाशिकोक्त प्रकारेण लिख्यंते पूर्वं करन्यासं कुर्यात् त १३१

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यथा ॐ ह्रौं हल्लेखां अंगुष्ठाभ्यां नमः ॐ ह्रैं गगना तर्जनीभ्यां नमः ॐ ह्रूं रक्ता मध्यमाभ्यां नमः ॐ ह्रीं करा
लिकाऽनामिकाभ्यां नमः ॐ ह्रां महोच्छुष्मा कनिष्ठिकाभ्यां नमः इत्यंगुष्ठाद्यंगुलिषु विन्यस्य ह्रः इत्यस्त्रं तल
योर्विन्यसेत् शक्तिऋषिः गायत्री छंदः बोधस्वरूपा सुखसंविद्देवता इति मूर्ध्नास्यहृदयेषु विन्यस्य हं बीजं
ईं शक्तिः चतुर्विधपुरुषार्थे विनियोगः ॐ ह्रौं हल्लेखायै ऊर्ध्ववक्त्रायै नमः ॐ ह्रैं गगनायै पूर्ववक्त्रायै न
मः ॐ ह्रूं रक्तायै दक्षिणवक्त्रायै नमः ॐ ह्रीं करालिकायै उत्तरवक्त्रायै नमः ॐ ह्रां महोच्छुष्मायै पश्चि
मवक्त्रायै नमः इत्यूर्ध्वादिवक्त्रेष्वंगुष्ठाद्यंगुलिभिर्विन्यस्य मूलेन व्यापकं कृत्वा ह्रां गायत्र्यै नमः ह्रीं सा
वित्र्यै नमः ह्रूं सरस्वत्यै नमः इति गलसव्यदक्षिणस्तनेषु विन्यस्य ह्रां ब्रह्मणे नमः ह्रीं विष्णवे नमः ह्रूं
रुद्राय नमः इति वामांसहृदयदक्षिणांसेषु विन्यस्य ॐ आं ब्रह्माण्यै नमः ॐ ईं माहेश्वर्यै नमः ॐ ऊं कौ
मार्यै नमः ॐ ऋं वैष्णव्यै नमः ॐ ॡं वाराह्यै नमः ॐ ऐं इंद्राण्यै नमः ॐ औं चामुंडायै नमः ॐ अः
चामुंडायै नमः ॐ अः महालक्ष्म्यै नमः इति शिरोललाटवामांसपार्श्वदक्षपार्श्वांसपृष्ठहृदयेषु वि
न्यस्य अं ब्रह्मगायत्रीभ्यां नमः उं विष्णुसावित्रीभ्यां नमः मं ईश्वरसरस्वतीभ्यां नमः श्रीं धनपतिश्री

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र॰ सं॰ भ्यां नमः क्लीं स्मरकान्तिभ्यां नमः गं गणपतिपुष्टिभ्यां नमः एतानि मिथुनानि दक्षकपोल वामकपोल वाम
१३२ कर्णमुखास्य दक्षिणकर्णेषु विन्यस्य ॐ शंखनिधये नमः ॐ पद्मनिधये नमः सव्यदक्षिणकर्णगंडांतरा
लयोर्विन्यस्य ॐ ह्रीमिति व्यापकत्रयं कृत्वा एवं न्यस्तशरीरो देवीमात्मत्वेन प्रविभावयेत् तत्र पाशां
कुशाभयवरदशब्दार्थमाह पातुर्दोस्तोरक्षण व्यापकार्थौ पाद्यो श्वाद्यस्तत्र भावात्तयोश्च सर्वे संरक्ष्या
थ सर्वात्म वायो व्यासोत्यं शस्यादसौ पाशवाची अंस्वादात्मा कुडराकुस्तनुर्वा भागार्थ स्यार्थोथवा वतिवाचि
भूश्चेद्भूतान्यन्यथा चेच्छरीराण्याहु व्यात्मन्याहरेदंकुशाख्यं स्मतेयथा संस्मृतिचक्रचक्र मोऽस्वाऽनापापस
मुत्थितादपि वियोजयत्यात्मतनुं नरं भयात्तथा भयस्यार्थं भयसंज्ञिता विभो मुख्यार्थवाची वरशब्द उक्त
स्याद्वाञ्छितार्थ श्व वराभिधारा मुख्यं तभीष्टं स्मृतिमात्रकेण ददाति यो सो वरदो वगम्यः इति द्वात्रिंशल्ल
क्षं जपेत् इति पुरश्चरणार्थं ह विद्या शीघ्रानन्दा शीघ्रा जपाद्दशांशमष्टद्रव्यैर्हुनेत् पुरश्चरणार्थं गुल सौदुग्ध
अ॰ श्व॰ तान्यष्टद्रव्याणि त्यौदुंबरजाः प्लक्षन्यग्रोधसंभवाः समिधः तिलसर्षपदौग्धघृतान्यष्टद्रव्याणि संप्रदिष्टानि राम
प्लक्षं इत्थित्र न्यग्रोधं वटं दौग्धं पायसं अथास्यालिपुणित यंत्रविधिर्लिख्यते शत्रयावि साध्यमिश्रानिल नि १३२

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

२

ॐ ति ग बीजा हि बद्धं पुरे गेनस्त त्कोणो क्लाति मायं हरिस्वर विलस दंड मेहिः समायैः वर्णैश्चा वेष्टितं तत्त्रि
गुणितमिति विख्यातमेतत्स्म यंत्रं स्यादायुष्यं च वश्यं धनकरममित श्रीप्रदं कीर्तिदं च अस्यार्थः प्रथ
मं त्रिकोणं विलिख्य तन्मध्ये भुवनेशीं विलिख्य तन्मध्ये साध्य नामादीन् विलिखेत् पुनस्त्रिषु कोणाग्रस्था
नेषु बहिर्भुवनेशीं विलिख्य तद्भुवनेशीत्रयमपि स्वस्यास्वस्या रेफांशाग्रेण स्वस्वमात्मानं प्रदक्षिणीकृत्य अ
नंतरामनंतरां भुवनेशीं बहिः कृत्य तृतीयाया भुवनेश्या ईकारांशेन योजयेत् पुनस्त्रिकोणकोणोदरेषु
त्रिष्वपि चतुर्थस्वर ईकारं सबिंदुकं विलिख्य पुनः कोणत्रयाणामपि पार्श्वयोर्हरिहर इत्यक्षरचतुष्टयं
एकैकस्मिन् पार्श्वे द्वौ द्वौ विलिखेत् पुनः बहिर्वृत्तत्रयं विलिख्य प्रथमे वृत्ते हरिहर इत्यक्षरचतुष्टयपू
र्वकं चतुर्थस्वराख्यमीकारं सबिंदुकं पूर्वलिखित भुवनेशीत्रितयांतराल प्रदेशांस्य ऋजुदेशे हरिईहर
ई इत्येवं प्रकारेण विलिखेत् पुनर्द्वितीये वृत्ते अनुलोममातृकावर्णैश्च वेष्टयेत् तृतीये तु चकारात्
प्रतिलोममातृकावर्णैश्च वेष्टयेत् तत्र आयुष्यं च वश्यं धनंकरममित श्रीप्रदं कीर्तिदं चेति आयुष्ये
वमपस्यं बीजं मृत्कं जयेनावेष्टयेत् वश्ये शाक्तेन बीजेन धनश्रियोः श्रीबीजेन कीर्तौ अजपया वेष्टये

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.से. न् एवं त्रिगुणित यंत्रे अथास्मिन् यंत्रे पूजाविधिः कथ्यते जयायै विजयायै अजितायै अपराजितायै नि
१३२ त्यायै विलासिन्यै दोग्ध्र्यै अघोरायै मंगलायै एतास्तु नव शक्तयः ह्रीं श्रीं भुवने श्वर्यासनाय नमः ह्रीं भुवनेश्व
री मूर्तये नमः इति कर्णिकायां इति पीठमंत्रः अस्मिन् पीठे समावाह्य देवीं संपूजयेत् तत्र पाशांकुशधरा र
क्तवस्त्राभरणभूषिता नवशक्तयः पुनः प्रथमं ह्स्ल्रे स्वायै नम इति पुरतः संपूजयेत् गगनायै रक्तायै करालि
कायै महोच्छुष्मायै इति प्रागादिदिक्षु एतास्तु प्रधानदेवता सदृश्यः एवं प्रथमावृत्तिः अंगैर्द्वितीयावृत्तिः पुनः गा
यत्र्यै नमः इत्यैं ध्रां सावित्र्यै इति नैर्ऋत्यां सरस्वत्यै इति वायौ ब्रह्मणे इति आग्नेये विष्णवे इति वारुणे रु
द्राय इत्यैशान्ये पुनरेतासां मूर्तीनां वर्णान्युच्यंते रक्तारक्ताकल्या चतुर्मुखी कुंडलिकाक्षमाले दधती गायत्री
तादृश एव ब्रह्मा अरिदर गदाब्ज हस्त किरीट केयूर हार संभिन्ना सावित्री तादृगूप एव विष्णु श्टंकाक्षाभयवरदां
दधती चन्द्री क्षलेंदुकलित जटाविकृताकल्या सरस्वती ईश्वरस्तादृग्रूपा एवं तृतीयावृत्तिः मातृभिस्तु तुर्यावृत्ति
इंद्रादिभिः पंचमी एवं त्रिगुणिते भुवनेश्वरीं पूजयेत् ॥ अथ षड्गुणित यंत्रक्रमः कथ्यते शक्तिप्रग्रस्तसाध्यं हरशरक राम
लमायावृतं वह्निगेह द्वंद्वाश्री प्रासमायं प्रतिविवरलसच्छक्तिबद्धं बहिश्च कोणाद्य द्वंद्व द्वंडी त्रिलिपिह रिहराव १३२

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्वंगडं विलोमार्णोवीतंकोयुगाष्टोदरनृहरिश्चिंतारमकं षड्गुणाख्यं षडंगुलप्रमाणेन वर्त्तुलं कर्त्तुरालिखेत् ष
डंगुलावकाशेन तद्बहिश्च प्रवर्त्तयेत् वर्त्तुलं तावताभूयस्तद्बहिश्च तृतीयकं मध्यवर्त्तुलमध्येतु हल्लेखाबी
जमालिखेत् द्वितीयवर्त्तुकाश्लिष्टमीषच्छ्लिष्टषडस्रकं पुटितं मंडलंवन्हेरस्रश मध्यवर्त्तुलं इंद्राग्निरक्षो वरुण
वाय्वीशाक्ताश्रकं लिखेत् षट्सु कोणांतरालेषु हल्लेखाषट्कमालिखेत् एकैकांतरितास्तासु संबध्युरितरेतरं
शिखाभिरांतराभिस्तु बाह्यावाह्याभिरांतराः मध्यवर्त्तुलसंस्थाया हल्लेखायाः कपोलयोः अधरे साध्यनामार्णसा
धकस्योत्तरे लिखेत् अंतराग्निः श्रियोः कर्मसाधकांशे समालिखेत् हरमायां पंचकृत्वा स्वरवहिर्गगीवर्त्तुलं तद्ब
हिः शरमायांच कलमायांच तद्बहि लिखेन्मायांबिंदुमतींवन्हे कोणेषु षट्स्वपि वन्हेः कोणत्रये श्रीमत्यहिये त्रि
तयं लिखेत् शक्तिः श्रीकामबीजानां सदंडं साधकार्णवत् वन्हेस्तु वन्हिपत्नीयेतान्येवादंडवंतिच ससाध्यनामव
र्णानि सप्तनिष्टानभाजिच वाह्यरेखामंतरास्तु वर्णाः क्रमगताः शुभाः तद्बहिः प्रतिलोमाश्चतास्तु लेखक पश्चा
त् ततो विदर्भितं भूमेर्मंडलद्वयमालिखेत् महद्दिकु रुद्धनृसिंहार्णं चिंतारत्नाश्रितास्रकं बहिः षोडशसु लांछो
भनव्यक्तवर्णवत् एतद्यंत्रं समालिख्य पद्ममारचयेत्ततः रुचिरद्वादशादलं षट् त्रिंशत्केसरोज्वलं पूर्वोक्तलक्षणोपेतं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. शुभदृष्टि मनोहरं इति अस्यार्थः तत्र शक्ति प्रथम साध्यं हृल्लेखां तन्निलिखतु साध्य साधक कर्माक्षरं हरशरकल
१३४ मायावृतं हरशरकल इत्यक्षर इयत्रिकं मायाख्येन तुरीयस्वरेण संयोज्यते स्त्रिभिर्बीजैः हृल्लेखया तद्बहिः श्रीबीजेन
तद्बहिः कामबीजेनावृतं वह्निगेह इंद्राग्नि प्रास्तमायं षट्कोणेषु विलिखितं चतुर्थः स्वरं प्रतिविवरलसच्छक्तिकद्वंद्व
हिअव षट्कोणा द्बहिः षट्सु कोणांतराळेषु लिखितैः हृल्लेखा बीजैरभिबद्धं कोणाग्रे हं ह दंडी त्रिलिपि दंडो नुस्वारः
त्रिपुकोणे षु सानुस्वारः त्रिषु कोणेषु अनुस्वाररहितश्च प्रोक्तान्यक्षराणि त्रीणि लिखेदित्यर्थः हरिहरावद्गं गंडं ह
रिहरेत्यक्षरचतुष्टयेन संयुक्त कोण पार्श्वं इयं विलोमार्णवीतं प्रतिलोमैर्मातृकाक्षरैरावीतं कोयुगाष्टादर नृह
रि चिंताश्मकं कोः भूमेः युगद्वयं चतुरश्र द्वयमित्यर्थः अष्टोत्तरे अष्टसु कोणेष्वित्यर्थः नृहरि चिंताश्मकं नृसिंहैका
क्षर चिंतामण्येकाक्षरं च भवेत् इति एतदुक्तं भवति प्रथमं षडंगुल प्रमाणेन कर्णिकावृत्तं विलिख्य तद्बहिरपि
परितः षडंगुल मानेन वृत्तं विलिख्य कर्णिकाख्य प्रथम वृत्त मन वृत्तं विलिख्य तद्बहिरपि तथैव षडंगुलमाने
न तृतीयं वृत्तं विलिख्य कर्णिकाख्य प्रथम वृत्त मध्ये भुवनेशीं विलिख्य तस्या अधस्तात् रेफांश प्रदेशे साध्यनामा रामः
सं विलिख्य तस्या भुवनेश्या उपरिभागे ईकारांशे साधकस्य नामांशं च विलिख्याग्न्याख्य रेफांश रेखाश्च स्त्रियः १३५

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्य ईकारांशरेखाश्च मध्ये तत्रापि साधकनाम प्रदेशो कर्मपदं च विलिख्य पुनस्तस्य कर्णिकावृत्तस्य बहिः
कर्णिकावृत्तं यथा उदरे भवेत् तथा भुवनेशीं बहिर्बहिः पंचकृत्वो विलिख्य तद्बहिः श्रीबीजं च तथैव बहि
र्बहिः पंचकृत्वो विलिख्य तद्बहिरपि तथैव कामबीजं च पंचकृत्वो विलिखेत् एवं विलिखेत् कामबीजोदरे श्री
बीजं तदुदरे भुवनेशीं तदुदरे कर्णिकावृत्तं च भवति तद्बहिर्द्वितीयवृत्तस्यांतषट्कोण द्वितीयवृत्तेन इष
त्स्लिष्टं प्रथमवृत्तेन सर्वथा अस्लिष्टं च इंद्राग्निरक्षो वरुणेशवायुदिग्गतकोणं च यथा भवेत्तथा विलि
ख्य तद्बहिस्तत्कोणांतरालेषु भुवनेशीं विलिख्य तस्या भुवनेश्या रेफांशरेखाया स्वस्वमात्मानं प्रदक्षिणी
कृत्य द्वितीया द्वितीयां भुवनेशीं वहिष्कृत्य तृतीयाया भुवनेश्या ईकारांशेन संबंधीनयात् पुनस्तथैव त
स्या भुवनेश्या ईकारांशेनापि द्वितीयां द्वितीयां भुवनेशीमंतः कृत्वा तृतीयाया भुवनेश्या रेफांशेन योजये
त् पुनः षट्स्वकोणेषु मायाबीजं चतुर्थस्वरं सबिंदुकं विलिख्य पुनः षट्कोणस्य श्रीमत्पश्चीयं मायापश्चीयं
पूर्वार्धगतकोणत्रयमित्यर्थः तेषु कोणत्रितयाग्रप्रदेशेषु सबिंदुकानि साधकनामयुक्तानि भुवनेशी श्रीबी
ज कामबीजरतिक्रमेण विलिख्य पुनर्बहिः पश्चीयं रेफ पश्चीयं षट्कोणस्य पश्चिमार्धगतकोणत्रितयमित्य

For Private And Personal

प्र.सं. र्थः नेत्रुकोणत्रिलोयाग्रप्रदेशेषु भुवनेशी श्रीबीजकामबीजानि बिंदुरहितानि विसर्गयुक्तानि साध्यनाम
१२५ युक्तानि चक्रमेण विलिखेत् पुनः कोणकपोलेषु हरिहर इति वर्णचतुष्टयं एकैकस्मिन् कपोले द्वंद्वशो वि
लिखेत् पुनस्तद्बहिस्तृतीयवृत्तस्यांतरनुलोमगतमातृकावर्णैर्वेष्टयेत् तत्रैवानुलोमगतवर्णवेष्टनाद्ब
हिः प्रतिलोमगतवर्णैश्च वेष्टयेत् पुनस्तस्माद्वृत्ताद्बहिरष्टकोणं विलिख्य प्रागादिमहादिक्स्थकोणचतु
ष्टयेपि नृसिंहैकाक्षरं विलिखेत् आग्नेयादिविदिग्गतकोणचतुष्टयेपि चिंतामणिबीजं सप्तविंशत्य कले
वक्ष्यमाणं विलिखेत् कोणाग्रेषु शूलानि विलिखेत् एतावत्पर्यंतं षट्कोणित यंत्रस्वरूपं पुनः पद्ममारच
येत्तत इत्यादि पूजामंडलविशेषः अथास्मिन्यंत्रे पूजाविधिर्लिख्यते प्रागुक्तत्रिगुणितोक्तवद्देवपीठ
नवशक्त्यादयः तस्मिन् भुवनेशीं समावाह्य अंगैः प्रथमावृत्तिः तद्बहिः षट्सु कोणेषु गायत्र्यै ब्रह्मणेन
मः इति ईशानकोणे पुनः सावित्र्यै विष्णवेनमः इति आग्नेयकोणे सरस्वत्यै महेश्वराय इति मध्यकोणे
श्रियै धनदाय इति निर्ऋतिकोणे रत्यै मदनाय इति पश्चिमकोणे पुष्ट्यै गणनाथाय इति वायौ एवं द्विती गा.
यावरणं पुनस्तद्बहिर्द्वादशदलेषु रमायै अनंगकुसुमायै कुसुमातुरायै नित्यायै अनंगमदनायै म १२५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दनोतुरायै गौर्यै गगनायै गगनरेखायै पद्मायै भयप्रमथिन्यै शशिरेखायै एवं तृतीयावृत्तिः मातृभिश्चतु
र्थ्यावृत्तिः इंद्रादिभिः पंचमी वज्रादिभिः षष्ठी इत्थं षड्गुणिते पूजाप्रकारः ॥ इति प्रपंचसारसंग्रहे गीर्वाणेंद्रवि
रचिते नवमः पटलः ॥ अथ द्वादशगुणितयंत्रविधानं वक्ष्ये व्याहृत्यापीतशक्तिज्वलनपुरयुगद्वंद्वसंयुक्तश
क्त्यावीतं कोणेष्वथ दुर्बीजकमनुचकपोलात्तगायत्रिमंत्रं आग्नेय्यावीतमर्णैर्वृतमनुविगते भूपुराभ्यंचरं भेस्मौं
चिंतारत्नक द्वादशगुणितमिदं यंत्रमिष्टार्थदायी पूर्वोक्तं मानकृत्या मंत्रोन्वितयं विलिख्य वृत्तानां विलिखेदंत
र्वर्तुलमनुशक्तिं स्पष्टबिंदुनिष्टानां द्वादशमध्यवर्तुलरेखया नहि शालिखेत्तु शक्तीनां हरियमवरुणधनाधिपदिक्षु
द्वे द्वे च ताः क्रमेण चास्तुः ईशानाग्निनिर्ऋतिमरुतादिक्ष्वेकैकं विलिख्य भूयश्च बीजांतराळनिर्गतशूलांकितको
णषट्कयुगमग्नेर्मंडलयुगयुगलं स्यात् अस्पृशदांतरिवर्तुलं निशदं शक्तिं मवेष्टये त्प्रतिलोमव्याहृतिभिरंत
स्थांरविकोणेषु दूरं तां मायां विलिखेदथास्त्र बिंदुमतीं एकैकांतरितास्तां परस्परं शक्तयश्च संवध्युः गायत्रीप्रति
लोमतः प्रविलिखेदग्नेः कपोलं बहिः द्वे द्वे चैव लिपिबहिश्च रचयेत् भूयस्तथान्तिशुभं वर्णान् प्रातुमनाश्च भूपुर
युगे सिंहाख्यं चिंतामणिं लिख्याद्यंत्रमशेषदुःखशमनायोक्तं पुरा देशिकोक्तेः बहिरथ षोडशपत्रं वृत्तविचित्रंवरा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· शिवीथियुतं रचयन्मंडलमेवं पुनरत्र निधापयेत्कलशं इति अस्यार्थः तत्रव्याहृत्यापीनशक्तिः व्याहृतित्रयाक्षरैः
१३६ प्रतिलोमैर्वेष्टितं हल्लेखाबीजं ज्वलनपुरयुगद्वंद्वसंध्युत्थशात्तयावीतं वन्हिपुरद्वंद्वद्वयकोणसंधिषु लिखे
त् हल्लेखादिरावीतं प्राग्वद्द्वादशभिर्हल्लेखाभिः एकांतरितमावीतं आबद्धमित्यर्थः कोणाग्रदुबीजकं कोणेषु
द्वादशसुलिखितदु ह्रीं इत्यक्षरद्वयजनितकं बिंदु एतदुक्तं भवति दुकारह्रीकाराक्षरे विलिख्य तयोरुर्ध्वम
नुस्वारं विलिखेदिति अनु अनंतरं चकारः समुच्चये कपोलाक्त गायत्री मंत्रं कपोलेषु प्राग्वद्विलिखितगा
यत्रीमंत्राक्षरं आग्नेयावीतं जातवेदसाऋचा अनुलोमेनच प्रतिलोमेनचवीतं वर्णैवृतमनुविगतेः अका
रादिक्षकारांतैर्मातृकावर्णैरनुलोमेनच प्रतिलोमेनचवृतं भूपुराभ्यांचतुरश्राभ्यां चकारः समुच्चये अश्रे
षु क्ष्रौं चिंतामणि भूपुरद्वयकोणचतुष्टये क्ष्रौं मितिस्वलुप्तदानं नृसिंहबीजस्य कोणकोणेषु चिंतारत्नाख्य उप
रि अनलकषमेत्यादिना वक्ष्यमाणबीजमालिखेदित्यर्थः द्वादशगुणितमिति संज्ञा एतदुक्तं भवति प्रथमं कर्णि
काख्यं वृत्तं षडंगुलमानेन विलिख्य तद्बहिरपि तथैव षडंगुलविशालेनवृत्तद्वयं विलिख्य कर्णिकावृत्त रा·म·
मध्ये भुवनेशीमंत्रः साध्यनामयुक्तो बहिः प्रतिलोमव्याहृतिभिस्त्रितयवेष्टितान् विलिख्य पुनः कर्णिकावृत्तमध्ये १३६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्वादश भुवनेश्वीर्विलिखेत् तत्र प्रागादि महादिक्षु भुवनेशी द्वंद्वं विलिख्य आग्नेयादि विदिक्षु एकैकां च
भुवनेशीं विलिखेत् पुनस्तद्बहिस्तृतीयवृत्तस्यांतः पूर्वपश्चिमतः षट्कोणं विलिख्य तदुपरि दक्षिणोत्तर
तश्च षट्कोणस्याष्टकर्णिकावृत्तं विलिख्य द्वादशसु कोणेषु दुमिति दुर्गा बीजं च भुवनेशीं च सर्वत्र अंतर्बहिः
क्रमेण विलिखेत् एवं विलिखितेऽस्य दुर्गाबीजो निर्गतानि बहिर्मुखानि द्वादश शूलानि विलिखेत् एवं विलि
खिते शूलांतराले द्वंद्वकोणस्य कपोलदेशो भवति तस्मात्कपोलभूतेषु त्रिशूलांतरालेषु चतुर्विंशतिषु
प्रसिद्धगायत्रीवर्णान् प्रतिलोमात्क्रमेण एकैकं विलिख्य पुनर्द्वादशकोणकपोलेषु द्वादश भुवनेशीं
विलिखेत् तासां रेफांशेन च ईकारांशेन च एकैकांतरितक्रमेण पूर्वप्रोक्तषड्गुणितयंत्रप्रोक्तवत्ताः शक
यः संबध्यः पुनस्तद्बहिस्तृतीयवृत्तस्यांतः प्रथमं जातवेदसे इति मंत्रवर्णैरनुलोमितैर्वेष्टयेत् पुनस्तत्रैव
तद्बहिस्तन्मंत्र प्रतिलोमवर्णैश्च संवेष्य पुनस्तत्रैव तद्बहिर्मातृकावर्णैश्च तथैवानुलोमितैश्च प्रतिलोमितैश्च
वेष्टयेत् पुनस्तृतीयवृत्ताद्बहिरष्टकोणं विलिख्य तस्य कोणेषु प्रागादिक्रमेण नृसिंहबीजं आग्नेयादिकोणेषु
सप्तविंशत्पटले वक्ष्यमाणचिंतामणिबीजं च विलिखेत् एतावत्पर्यंतमुक्तं द्वादशगुणितयंत्रस्वरूपं बहिरथवाड

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. शापत्रमित्यादियंथैः पूजामंडलविशेष उक्तः ॥ इति द्वादशगुणितयंत्रं ॥ अथास्मिन्यंत्रे भुवनेश्वरीपूजाविधिः पीठा
१२७ र्चनावाहनादीन् पूर्वोक्तवदेवकृत्वा पुनरंगैः प्रथमावृत्तिः पुनः हल्लेखायै गगनायै रक्तायै करालिकायै इतश्च
गादिदिक्षु चतसृभिर्द्वितीयावृत्तिः मातृभिस्तृतीयावरणं पुनः कराल्यै उमायै सरस्वतीदेव्यै दुर्गायै शच्यै
उषायै लक्ष्म्यै श्रुत्यै स्मृत्यै धृत्यै श्रद्धायै मेधायै मत्यै कांत्यै आर्यायै इति षोडशभिश्चतुर्थावरणं पुनः विद्या
यै ह्रियै पुष्ट्यै प्रज्ञायै सिनिवाल्यै कुह्वै रुद्रवीर्यायै प्रभानंदायै पोषिण्यै ऋद्धिदायै शुभायै कालरात्र्यै
महारात्र्यै भद्रकाल्यै कपालिन्यै विकृत्यै दक्षिण्यै मुंडिन्यै इंदुखंडायै शिखंडिन्यै निशुंभमथिन्यै महिषा
सुरमर्दिन्यै इति द्वात्रिंशद्भिः पंचमावरणं पुनः पिंगलाक्ष्यै विशालाक्ष्यै समृध्यै वृध्यै श्रद्धायै स्वाहायै स्वधा
यै मायायै वसुंधरायै त्रिलोकधात्र्यै गायत्र्यै सावित्र्यै त्रिदशेश्वर्यै स्वरूपायै बहुरूपायै स्कंदमात्रे अच्यु
तप्रियायै विमलायै अमलायै मूर्द्धायै श्यामायै अरुणायै तरुण्यै प्रकृत्यै विकृत्यै सृष्ट्यै स्थित्यै संहृत्यै संध्या
यै मात्रे सत्यै हंसायै मदिरायै वक्रिकायै देवमात्रे भगवत्यै देवक्यै कमलासनायै त्रिमुख्यै सप्तमुख्यै सु राम
रविमर्दिन्यै असुरविमर्दिन्यै लंबोष्ठ्यै ऊर्ध्वकेश्यै बहुसिंहायै वृकोदर्यै रथरेखायै शितिरेखायै गग १२७

इंद्राण्यै रुद्राण्यै शंकरार्द्धशरीरिण्यै नार्यै नारायण्यै त्रिशूलिन्यै पालिन्यै अंबिकायै आल्हादिन्यै ७

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नवेगायै पवनवेगायै भुवनपालायै मदनातुरायै अनंगायै अनंगमदनायै अनंगमेखलायै अनंगकुसुमा-
यै विश्वरूपायै असुरभयंकर्यै अक्षोभ्यायै सत्यवादिन्यै वज्ररूपायै शुचिव्रतायै वरदायै वागीश्वर्यै एता
भिः श्चतुःषष्टिसंख्याभिः षष्ठावरणं इंद्रादिभिः सप्तमी वज्रादिभिरष्टमी एवं द्वादशगुणित यंत्रे भुवनेशीं पूजयेत्
अथ पाशांकुशवर्णमध्यगतरूपाया भुवनेश्वर्या घटार्गलायंत्रमुच्यते आं ह्रीं क्रो मिति पाशांकुशाभ्यक्षरमंत्रः त्र्य
दिके पूर्वोक्त शुद्धभुवनेश्वर्युक्तवदेव अष्टाशास्तार्गला विर्हलयवरयुतं पूर्वपार्श्वात्यषट्कं कोणोद्यत्स्वांगसाष्टाक्षरयु
ग युगलाष्टाक्षराख्यं बहिश्च मायोपेतात्मयुग्मस्वरमिलितलसत्केसरं साष्टपत्रं पद्मे तन्मध्यवर्त्ती त्रितयपरिलसत्पाश
शक्त्यंकुशार्णं पाशांकुशावृत्तमनुप्रतिलोमगैश्च वर्णैः सरोजपुटिते न घटे न चापि आवीतभीष्टफलभद्रघटं त
देतद्यंत्रोक्तमन्विह घटार्गल नामधेयं प्राक्प्रत्यगर्गलेहलमथ पुनराग्नेयमारुते च हयमंदक्षोत्तरे ह वर्णैः क्रतशो
वेहरद्विपंक्ति लिखेद्विलिखेच्च कर्णिकायां पाशांकुशसाध्यसंयुक्तां शक्तिं आभ्यंतराष्टकोष्ठं गान्यवशेषितेषु चाष्टार्णी
कोष्ठेषु षोडशस्वथ षोडशवर्णा तथा मनुमंत्री पद्मस्य केसरेषथ युगस्वरात्मान्वितां तथा मायां एकैकेषु दलेषु त्रिशस्त्रिशः
कर्णिकागतान्वर्णान् पाशांकुशबीजाभ्यां प्रवेष्टयेद्बाह्यतश्च नवि नस्य अनुलोमविलोमगतैः प्रवेष्टयेदक्षरैश्च तद्बाह्ये त

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. दनुघटेन सरोजस्थितेन च तद्व्यक्तं भुजं च लिखेत् ह्रिंह्रंतिका प्रतिष्ठा संदिष्टा पाशबीजमिति मुनिभिः भूर्देहनाव्यापि
१२९ निशाधरखंडान्वितो कुशो भवति पाशः श्री शक्तिस्मर मन्मथ शक्तीं द्रिंकुशाश्वेति एकं कामिनि रंजिनि ठद्वयम परमि
हाष्टवर्णी स्यात् अथ गौरीरुद्रदयिते योगेश्वरि कवचास्त्र वह्नितयैः बीजादिकमिद मुक्ते शाक्तेयं षोडशाक्षरं मंत्रं अस्यार्थः ॥
पाशांकुशाभ्यां शक्तिबीजं संपुटीकृत्य जपादिके कुर्यात् अस्य मंत्रस्य घटार्गलं नाम यंत्रं तदपि वक्ष्ये प्रथमं सूर्यकिरण
वत् अष्टदिक्षु प्रसृतादीर्घायमाना अर्गलासंज्ञिका अष्टौ द्वद्वरेखा विलेखनीयाः पुनस्तासां सर्वासामादिसंधौ वृत्तं विलि
ख्य पुनश्चतुरंगुलं विहाय तदुपरि परितो वृत्तं विलिख्य पुनः सर्वार्गलामध्यदेशेपि वृत्तं विलिख्य पुनस्तद्वहिरपि रेखाग्रा
त्साक्चतुरंगुलमानांते पि वृत्तं कृत्वा पुनस्तदुपरि पूर्वलिखितार्गलाष्टकोणांतरालेष्वपि वृत्तादारभ्य अर्गलाष्टकं पूर्वलि
खितार्गलाष्टकाग्रसमानं विलिख्य तासां षोडशार्गलानाममेष्वपि वृत्तरेखां विलिखेत् पुनः प्रथमवृत्तमध्ये आं ह्रीं क्रो
मिति पाशांकुशात्र्यक्षरीं विलिखेत् तत्र तु भुवनेशीपार्श्वे द्वंद्वे पाशांकुशबीजद्वयं भुवनेशीमध्ये साध्यनामादीन् वि
लिखेत् पुनः प्रथमवृत्ताद्वहिरष्टसु कोष्ठेषु भुवनेश्वर्याः षडंगानि आग्नेयादि विदिक्षु अर्चनाक्रमेण विलिखेत् पुनस्त ग.म
द्वृत्ताद्वहिः स्तृतीयवृत्ते अष्टसु कोष्ठेषु शाक्तेयमष्टाक्षरं विलिखेत् तन्मंत्रप्रकारः पाशः श्रीशक्तिस्मर मन्मथ शक्तीं द्रि २३

For Private And Personal

गोकुशात्मकं आं श्रीं ह्रीं क्लीं क्लीं ह्रीं श्रीं क्रों इति मंत्रवर्णान् विलिखेत् पुनस्तद्बहिरपि चतुर्थे वृत्ते अष्टसु कोष्ठेषु अपरं शाके द्वात्रिंशाक्षरं विलिखेत् तत्प्रकारः कामिनि रंजिनि स्वाहेति पुनस्तद्बाह्ये षोडशकोष्ठेषु ॐ गौरी रुद्रदयिते योगेश्वरि हुं फट् स्वाहा इति शाकेयं षोडशाक्षरं क्रमेण विलिखेत् पुनरष्टास्वर्गलासु वक्ष्यमाणान्मंत्रान् वक्ष्यमाणक्रमेण विलिखेत् तत्र प्रथमं पूर्वार्गलायां यमेंद्रबीजरूपं हकारलकारस्वरूपं ह्लां ह्लीं ह्लूं ह्लैं इति चतुष्टयं कर्णिकापर्यंतादुत्तरत आरभ्य अर्गलाग्रांतमालिख्य पुनस्तत्रैव अर्गलाग्रमारभ्य दक्षिणांतं कर्णिकापर्यंतं तदेव बीजं ह्लूं ह्लूमिति अवशिष्टाक्षरद्वयं विलिखेत् पुनः पश्चिमार्गलायां दक्षिणतः कर्णिकापर्यंतादारभ्य तस्यैव बीजस्य ह्लें ह्लैं ह्लों ह्लौं ह्लः इत्यवशिष्टबीजषट्कस्य चतुष्कं अर्गलाग्रपर्यंतं विलिख्य पुनरग्रादारभ्य उत्तरतः कर्णिकापर्यंतं अवशिष्टं बीजद्वयं विलिखेत् पुनरेवमेव आग्नेयमारुतार्गलयोः वियद्वायुरूपं हकारयकारस्वरूपं ह्यं ह्यां इत्यादि द्विषट्कं आग्नेयमारुतार्गलविभागेन वर्णचतुष्टयद्वितयक्रमेण विलिखेत् पुनरेवमेव दक्षिणोत्तरयोः वियद्वरुणरूपं हकारवकारसंयुक्तं ह्वं ह्वामित्यादि द्वादशकं विलिखेत् पुनरेवमेव निर्ऋतीशानार्गलयोर्वियदनलबीजरूपं हकाररेफस्वरूपं ह्रं ह्रामित्यादि द्वादशकं विलिखेत् एवमर्गलासु लेखनप्रकारः पुनः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. सर्वतो बहिः शीकासंधिदेशादूर्जतः अष्टदलं पद्मं विलिख्य तस्य केसरेषु सबिंदुकं चतुर्दशस्वरं अजपास्र द्वं
१३९ चस्वरवर्णद्वयं च ई हं सः ॐ आमित्यादि प्रकारेण एकैकस्मिन् विलिख्य पुनस्तद्दलमध्ये पुष्पंन्याकारेण पाशां
कुंशबीजानि आं ह्रीं क्रोंमिति त्रीण्यपि सर्वत्र विलिखेत् तद्बहिर्वृत्तद्वयं विलिख्य प्रथमे वृत्ते पाशेन द्वितीये अंकु
शेन च संवेष्ट्य तद्बहिर्वृत्तद्वयं विलिख्य प्रथमे अनुलोममातृकया विलिख्य द्वितीये प्रतिलोममातृकया च संवेष्ट्ये
त् प्रतिलोमगे श्रेति चकारात् प्रथममनुलोमवर्णैर्वेष्टनमूहाने कुंभाख्येन वकारेण वेष्टयेत् तद्बहिर्घटाकारेस
या सरोजपुटितया वेष्टयेत् घटेन व्यापीति चकारात् घटवेष्टनात्पूर्वं वकारैर्वेष्टयेदिति निगम्यते एवं घटार्गलायं
त्रलेखनविधिः ॥ अस्मिन् यंत्रे पूर्ववत् पीठं संपूज्य भुवनेशीं तस्मिन्नावाह्य समर्चयेत् हृल्लेखाद्ये गगनाद्ये रक्ता
ये करालिकाये एताभिश्च नस्रभिः पूर्वादिदिक्षु प्रथमावृत्तिः अंगैर्द्वितीयावृत्तिः मातृभिस्तृतीयावृत्तिः इंद्रादिभि
श्चतुर्थी वज्रादिभिः पंचमी एवं घटार्गलयंत्रे पाशांकुशमध्यगतया भुवनेश्वर्या पूजाप्रकारः एवं पूजां कृत्वाऽङ्
मेत्र्यक्षरी मंत्रं चतुर्विंशतिलक्षं जपेत् क्षीरद्रुमचतुष्टयस्य समिद्भिर्दध्याज्यक्षौद्रसिक्ताभिः संभूय सहस्रपद्मक राम
तिलैश्च पयः सिक्तैस्तावत्संख्यं जुहुयात् पुरश्चरणार्थं अश्वत्थवटोदुंबरप्लक्षाः क्षीरद्रुमाः पुनः गजमृगमद १३९

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

काश्मीरैर्मंत्रितमः सुरभिरोचनोपेतैः विलिखेदलक्तकरसालुलिते यंत्राणि सकलकार्यार्थी मृगमदं कस्तूरिका वा काश्मीरं कुंकुमं सरभिचंदनं रोचनं गोरोचनं अलक्तकं एतैर्मिलितै रक्तयंत्र चतुष्टयं विलिखेत् धारणार्थं चेत् पुनः प्रसीद प्रपंचस्वरूपे प्रधाने प्रकृत्यात्मिके त्यादिकया स्तुत्या स्तुतिं कुर्यात् तत्प्रकारस्तु ग्रंथबाहुल्य भयान्नात्र लिख्यते ॥ इति प्रपंचसारसंग्रहे गीर्वाणेंद्र विरचिते दशमः पटलः ॥ अथ मंत्रदेवता प्रकाशिकोक्त प्रकारेण भुवनेश्वर्या पुरश्चर्याः प्रयोगादि विधिर्लिख्यते एकलिंगे शिवाकारे दक्षिणामूर्तिमाश्रितः। बद्धपद्मासनो भस्मस्नायी च कुशाविष्टरं कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशी नित्यमिष्टा शिवं शक्तिं जपेन्मंत्र सहस्रकं दधिक्षीर घृताभ्यक्ता न्याघात समिधो हुनेत् ततश्चाष्ट सहस्राहि ध्यायन् सर्वेश्वरां जपेत् अथ विनियोगः नित्यं सोभाग्यदं पद्म विशज्जलस्नाभिषेचनं मेधावी च भेद्राम्मी नावज्जलस्वांबु पानतः जिह्वाग्रे न्यस्य तज्जलं वाक्सिद्धि कविताकर तज्जल मंजनं वश्यं कर्पूरागरु संयुतं सासृग्भस्मारुणा लेपे वैश्य कृत्तिलकक्रिया जानुमात्रे जले स्थित्वा निश्चलोन्मीलिते क्षणः जपेत्सहस्रकं रात्रौ दृष्टामाकर्षयेत् प्रियां लाजैः कन्यामवाप्नोति तिलैरारोग्यमश्नुते पुष्टिमान् दधिहोमेन तांबूलैश्च तथा भवेत् ॥ अथ श्रीमंत्र विधानमुच्यते भृगुऋषिः नृचिच्छंदः श्रीर्देवता शंबी

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. ॐ ईं शक्तिः श्रां हृत् श्रीं शिरः इत्याद्यंगानि ध्यानं भूयाद्भूयो द्विपद्माभयवरदकरा तप्तकार्तस्वराभा शुभ्राभेभयुग्म
१८० द्वयकरधृतकुंभाद्भिरासिच्यमाना रत्नौघाबद्धमौलिर्विमलतरदुकूलार्त्तवालेपनाढ्या पद्माक्षी पद्मनाभोरसिकृत
वसतिः पद्मगा श्रीश्रियेनमः ॥१॥ श्रीं इतिमंत्रः ऐश्वर्यप्रधानोयं मंत्रः द्वादशलक्षजपः द्वादशसहस्रं त्रिमधुरसिक्तैः स
रोजैर्वा तिलैर्वा बिल्वसमिद्भिर्वा त्रिभिरपिवाजुहुयात् पुरश्चरणार्थं अथपुरश्चरणे कलशं शुद्धजलैर्वान्यैः कषायज
लैर्वासंपूर्यसंपूज्यसंजप्यसमभिषिंचेत् शिष्यंगुरुः अथपूजार्थं पीठविधानमुच्यते रुचिराष्टपत्रमथवारिरुहं गुणवृ
त्तराशिचतुरस्रयुतं प्रविधायपीठमपितत्रयजेन्नवशक्तिभिः सहरमांचततः अयमर्थः अष्टपत्रं विलिख्य तद्बहिर्वृत्तत्र
यं विलिख्य तद्बहिर्द्वादशराशिखंडं विलिख्य तद्बहिश्चतुरस्रं विलिख्य कर्णिकायां श्रीबीजं विलिख्य तस्मिन्पीठेनव
शक्तिभिरिष्ट्वा रमामावाहयेत् विभूत्यै उन्नत्यै कांत्यै हृष्ट्यै कीर्त्यै सन्नत्यै व्युष्ट्यै उत्कृष्ट्यै ऋद्ध्यै इतिनवशक्तयः श्रीं
श्रीदेव्यासनायनमः श्रीं श्रीदेवीमूर्त्तयेनमः इतिकर्णिकायां नवशक्त्यादौ श्रीबीजं योजयेच्च पुनरावाह्यांगैः प्रथमा
वृत्तिः वासुदेवाय संकर्षणाय प्रद्युम्नाय अनिरुद्धाय इतिपूर्वादिदिक्षु दमकाय शलभाय गुल्गुलवे करंडका राम
य इतिगजाननाग्नेयादिविदिक्षु शंखनिधये पद्मनिधये इतिवामदक्षिणपार्श्वयोः इतिद्वितीयावृत्तिः बलाक्यै विम १८०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लायै कमलायै नवमालिकायै धिभीषिकायै द्राविकायै शांकर्यै वसुमालिकायै इतितृतीयावृत्तिः इंद्रादिभिश्च तु
र्धी अयप्रयोगः अंभस्युरोजद्वयसेभितिष्ठन् भिलक्ष मेनं प्रजपेन्मतुंच श्रियंचिन्त्यात्केगतां यथाय द्दरिद्रता या
भवति प्रमुक्तः अयमर्थः स्तनप्रमाणेजलेस्थितः एतंमंत्रं श्रीबीजं लक्षत्रयंजपेत् सूर्यमंडले लक्ष्मींध्यायन् द
रिद्रतायाः प्रमुक्तोभवति प्रयोगांतरं वसताउपविश्य केटभारेः कमलावृक्षतलेयथात्रिलक्षं जपतोविभवेच्छ
कोक्षितार्थादधिकं वत्सरतोवसुप्रदंच अयमर्थः विष्णुालये बिल्ववृक्ष निकटेनास्थित्वालक्षत्रयंजपेत् संवत्स
रात् प्रागेव सुप्रपंचोभवति प्रयोगांतरं जुहुयादशोकदहनेसघृतेरपितंडुलैः सकलवांछतमं अयमर्थः
अशोकेंधनकृतदहने त्रिमधुरसिक्तैस्तंडुलैः संख्यानुक्ते सहस्रमितिन्यायात् साहस्रं जुहुयात् वश्यकरंभव
ति प्रयोगांतरं खदिरावले त्रिमधुरैरपिधनदं चराजकुलवश्यमपि अयमर्थः खदिरेंधनकृतदहने त्रिमधुर
सिक्तैस्तंडुलैर्होमोधनप्रदं राजवश्यदश्चास्यात् प्रयोगांतरं समधुरनलिनानां लक्षहोमाद्लक्ष्मीपरिगत
नपिजंतुं प्राप्नुयाच्छ्रीः समग्रा धनविभवसमृध्या नित्यमाल्हादयंती त्यजति नाकरुणार्द्रीतस्य सासंततिंच त्रिम
धुरसिक्तैः कमलैर्लक्षंयोजुहोति तमलक्ष्मीनिकटस्थमपिलक्ष्मीः प्राप्नुयात् तस्य संततिंचनत्यजति प्रयोगांतरं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.स. षित्वा श्रीसूक्तजापी निज भुवि सुखजो वर्द्धयित्वास्य पूर्वैः पत्रैस्त्रिस्वादुयुक्तैः कुसुमफलसमित् स्कंधभेदैस्तत्त्वक् त
१४१ न्मूलैर्मेहुत्वा त्वमाक्षु नियतचरितो सौ हुताग्निर्मलात्मा रूपं पश्येद्रमायाः कथमपि च पुनस्तत्कुले स्यादलक्ष्मीः
अयमर्थः पूर्वं ब्राह्मणो निजभूमौ बिल्वं संस्थाप्य तत्पृष्ठे श्रीसूक्तं जपेत् श्रीसूक्तजापी जलसेचनं च कुर्यात्
पुनरस्य बिल्ववृक्षस्य यानि पत्राणि तानि सर्वाणि संगृह्य क्रमेण एकैकं त्रिमधुरसिक्तं श्रीबीजमंत्रेण जुहुयात्
पुनस्तदवसाने यानि कुसुमानि तान्यपि त्रिमधुरसिक्तानि क्रमेण पूर्ववदेव जुहुयात् पुनस्तत्फलैरप्येवमेव जु
हुयात् पुनस्तस्य समिद्भिः पुनस्तस्य स्कंधभेदैः पुनस्तस्य मूलैस्त्रिमधुरसिक्तैः सर्वैरेवं जुहुयात् तस्मान्नि
र्मलात्मा भूत्वा मंडलात्प्रागेव रमाया रूपं पश्यति अलक्ष्मीपरिहारो भवतीति किमु वक्तव्यं ॥ अथ रमामंत्र
प्रसंगात् कल्पांतरोक्तोपि रमामंत्रो लिख्यते ब्रह्मा ऋषिः गायत्री छंदः रमाविद्या देवता श्रीं बीजं स्वाहा श
क्तिः श्रीं हृत् स्वाहा शिरः श्रीं शिखा स्वाहा कवचं एवं प्रकारेण षडंगानि ध्यानं तडिच्छोभापूर्णातपनशशि
ताटंकयुगलोल्लसद्गौ वांक्षौमांशुकविशदनाभीसरसिजां दरस्मेरां धीरां करकलितपद्मां द्विनयनां रमाविद्यां
वंदे वरपुरुषवामोरुनिलयां श्रीं ॐ नमो भगवति सर्वसौभाग्यदायिनि श्रीं श्रीविद्ये महाविभूतये स्वाहा इ ९६

For Private And Personal

ति मंत्रः वर्णलक्षजपः पायसलाजाज्य पूर्वाभिर्वर्णसहस्रं हुनेत् पुरश्चरणार्थं अथमंत्रः मध्ये स्वाहा ष्टपत्रे
प्रतिदलयुगलं वर्णमालिख्य बाह्ये शिष्टा वर्णादशारे शिखिपुट भवने शिष्टबीजं तु लक्ष्म्याः बाह्ये पंचादष्टार्णे
प्रणव परिवृत्तं स्वेष्टसाध्यं च मारं लक्ष्मी यंत्रं तदेतत्त्रिभुवनविभवश्रीप्रदं दिव्यदिव्यं अस्यार्थः प्रथम मष्टपत्रं
विलिख्य तन्मध्ये स्वाहा इति वर्णद्वयं तन्मध्ये मारबीजं ससाध्यं दलेषु मंत्रवर्णद्वंद्वं तद्बहिर्दशदले प्रत्येकं मं
त्रवर्णैकैकं तद्बहिः षट्कोणं तेषु लक्ष्मी बीजं तद्बहिर्वृत्ते मातृकां तद्बहिः प्रणवेन वेष्टयेत् ।। अथ लक्ष्मीमंत्रां
तरमुच्यते दक्ष ऋषि विराट्छंदः श्रीर्देवता ॐ बीजं स्वाहा शक्तिः ॐ देव्यै नमः हृत् ॐ पद्मिन्यै नमः शि
रः ॐ विष्णुपत्न्यै नमः शिखा ॐ वरदायै नमः कवचं ॐ कमरूपायै नमः अस्त्रं ध्यानं पद्मस्था पद्मनेत्रा क
मलयुगवराभीतियुग्दोःसरोजा देहोत्थाभिः प्रभाभिस्त्रिभुवनमखिलं भासयंती मुक्ताहाराभिरामों
नतकुचकलशा रत्नमंजीरकांचीग्रैवेयोर्म्यंगदाढ्या धृतमणिमकुटा श्रेयसे श्रीर्भवेद्वः नमः कमलवासिन्यै
स्वाहा इति मंत्रः ऐश्वर्य फलप्रधानोयं मंत्रः दशलक्षं जपेत् त्रिमधुरसिक्तैः कमलैरयुतं जुहुयात् पुरश्च
रणार्थं अथपूजाविधिः पूर्ववत्पीठं संपूज्य तस्मिन्देवीं समावाह्य समर्चयेत् प्रथममष्टपत्रे मूलं षडंगैः प्रथ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. मावृत्तिः बालाकै विमलायै कलायै वनमालिकायै विभीषिकायै द्राविकायै शांकर्यै वसुमालिकायै इ
१४२ तिदलेषु द्वितीयावृत्तिः लोकेश्यदलांते तृतीयावृत्तिः अथ प्रयोगः समुद्रगायामवनीर्यनद्यांस्वकंठमात्रे पयसि
स्थितः सन् त्रिलक्षजप्याध्यनमोद्व मात्रान्मंत्री भवेन्नात्र विचारणीयं प्रयोगांतर नंद्यावर्त्तै र्जुहुतभगभम
र्च्ये लक्ष्मी सहस्र तावद्दै ल्वै ल्मि मधुरयुक्तैर्वा फले पौर्णमास्यां पंचम्यां वासिन सरसिजैः शुक्रवारेच्छ पुष्पैरन्यै
र्मासं प्रतिहुतविधिर्वत्सरास्याद्धनाढ्यं अयमर्थः भगभउत्तरा फल्गुनी नंद्यावर्तपुष्पैर्वैल्वफलैल्मि मधुरमि
क्तैर्वा सहस्रं जुहुयात् अथवा पौर्णमास्यां वा पंचम्यां वा श्वेतैः सरसिजैः प्रतिमासं जुहुयात् अथ प्रतिशुक्र
वारमन्यैः फलपुष्पैर्जुहुयात् एवं कृते वत्सरात् धनाढ्यो भवति ॥ लक्ष्मीमंत्रांतरमुच्यते दक्ष ऋषिः विरा
ट् छंदः श्रीर्देवता श्रां बीजं ह्रीं शक्तिः ॐ श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं ॐ हृत् ॐ श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं
श्रीं ह्रीं शिरः ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं ॐ शिखा ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं ॐ कवचं ॐ श्रीं ह्रीं श्रीं म
हालक्ष्मीनमः श्रीं ह्रीं श्रीं ॐ अस्त्रं ध्यानं हस्ताद्यह सुपात्र पंकजयुगादर्शस्फुरन्नूपुराग्रैवेयांगदहारकंकणमहा रा॥
मौलज्वलत्कुंडला पद्मस्थापरिचारिकापरिवृताभृंगारगावृता देवी दिव्यगणानताभवदघप्रध्वंसिनिस्यादमः १४०

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः इति महालक्ष्मी मंत्रः सप्तविंशत्यर्णः
ऐश्वर्यफलप्रधानो मंत्रः लक्षंजपेत् पूर्वोक्तलक्ष्मीपीठे समावाह्य समर्चयेत् अंगैः प्रथमावृत्तिः श्रीधरायन
मः हृषीकेशायनमः वैकुंठायनमः विश्वरूपायनमः वासुदेवायनमः संकर्षणायनमः प्रद्युम्नायनमः अनि
रुद्धायनमः इतिद्वितीयावृत्तिः भारत्यैनमः पार्वत्यैनमः चंड्यैनमः शच्यैनमः इतिपूर्वादिषु दमकाय श रि
लभाय गुग्गुलवे कुरंडकाय इत्याग्नेयादिकोणेषु इतितृतीयावृत्तिः अनुरागाय विसंवादाय विजयाय वल्लभा
य मदाय हर्षाय बलाय तेजसे इतिचतुर्थ्यावृत्तिः इंद्रादिभिःपंचमी वज्रादिभिःषष्ठी एवंसंपूज्य त्रिमधु
रासिक्तैर्बिल्वैःफलैरयुतंजुहुयात् पुरश्चरणार्थं ॥ अथश्रीसूक्तविधानमुच्यते ॥ श्री आनंदकर्दमचिक्लीतेंदि
रासुताऋषयः तत्राग्निः इति प्रथमायाऋचः इतरेचत्वारऋषयश्चतुर्दशानामृचामपिप्रत्येकंचत्वारोपियोज
नीयाः एवंप्रत्येकपक्षे समुदायपक्षेतु सर्वऋषयः संभूयैव आद्यऋक्त्रये छंदोनुष्टुप् कांसोस्मीत्यस्याः
बृहती छंदः तदंत्ययोर्द्वयोस्त्रिष्टुप् पुनरष्टकस्याप्यनुष्टुप् अंत्यस्य प्रस्तारपंक्तिश्छंदसामपिऋष्याद्युक्तान्या
यः प्रत्येकपक्षे समुदायपक्षेतु संभूयैव स्यागितदेवता तत्राग्निरितिनारायणोभगवानुच्यते हिरण्यवर्णामित्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir


कृ बीजं कांसो स्मीत्यक् शक्तिः हिरण्मवर्णानमः हृत् चंद्रायैनमः शिरः रजतस्रजायैनमः शिखा हिरण्यस्रजायै
 नमः कवचं हिरण्यायैनमः नेत्रं हिरण्यवर्णायैनमः अस्त्रं सूक्तन्यास उच्यते मूर्द्धाक्षिकर्णनासामुखगल
दोर्हृदयंनाभिगुह्येषु पायूरुजानुजंघाचरणेषुन्यसेत् सूक्तकैः क्रमशः ध्यानं अमलकमलसंस्थातद्रजःपुंज
वर्णा करकमलधृतेष्टाभीतियुग्मांबुजाच मणिमुकुटविचित्रालंकृताकल्पजालैर्भवतु भुवनमाता संततं श्रीः श्री
यैनमः हिरण्यवर्णामिति सूक्तमंत्रं शुक्लप्रतिपदामारभ्य स्त्रीभोगादिरहितः एकादश्यां परिसमापयेत् द्वादश
सहस्रसंख्यंजपः तेषुदिनेषु नित्यशः अन्नेनघृतेन चाष्टोत्तरशतंजुहुयात् पुनर्द्वादश्यांपद्मैश्च बिल्वसमिद्भि
श्च क्षीरान्नेन च सर्पिषा च क्रमेण एकैकं त्रिशतसंख्यया जुहुयात् पुरश्चरणहोमः अथपूजाविधिः रमेकाश्यपी
पीठे समावाह्य रमां समर्चयेत् अंगैः प्रथमावृत्तिः पद्मायै पद्मवर्णायै पद्मस्थायै आर्द्रायै तर्पयंत्यै तृप्तायै
ज्वलंत्यै स्वर्णप्राकारायै इतिद्वितीयावृत्तिः लोकेश्यैस्तृतीयावृत्तिः तदायुधैश्चतुर्थ्यावृत्तिः अथपूजाविधानां
तरमुच्यते पंचदशभिः ऋग्भिः एकैकाभिः एकैकोपचारान् समर्चयेत् एवं पंचदशोपचारान् समर्चयेत् उ रामः
पचाराउच्यंते आवाहनासनार्घ्यकपाद्याचमन मधुपर्कसेकाभिः वासोभूषणगंधान् सुमनोयुतधूपदीप १५२

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भोज्यानि सोद्वासनानि कुर्याद्दूक्ति पुनः पंचदशाभिरथ मनुभिः व्यस्तैरपि च समस्तैः पूजायां संयतात्मकः सिध्यै पूजार्थं
पुष्पविशेष उच्यते मंदारकुंदकुमुदनंद्यावर्त्ता हृ मालतीजात्याः कल्हारपद्मरक्तोत्पलकेतकचंपकादयोप्या ह्याः
अथ प्रयोगः अभिषिंचेत्त्रिशो नित्यं सूक्ते स्नानकर्मणि आदित्यादिमुखो जप्यात्तावत्तावश्च तर्पयेत् अर्चयेद्वि
धिनानेन दिनशो जुहुयात्त्रिशः एवं करोति षण्मासं योसौ स्यादिंदिरापतिः अयमर्थः अनेन श्रीसूक्तमंत्रेण स्नान
काले जलमुद्धृत्य जप्त्वा त्रिवारमात्मानमभिषेचयेत् पुनरादित्याभिमुखस्त्रिवारं जप्यात् पुनस्त्रिवारं जलेन
तर्पयेत् पुनस्त्रिवारं देवतायां समर्च्य पुनस्त्रिवारं हविषा हुनेच्च एवं दिनशः षण्मासं यः कुर्यात् इंदिरायाः
पतिरेव स भवति प्रयोगांतरं उद्धृत्य मात्रेन लिनेन नवनीतं विनिक्षिपेत् सकर्णिकेसकिंजल्के दले पत्रांतरा
ळके पुनः पद्मं तउधृत्य समिद्धे तु विभावसौ जुहुयादंत्ययार्चा शतमष्टोत्तरं जपेत् चत्वारिंशच्छुक्रवारे म
हाश्रीस्तस्य जायते अयमर्थः उदयकाले ईषद्विकसितेन लिनेकर्णिकायां च दलमूलेषु च दलेष्वपि च दळा
नामंतराळे पुनर्नवनीतेन विलिप्यात् पश्चात्तत्पद्ममेकसरसं उद्धृत्य अष्टोत्तरशतसंख्यं नाम आवहजातवेद
इत्यृचं जप्त्वा अग्नौ जुहुयात् एवं प्रतिशुक्रवारं चत्वारिंशच्छुक्रवारं जुहुयात् तस्मात् महाश्रीर्भवति प्रयोगांतर

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

 कांसोस्मित्यनयासम्यगेकादश घृताहुतिः षण्मासं जुहुतो नित्यं भयात्मा यो महेंदिरा अयमर्थः कांसोस्मितांहि
 रण्यप्राकारामित्यृचा नित्यशो घृतेन एकादशं घृताहुतिर्जुहुयात् एवं षण्मासे कृते नस्य महालक्ष्मीर्भवति प्र
योगांतरं सूक्तं रतेजोपतु जुहुयाद र्चयीतावगाहेत्सिंचे इक्षेदिनमनु तथा संयतस्तर्पयीत संशुद्धात्मा विविध
धनधान्याशुकाभ्यंतरो सो मंत्री सर्वैर्भवति बहुमतो देहिरा स्यात्पुरोगः अयं तु स्पष्टार्थः प्रयोगांतरं श्रियै लक्ष्म्यै
वरदायै विष्णुपत्न्यै वसुप्रदायै हिरण्यरूपायै स्वर्णमालिन्यै रजतस्रजायै स्वर्णप्रभायै स्वर्णप्राकारायै पद्मवा
सिन्यै पद्महस्तायै पद्मप्रियायै मुक्तालंकारायै सूर्यायै चंद्रायै बिल्वप्रियायै ईश्वर्यै भुक्त्यै मुक्त्यै विभूत्यै
ऋध्यै समृध्यै कृष्यै पुष्ट्यै धनदायै धनेश्वर्यै श्रद्धायै भोगिन्यै भोगदायै धात्र्यै विधात्र्यै द्वात्रिंशदंते श्रीदे
व्या येमंत्राः समुदीरिताः तारादिकानमोंताश्च तैरर्चां सुबलिं हरेत् तर्पयेच्च महादेवीं दिनादौ मंत्रवित्तमः
अयमर्थः महालक्ष्मीं पूजाविधानोक्तेन विधिना समभ्यर्च्य तत्र देव्याः पुरतो अक्षतादिना एतैर्मंत्रैर्द्वात्रिं
शत्संख्यकैः ॐ श्रियै नमः इति बलिं हरेत् पुनरेतैरेव मंत्रैः ॐ श्रियं तर्पयामि इत्यादिभिरुदयकाले महा राम
लक्ष्मीं तर्पयेज्जलैः पुनर्नाभ्यक्तो यांतनग्नः सलिलमवतरेदित्यादिना लक्ष्मीकरनियम उक्तः ॥ अथ श्रीसूक्तमं 

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अष्टपत्रं महापद्मं कर्णिकाकेसरैर्युतं॥१

त्र प्रसंगात् श्रीसूक्तयंत्रमपि मंत्रसारोक्तं निरवधिकैश्वर्यप्रदं यंत्रं लिख्यते ॥ श्रीबीजं साध्ययुक्तं क-
र्णिकायां विलिख्य च वस्वादित्यत्यष्टसंख्यपत्रेष्वपि यथाक्रमं श्रीसूक्तस्याप्यर्धमर्धमृचामालिख्य
तद्बहिः यः शुचिः प्रयतो भूत्वेत्यृचा मातृकयापि च संवेष्ट्य च धराबिंबकोणेषु श्रियमालिखेत् श्रीसूक्त-
यंत्रमेतत्तु धारयेद्यो यथाविधि पुत्रारोग्यधराधान्यधनगोशस्यशालिनीं लब्ध्वाति बहुलां लक्ष्मीं जीवे-
च्च शरदां शतं इदमेव ताम्रपट्टे विलिख्य जप्त्वा चैव सिक्तसंपातं संस्थाप्यांगणभूमौ लक्ष्मीमावाह्य साधु सं-
पूज्य भूयः परिवारयुतं बलिं हरेत् भूतलं समीकृत्य यस्मिन्नेवं क्रियते वर्द्धते तत्र संपदो नित्यं पुत्रैर्दारै रिष्टै-
र्विभवैर्भूत्यै धनदैश्च धान्यैश्च नागै रथैस्तुरगैर्वृषभैर्गोभिश्च संख्यया हीनैः रमयंति गेहेस्मिन्निह रंत्वाभूतसं-
प्लवांल्लक्ष्मीः अस्यार्थः प्रथममष्टपत्रं पद्मं विलिख्य तत्कर्णिकायां श्रीबीजं तत्साध्यं विलिख्य अष्टसुपत्रे-
षु ऋक्चतुष्टयस्यार्धमर्धं विलिख्य बहिर्द्वादशदलं विलिख्य तेषु अवशिष्टानामृचां मध्ये ऋक्षट्कस्या-
र्धमर्धं विलिख्य तद्बहिः षोडशदलं विलिख्य तेषु अवशिष्टानामृचामष्टकस्यार्धमर्धं विलिख्य तद्बहिर्वृत्त-
द्वयं विलिख्य प्रथमे वृत्ते यः शुचिः प्रयत इत्यादिना संवेष्ट्य द्वितीये मातृकयापि संवेष्ट्य चतुरस्रकोणेषु श्रीबी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



जं विलिखेदिति ॥ अथ महालक्ष्मी रत्नकोशे प्रोक्ते लक्ष्मी मंत्र विधानमपि योग्यतावशाल्लिख्यते भृगुऋषिः
अनुष्टुप् छंदः महालक्ष्मीर्देवता ऐं बीजं ह्रीं शक्तिः श्रीं कीलकं मूलमंत्र वर्णद्वंद्वैः षडंगानि ध्यानं कांत्याकां
चन संनिभां हिमगिरि प्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्त हिरण्मयामृत घटैरासिच्यमानां श्रियं नानारत्न समुज्व
लां करलसत्पद्मां किरीटोज्वलां क्षौमाबद्ध नितंब बिंब लसितां वंदे रविंदस्थितां मंत्रः ऐं ह्रीं श्रीं क्लीं सौः पंक
जहस्ते नमः द्वादशार्णोयं मंत्रः पूजादिकं एकाक्षरी विधानवत् अथ लक्ष्मी यंत्र विधानांतरं महालक्ष्मी
मंत्रस्य कण्वऋषिः गायत्री छंदः वसुधारा महालक्ष्मीर्देवता श्रीं बीजं स्वाहा शक्तिः श्रीमित्यादिना करन्यासमंग
न्यासं च कुर्यात् ध्यानं हस्तोद्यद्वसुपात्र पंकजधरा चंचत्स्फुरंनूपुरग्रैवेयांगद हार कंकण महामालाज्वलत्कुं
डला पद्मस्था परिचारिका परिवृता शुक्लांगरागांशुका देवी दिव्य वसुप्रदा भवभय प्रध्वंसिनी स्याद्रमा मंत्रः
ॐ श्री वसुदे वसुधारे वसुकरि धनकरि धान्यकरि रत्नकरि स्वाहा सप्तविंशत्यर्णोयं मंत्रः पुरश्चर
णार्थं लक्षं जपेत् तच्छेषमेकाक्षरी विधानवत् ॥ महालक्ष्मी मंत्रांतरं देवेशऋषिः गायत्री छंदः म राम
हालक्ष्मीर्देवता श्रीं बीजं ह्रीं शक्तिः सर्वसौभाग्य सिध्यर्थे जपे विनियोगः श्रीमित्यादिना करन्यास १८५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मैगन्यासंचकुर्यात् ध्यानं यासापद्मासनस्था विपुलकटितटीपद्मपत्रायताक्षी गंभीरावर्त्तनाभिस्तनभर
नमिता शुक्लवस्त्रोत्तरीया लक्ष्मीर्दिव्यैर्गजेंद्रैर्मणिगणखचितैःस्नापिताहेमकुंभैर्नित्यंसापद्महस्ता वसतु
ममगृहेसर्वमांगल्ययुक्ता मंत्रं ॐ श्रीं क्लीं महालक्ष्मि महालक्ष्मि एह्येहि सर्वसौभाग्यंमेदेहि स्वाहा ॥
चतुर्विंशत्यर्णोयंमंत्रः लक्षंजपेत् दशांशंतर्पणं दशांशंहोमः शेषमेकाक्षरीविधानवत् अथउक्ता
नां महालक्ष्मीमंत्राणां प्रयोगविधिः अशोकवन्हौ जुहुयात्तन्मूलैराज्यलोलितैः वशयेदचिराद्देवत्रैलोक्यमपिमं
त्रवित् जुहुयात्तंडुलैः शुद्धैरर्कोग्नौ नियुतं वशीराज्यश्रियमवाप्नोति राजपुत्रो महीयसीं जुहुयात्खादिरेवन्हौतं
डुलैर्मधुनोक्षितैः राजवश्योभवेत्तस्य महालक्ष्मीश्च वर्धते बिल्वछायामपि वसन् बिल्वमिश्रहविष्यभुक्
संवत्सरद्वयंहुत्वा तत्फलैरथवा बुजैः साधकेंद्रो महालक्ष्मींचक्षुषा पश्यति ध्रुवं हविषा घृतसिक्तेन पयसा
सर्पिषापिवा हुत्वाश्रियमवाप्नोति नियतो मंत्रवित्तमः मधुनाक्तारुणांभोजैर्जुहुयाल्लक्षमादरात् नमुंच
तिरमातस्य पुरमाभृतसंह्रुतं वक्षप्रमाणे सलिले स्थित्वा मंत्रममुंजपेत् एकाक्षरत्रिलक्षंतु देवींध्यात्वार्क
मंडले सप्तवेदल्पकालेन रमायावसतिस्थिरा विष्णुगेहस्य बिल्वस्य मूलमध्यास्य मंत्रवित् त्रिलक्षंजप

For Private And Personal

म.सं. सो मंत्रं वांछितं लभते धनं यंत्रं त्रिकोणं पूर्वमालिख्य अष्टकोणं लिखेत्ततः त्रयोदशदलं पद्मं शोभनं के
१४६ सरान्वितं तद्बहिर्भूपुरं द्वंद्वं वज्रकोणसमन्वितं चतुर्विंशतिवर्णाना — मेकैकं विलिखेद्बुधः त्रिको
णेष्वष्टकोणेषु त्रयोदशदलेष्वपि नं पुरे विलिखेन्मंत्री श्रियो बीजं समग्रकं भूकोणेष्वपि तद्बीजं लिखे
द्दिक्षु विदिक्षु च एवं विलिख्य विधिवत् प्राणान् संस्थाप्य मंत्रवित् पूजयित्वा जपेन्मंत्रं साधयेत्सर्वसिद्धिदं
अथ लक्ष्मीस्तोत्रमपि कल्पांतरोक्तं मंत्रं लिख्यते अंगं हरेः पुलकभूषणमाश्रयंती भृंगांगनेव मुकुला
भरणं तमालं अंगीकृताखिलविभूतिरपांगलीला मांगल्यदास्तु मम मंगलदेवतायाः १ मुग्धा मुहुर्वि
दधती वदने मुरारेः प्रेमत्रपाप्रणिहितानि गतागतानि माला दृशोर्मधुकरीव महोत्पले या सा मे श्रि
यं दिशतु सागरसंभवायाः २ आमीलितार्धमधिगम्य मुदा मुकुंदमानंदकंदमनिमेषमनंगतंत्रं
आकेकरस्थितकनीनिकपक्ष्मनेत्रं भूत्यै भवेन्मम भुजंगशयांगनायाः ३ बाह्वंतरे मधुजितः श्रितकौ
स्तुभे या हारावलीव हरिनीलमयी विभाति कामप्रदा भगवतोपि कटाक्षमाला कल्याणमावहतु मे कम रा.म
लालयायाः ४ कालांबुदालिलसितोरसि कैटभारेर्धाराधरे स्फुरति या तडिदंगनेव मातुः समस्तजगतां १४६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हनीयमक्षि भद्राणि मे दिशतु भार्गवनंदनायाः ५ प्राप्तं पदं प्रथमतः खलु यत्प्रभावां मांगल्यभा
जि मधुमाथिनि मन्मथेन मय्यापतेत्तदिह मंथरमीक्षणार्धं मंदालसाक्षि मकरालयकन्यकायाः ६
विश्वामरेंद्रपदविभ्रमदानदक्षमानंदहेतुरधिकं मधुविद्विषोपि ईषन्निषादतु नयी क्षणमीक्षणार्ध
मिंदीवरोदरसहोदरमिंदिरायाः ७ इष्टा विशिष्टमतयोपि नरा यया द्राग्दृष्टास्त्रिविष्टपसदस्थपदं
भजंते दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः ८ दद्याद्दयानुपवनो द्रवि
णांबुधारामस्मिन्नकिंचनविहंगशिशौ विषण्णे दुष्कर्मधर्ममपनीय चिराय दूरान्नारायणप्रणयिनीनय
नांबुवाहः ९ गीर्देवतेति गरुडध्वजसोदरेति शाकंभरीति शशिशेखरवल्लभेति सृष्टिस्थितिप्रल
यसिद्धिषु संस्थितायै तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै १० श्रुत्यै नमोस्तु शुभकर्मफलप्रसूत्यै रत्यै नमोस्तु
रमणीयगुणाश्रयायै शक्त्यै नमोस्तु शतपत्रनिकेतनायै पुष्ट्यै नमोस्तु पुरुषोत्तमवल्लभायै ११ नमो
स्तु नालीकनिभाननायै नमोस्तु दुग्धोदधिजन्मभूम्यै नमोस्तु सोमामृतसोदरायै नमोस्तु दामोदरवल्लभा
यै १२ नमोस्तु देव्यै भृगुनंदनायै नमोस्तु विष्णोरुरसि स्थितायै नमोस्तु लक्ष्म्यै कमलालयायै नमोस्तु नारा

For Private And Personal

प्र.सं. वल्लभायै १३ नमोस्तु हेमांबुजपीठिकायै नमोस्तु भूमंडलनायिकायै नमोस्तु देवादिदयापरायै
१८७ नमोस्तु शार्ङ्गायुधवल्लभायै १४ स्तुवंति ये स्तुतिभिरमूभिरन्वहं त्रयीमयीं त्रिभुवनमातरं रमां गु
णाधिकां गुरुधनधान्यभागिनो भवंति ते भवमनुभाविताशयाः १५ पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये
पद्मदलायताक्षी विश्वप्रिये विष्णुमनोनुकूले त्वत्पादपद्मं मयि संनिधत्स्व १६ अनेन स्तोत्रमंत्रेण ल
क्ष्मीं स्तुत्वा समापयेत् ॥ इति प्रपंचसारसंग्रहे गीर्वाणेंद्रविरचिते एकादशः पटलः ॥ अथ त्रिपुराविधानमु
च्यते संमोहनऋषिः गायत्रीछंदः त्रिपुरादेवीदेवता ऐं बीजं क्लींवा ह्रीं शक्तिः श्रांहृत् श्रीं शिरः इत्याद्यंगा
नि ह्रां हृत् ह्रीं शिरः इत्यादिवा श्रीं हृत् ह्रीं शिरः क्लीं शिखा श्रीं कवचं ह्रीं नेत्रं क्लीं अस्त्रं इति वांगानि कुर्यात्
ध्यानं नवकनकभासुरोर्वीविरचितमणिकुट्टिमे सकल्पतरौ रत्नवरबद्धसिंहासननिहितसरोरुहे समा
सीनां आबद्धरत्नमुकुटां मणिकुंडलोद्यत्केयूरकोर्मिरशनाढ्यनूपुराढ्यां ध्यायेद्धृताब्जयुगपाशकसांकु
शेषुचापां सपुष्पविशिखां नवहेमवर्णां चामरमुकुंदसमुद्गततांबूलकरंडवाहिनीभिश्च दूतिभिः समहीवृतां पश्यंतीं राम
साधकं प्रसन्नदृशा श्रींह्रींक्लीं इति मंत्रः द्वादशलक्षं जपेत् श्रीवृक्षसमिद्भिश्च राजवृक्षसमिद्भिश्च जपान्ते वैश्व १८७

त्रिमधुरसिक्तैश्च द्वादशसहस्रं पुरश्चरणहोमः। श्रीवृक्षं बिल्वं राजवृक्षं कृतमालं जपार्त्तवं जपापुष्पं॥ अ
थ पूजाविधिः। केवलाष्टपत्रे भुवनेश्वरीपीठे वा समावाह्य समर्चयेत् अंगैः प्रथमावृत्तिः। लक्ष्म्यै। हरयोगिगिरि
जायै। शार्वायै। रत्यै। अंगजायै इति षट्कोणेषु समर्चयेत्। पुनस्तद्वमितो बहिः। वसुधारायै। शंखनिधये। वसुम
त्यै। पद्मनिधये। इति समर्चयेत्। एवं द्वितीयावृत्तिः। मातृभिस्तृतीया। पुनस्त्रीरूपैः। लोकपालैश्चतुर्थावृत्तिः।
अस्य मंत्रस्य फलमुच्यते। सकलवर्गफलाप्तिपशास्करंजगतिरंजनदं कविताकरं॥ अथ धरणीमंत्रविधा
नमुच्यते। वराहऋषिः नृविछेदः। श्रीधरणी देवता। ग्लौं बीजं। स्वाहा शक्तिः। ॐ नमो हृत्। भगवत्यै शिर
धरण्यै शिखा। धरणिधरे कवचं। धरे नेत्रं। स्वाहा अस्त्रं। ध्यानं। मुखांभोजे निविष्टां कृणचरणतलाश्या म
लांगी मनोज्ञा चंद्रकाल्यग्रचुंबच्चुकलसितकरा माक्षनालोत्पलाब्जं॥ रक्ताकल्पाभिरामा मणिमयमुकु
टा नित्रकस्त्रा प्रसन्ना दिश्या द्विश्वंभरानः सततमभिमतं वल्लभा कैटभारेः॥ ॐ नमो भगवत्यै धरण्यै धर
णिधर धरे स्वाहा। इति मंत्रः। धराहृदयमित्यस्याख्या। लक्षं जपः। दशांशं सर्पिः। सिक्तेन पयोन्नेन पुरश्चरणहोम
अथ पूजा। वैष्णवपीठे समावाह्य। अंगैः प्रथमावृत्तिः। भूम्यात्मने नमः। ब्रह्मात्मने अब्रात्मने। प्राणात्मने। इति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दिग्दलेषु। निवृत्यै। प्रतिष्ठायै। विद्यायै। शांत्यै। इतिकोणदलेषु। इति द्वितीयावृत्तिः। इंद्रादिभिस्तृतीयावृत्तिः। अथ
प्रयोगः। पुष्पैः प्रियंगोर्मधुरत्रयाक्तैः नीलोत्पलैर्वाथ तथारुणैर्वा॥ सहस्रमानं प्रतियुद्धतःस्यान् गौर्गोमती सस्यकुला
कुलाच॥ प्रियंगुपुष्पं मालत्या नीलोत्पलं रक्तोत्पलं अयमर्थः। प्रियंगुपुष्पैः। मधुरसिक्तैर्वा नीलोत्पलैस्त्रिमधुरसिक्तै
र्वा रक्तोत्पलैर्वा सहस्र संख्ययो जुहोति तस्य भूमिः पशुवती च सस्यादि समृद्धिमती च जायते। प्रयोगांतरं। पिंजरां पृथुल
शालिमंजरीं यो जुहोति मधुरत्रयोक्षितां। नित्यशः शतमथास्य मंडलात् हस्तमा भवति विस्तृता मही। शालिमंजरी नीवार
मंजरी रक्तकलमप्राकाणत्॥ अयमर्थः॥ स्वर्णवर्णां स्थूलां च शालिमंजरीं त्रिमधुरसिक्तां नित्यशः शतसंख्यं यो जुहोति
एवं मंडले कृते तेन भूमिर्लभ्यते॥ प्रयोगांतरं॥ भृगोस्तु वारे निजसाध्यभूमौ विलोलितांभः परिपक्वमंधः॥ पयो घृताक्तं
जुहुयात् सहस्रं दुग्धेन वा तेन दिनावतारे षण्मासादनु भृगुवारमेष होमः संपन्नात्स मुपनयने द्वरा प्रदेशान् पुत्रा
न्वा पशु महिषेष्ट पुष्ट जुष्टामिष्टामप्यनुदिनमिंदिरा समग्रां॥ अयमर्थः॥ शुक्रवारे स्वस्य साध्यक्षेत्रस्य मृदं गृहीत्वा
तां जले विलोड्य तेन जलेन हविः परिपच्य पुनः क्षीर घृताभ्यां सिक्तेन तेन हविषा सहस्रसंख्यं मुदयकाले जुहुयात्
अथवा तामेव साध्यभूमिस्थां मृदं क्षीरविलोड्य तेन शुक्रवारे उदयकालि सहस्रसंख्यं जुहुयात्। एवं षण्मासं प्रतिशुक्र

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वासरे यो जुहुयात् तस्य साध्यभूमिः सकलर्द्धिसंपन्ना जायते। पुत्रमहिषीदिरादयश्च जायंते। अथ धरणीमंत्रप्रसं
गात्। धरणीयंत्रमपि मंत्रसारोक्तमंत्रयोग्यतावशाल्लिख्यते मध्ये तारं वसुपुरयुगाश्रीद्वयो कोलबीजं पत्रेषट्
स्वपि गुणमितान् मंत्रवर्णान्क्रमेण। आवेष्ट्यार्णैः किटिमनुभवैर्मातृकार्णैश्च यंत्रं भूगेहस्थं वितरति धरास्वर्णधान्यादि
वृद्धिं। अस्यार्थः। प्रथममष्टकोणद्वयं विलिख्य तन्मध्ये प्रणवं ससाध्यं विलिख्य अष्टकोणद्वये पिवाराहबीजं हूमिति वि
लिख्य तद्बहिरष्टपत्रं पद्मं च विलिख्य तेषु धरणीमंत्रवर्णांस्त्रिपृशस्त्रिशो विलिखेत्। ॐ ह्रीं ग्लौं नमो भगवत्यै। धरणि धरण्यै :
धरे धरे स्वाहा ग्लौं ह्रीं इति धरणीमंत्रश्चतुर्विंशत्यक्षरः। पुनस्तद्बहिर्वृत्तद्वयं विलिख्य प्रथमे वृत्ते उपरि द्वात्रिंशत्
दले वक्ष्यमाणवाराहमंत्रेण वेष्टयेत् द्वितीये वृत्ते मातृकावर्णैः संवेष्ट्य तद्बहिश्चतुरस्रं विलिखेदिति॥ अथ त्वरि
ताविधानमुच्यते॥ अर्जुनऋषिः। विराट्छंदः। त्वरिता पार्वती देवता। हुं बीजं ह्रीं शक्तिः खेचहृत् व क्षे शिरः
छेक्षः शिखा क्ष स्त्रीं कवचं स्त्रीं हुं नेत्रं ------ हुं खे अस्त्रं॥ ध्यानं॥ श्यामांतनुमरुणपंकजचरणतलां वृष
लनागमंजीरां॥ पर्णांशुकपरिधानां वैश्याहिद्वंद्वमेवखलाकलितां॥ तनुमध्यलतां पृथुकस्तनयुगलां क
रविराजदभयवरां॥ शिखिपिच्छनालवलयां गुंजाफलगुणितभूषणारूपितां॥ नृपकणकेयूरां तां गलविलसत्वि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. विधमणियुताभरणां। द्विजनागयुगलकुंडलमंडितगुंडद्वयीमुकुटशोभां। शोणतराधरपल्लवविद्रुममणिभा
१७९ सुरां प्रसन्नांच। पूर्णशशिबिंबवदनमरुणायतलोचनत्रयीतलिनां। कुंचितकुंतलविकसत्सुकुटाघटिताहिवे
रिपिंछयुतां। कैरातींवनकुसुमोज्वलां मयूरात्तपत्रकेतनिकां। सुरुचिरसिंहासनगां विभ्रमसमुदायमंदिरां
तरुणीं। ॐ ह्रीं हूं खेचछेक्षः स्त्रीं हुंक्षें ह्रीं फट् इतिमंत्रः। क्ष्वेलग्रहादिहरणप्रधानोयंमंत्रं। कालीकाशलहृन्नाभि
गुह्येषुच जानुजंघयोःपादयोश्चदेह ⁓ न्यासकुर्यात्। मंत्रेणव्यापकंसमस्तेनएकलिंगादिषुस्थानादिषु शक्तिमार्गेण
लक्षजपः। त्रिमधुरसिक्ताभिःबिल्वसमिद्भिर्दशांशंजुहुयात्॥ पुरश्चरणहोमः॥ अथपूजा। अष्टहरिविधृतसिंहासनेस
मावाह्य सरसिजेदेवीं पूजयेत्। जयायैविजयायै अजितायै अपराजितायै नित्यायै विलासिन्यै दोग्ध्र्यैअघोरायै मंग
लायै एताःपीठनवशक्तयः ॐ वज्रनखदंष्ट्रायुधायमहासिंहायहुंफट्नमः। श्रीखेचर्यैनमः तंत्ररत्ने। क्षंहूंहंवज्रदे
हधुरहिंगुलरगर्ज हूं हूं क्षंपंचाननापनम इतिवा इत्यादि अत्रावाह्यांगैः पूर्वादिदलेषुषट्सुसमर्चयेत्। अ
वशिष्टद्वये त्रणीतायै गायत्र्यै इतिपूजयेत्। श्रींहुंकारायै। श्रींखेचर्यैनमः श्रींचंडायै श्रींछेदिन्यैनमः ॐ क्षे रामः
पिण्यैनमः श्रींस्त्रियैनमः श्रींहुंकार्यैनमः श्रींक्षेमकारिकायैनमः इतिदलमध्योदलाग्रे भैरवांकस्थामातृःसं १७९

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूज्य तद्बहिः स्त्रीरूपैः श्रीबीजाद्यैः इंद्रादिभिर्वज्रादिभिः दलाग्रेषु फट्कार्यैनमः। इत्यग्रेतद्वाह्ये। शरायै शर
धारिण्यै। इति। जयायै। स्वर्णवेत्रधरायै। विजयायै। सुवर्णयष्टिधरायै। इति द्वारस्योभयपार्श्वे तत्पुरतः प्रेतासने
कृष्णायवर्वरकेशाय। लकुटधराय। किंकराय। रक्षरक्ष त्रिनाद्या स्थिरोभव हुं फट् इति। विशेषणनयमपि किंक
रस्यैव विशेषणं इति। तद्बहिः ॐ धात्रेनमः ॐ विधात्रेनमः अरुणैश्चंदनकुसुमैः समर्चयेद्देवीं। मंत्रदेवप्रकाशिका
यां। क्रों ह्रों श्रीं हूं भ्रूं ॐ ऐं क्ष्लूं ह्रों ॐ ह्रों हुं खेचछेक्षः स्त्रीं हुं क्षें ह्रीं फट् विंशाक्षरो प्युक्तः। अस्यापि सर्वं द्वादशाक्षरावत्। अथ
प्रयोगः। योनिकुंडस्यांतः प्रकल्प्य तत्रानलं समाधाय संपूज्य पूर्वविधिनाजुहुयात्। सर्वार्थसिद्धये मंत्रः। योनिरिति भु
वनेशी। इक्षुशकलैः समृद्ध्यै। दूर्वाभिस्त्वायुषे श्रियै धान्यैः। धान्यावयवैः। पुष्ट्यै। गोधूमैरऋद्धये तिलैर्जुहुयात्। जं
बूभिः स्वर्णसिराजीभिः शत्रुशांत्यै पेक्षतकैः। अक्षप्रसिध्यै। बकुलैः कीर्त्यै कुंदैर्महोदयायतथा। अरुणोत्पलैश्च पु
ष्ट्यै मधूकजैरिष्टसिद्धये ऽशोकैः। पुष्ट्यै। पुत्राद्यैपाटलजैः स्त्रीसिध्यै निर्गुंडैश्च विहितस्यै। पुष्टैरानीलोत्पलकैश्चंपक
जैः कनकरिद्धये पद्मैः। सहकिंशुकैश्च सर्वोपद्रवशांत्यै च मल्लिकापुष्पैर्जगद्वश्याय प्रबुद्धकमलै भूवश्याय। जंबू
फलैरिष्टधनाय आम्रोद्भवायुषे। बकुलपत्रैः शत्रूच्चाटनं शाल्मलीपत्रैः सपत्ननाशाय। नागैः प्रजोमर्कतोयाक्षैः ह

प्र॰सं॰ मकृत्वा यः साधको जुहुयात् । हुतसंख्या साहस्त्री त्रिस्त्रियुतान्वापुनी भवति। यावत्संख्यो होमस्तावज्जप्यश्च मं
१५० त्रिणां मंत्रः । इक्षुशालं सखंडशर्करै गोधूमं। कोतुंवै। जंबू। नावल्। राजिकडुरा। असतैबकुलं। बिबिल्।
कुंद कुरुकत्ति। अरुणोत्पलांशी ददामरैप्यू। मधूकंपिलुप्यै अशोकं अशोकपु पाटलं। पादरिपू। तत्समिद्ध।
इत्यर्थः। निवं। वेतु। नीलोत्पलं। कनेतल। पू। चपकं। चंपकपू। तत्समिद्ध। इत्यर्थः। किंशुकपुष्पैः। पत्रैश्च श्रद्धाम्य
मपिसर्वोपद्रव शांत्यैजुहुयात् किंशुके रेतै द्रंग्यै तत्तत्कला वास्ये त्रिसहस्रं वा अयुतमेव वा जुहुयात्। तदनंतरं ता
वत्प्रजयेच्च। प्रयोगांतरं। मनुमंत्रितै श्च वारिभिरासेकस्त्वे शांतिकृद्भवति। तज्जस्तयष्टिघाते मंत्रित चुलुकोदका
हृतिश्च तथा। तत्कर्णरंध्रज पात्स धोनस्क विषग्रहादिरुजः। चुलुकोदकं हस्तपरिमाणंजलं। अनेनत्वरिता
मंत्रेणजप्तैर्जलैः सेचनं वा एतन्मंत्रजप्तया यष्ट्या ताडनं वा। एतन्मंत्रजप्तचुलुकोदकसेचनं वा। एतन्मंत्रे
ण कर्णरंध्रेजपं वा कुर्यात्। विषग्रहादयो विनश्यंति। ग्रहादयो दुर्देवता विशेषाः। एतन्मंत्रस्थापनमपि विषग्रहादि
शांतिकृद्भवति। अथास्ययंत्रविधानमुच्यते।। आख्यां मध्ये सतारे मनुमर्थशतसंयुक्त विंशत्सटेषु प्रादक्षिण्येन सर्वा रामः
दिक्षु मनु विलिखेत्।। द्वादशावृत्ति मंत्री। विंशद्द्वाष्टि मूलाकलित विरचितं यंत्रमेतत् मजसंबद्धं क्षेत्र ग्रहार्ति १५०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हरति विजयलक्ष्मीप्रदं कीर्तिदं च। अस्यार्थः। प्रथमं पूर्वपश्चिमतः षड्रेखा विलेख्या पुनर्दक्षिणोत्तरवर्तिनोः प्रागग्रेषु दक्षिणोत्तरतः षट्रेखा विलेख्याः पुनरपि तयोरेव पश्चिमाग्रेष्वपि दक्षिणोत्तरतः षड्रेखा विलेख्याः एवं विलिखिते एकैकस्मिन् कोणे पंचविंशति कोष्ठानि जायंते एकैकस्यां दिशि पंच पंच कोष्ठानि च जायंते तैः सर्वैः संभूय मध्यकोष्ठ मृते विंशत्युत्तरशत कोष्ठानि जायंते तेषु कोष्ठेषु ईशानांत्यकोष्ठमारभ्य दक्षिणमागत्य आग्नेयांत्यकोष्ठ पर्यंतं हुं खेत्यादि त्वरिता मंत्रस्यैकैकाक्षराणि लिखेत् पुनः तत एव तन्मेषकोष्ठमारभ्य पश्चिममागत्य नैरृत्यांत कोष्ठ पर्यंतं विलिखेन्मंत्रवर्णान् एवं प्रादक्षिण्येन मंत्रमत्यावृत्या सर्वकोष्ठेषु विलिखेत्। एवमावर्ते सति मंत्रस्य द्वादशवारमावृत्तिर्भवति मध्यकोष्ठे प्रणवं विलिख्य तन्मध्ये साध्यनामादि विलिखेत्। पुनरेखाग्रेषु संभूयाष्टाचत्वारिंशच्छूलानि विलिखेत्। एवं विलिख्य जस्त्वा धृते उक्तफलं भवति। अथास्यैव मंत्रस्य निग्रहचक्रविधानमुच्यते।। आद्यंता मध्यगता नले लिखतु दिक्पंक्तिषु स्तुः सः हूं क्षूं ध्रूं क्ष्रूं करणादि षष्टिपदके शेषादिकाली मनुं। नैरृत्यादि तथाक्रमाधवृत्तं बाह्ये नले रावृत्तमोक्षं निग्रहचक्रमंतकपुरप्राप्तिप्रदं वैरिणां। अस्यार्थः। प्रथमं दक्षिणोत्तरतः पंचलेखा विलिख्य पुनस्तत्पश्चिमे दक्षिणोत्तरतः पंचरेखा आलिखेत्। पुनस्तयोर्दक्षिणाग्रेषु पूर्वपश्चिमतः पंचरेखा विलिख्य पुनस्तयोरुत्तराग्रेषु पश्चिमतः पंचरेखा विलि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· खेत्। एवं विलिखिते मध्यखंड मृते अशीति कोष्ठानि जायंते। तत्र मध्य खंडे अग्निबीजं विलिख्य तन्मध्ये साध्याद्यन्विलिखेत्॥
१५१ पुनश्चतुष्षष्टिषु दिक्खंड चतुष्टयेषु हूं क्षं चं क्रं इत्येतान् एकैकस्यां दिशि चतुर्षु खंडेषु सर्वेभ्यो बाह्यतआरभ्यांतरं ताः
क्रमेण विलिखेत्। एवमेव चतुर्दिक्षु खंडचतुष्टयेष्वपि विलिख्य पुनरन्येषु कोणोद्भूतेषु चतुःषष्टिखंडेषु ईशान्यकोष्ठमार नां
भ्य आग्नेयांत्यकोष्ठपर्यंतं कालीमंत्रस्याक्षरान्विलिखेत्। अवशिष्टाक्षरान् पुनरपि तदाधस्थकोष्ठेषु तथैव विलिख्यात्।
पुनर्नैर्ऋत्यांत्यकोष्ठ [illegible] मारभ्य वायव्यांत्यकोष्ठपर्यंतं तानेव कालीमंत्रस्याक्षरान् विलिखेत्। तत्राप्यवशिष्टाक्षरान्
तदधस्तात्कोष्ठेषु तथैव विलिख्यात्। पुनश्चतुष्षष्टिखंडेषु कालीमंत्रस्य ये वर्णा लिखितास्ते सर्वे पिक्रमेण यममंत्रस्यै
कैकवर्णवीता भवेयुः पुनरपि तद्बाह्ये अग्निबीजवीताश्च भवेयुः। पुनरपि तद्बाह्ये वायुबीजवीताश्च भवेयुः पुरुष
मुद्दिश्य चेत्। एवं स्त्रियमुद्दिश्य चेत् कालिमंत्रस्यस्थाने यममंत्रं विलिख्य कालीमंत्रेण वेष्टयेत्। अयं तु व्याख्यानोक्त
मार्गः पुनश्चतुष्षष्टिखंडात् बहिर्वृत्तत्रयं विलिख्य पूर्ववृत्ते यममंत्रवर्णैर्वेष्टयेत्। द्वितीयवृत्ते अग्निबीजावृत्या वेष्टयेत्।
तृतीयवृत्ते वायुबीजावृत्या वेष्टयेत्। रं इत्यग्निबीजं यं इति वायुबीजं। कालीमंत्र उच्यते। काली मार रमाली कार ली नमो राम
क्षह्म मो नली मामो दे तत दे मो मा रक्षतत्व हतक्षराइति। यममंत्रः पुनरस्य निग्रहचक्रस्य लेखनद्रव्यं च लेख्यपट्टविशेष १५१
कालीमंत्र। ~ पमाशा टटक्ति माप माटमोट टमोट मा। बा मो भूरिरिभू मो बा ठ टरी लत री।
टट इति।१

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्वलेखन साधनं प्रोच्यते। वह्निर्विण्निंवनिर्यासकल्कविषमती मिः सीसपट्टे शुके वा शावे पाषाणके वा विलिख्य तु मतिमान् काकपक्षेण यंत्रं। इति वह्नेर्विडिति वह्निश्चित्रकः तस्य विट् भस्म तेन लिप्या यंत्र निलनिशायः। निचं पानिर्यासं। विषमिति भ्रहधूमवह्निसूरणलवणोषणहेमवारि भिर्मिलितं विषमिति भीषणमुक्तमित्यहितानि ग्रहेषु नृणमिति हेमवारि आरक्तधत्तूररसः हधूमं। सूरणं। वनसूरणं। ऊषणं। त्रिकटुकं पक्षः। काकस्य पक्ष एव। एवं विलिख्य तरिता काली मंत्रीजप्त्वा स्थापयेत्। स्थापनप्रदेश उच्यते। वल्मीके चत्वरे वा क्षततरे चिवरे वा निदध्याद् दशति मृत्युं प्राप्नोति भृत्यादव पवविकलो व्याधितः पातितो वा। क्षनरु रितिभल्लातको वा स्तन पिलुहतवृक्षो वल्मीकं ... चत्वरं चतुष्पथः। असैव मंत्रस्य निग्रहचक्रांतरमुच्यते। चक्रे वाष्टाष्टपदे काली शिवयानुध्यानखेटाध्येम मदहनानिलबीतं विलिख्य विपदं डिमर्कटी लिखितं। जस्तनयो मुखमेतद्यंत्रं तु देशे विनिक्षिपेन्मंत्री। तत्रो नरुच्च मखिलं दिनशः सर्वात्मनानवदि। अस्यार्थः प्रथमं पूर्वपश्चिमनोनवरेखा विलिख्य पुनस्तदुपरि दक्षिणोत्तरतश्च नवरेखा विलिखेत्। एवं विलिखिते चतुःषष्टिकोष्ठानि जायंते। तेषु कोष्ठेषु ईशानादिकोष्ठमारभ्य दक्षिणतः क्रमेण पूर्वोक्तयंत्रवदेव काली मंत्रस्य अक्षराणि विलिख्यात्। पुनर्नैर्ऋत्यादिकोष्ठमारभ्य वायव्यांतकोष्ठपर्यंतं क्रमेण पूर्वोक्तयंत्रवदेव कालीमंत्रस्याक्षरान् विलिख्याव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुनर्बहिर्वृत्तत्रयं विलिख्य पूर्ववृत्ते यममंत्राक्षरैर्वेष्टयेत्। द्वितीये अग्निबीजैरावृत्त्या वेष्टयेत्।

प्र.सं. पुनः पूर्वोक्त यंत्रवदेव चतुःषष्टि कोष्ठगतान् अक्षरान् यममंत्राक्षरै श्चाग्नि बीजेन वायुबीजेन च क्रमेण वेष्टयेत्।
१५२ तृतीये वायुबीजेरावृत्त्या वेष्टयेत्। पुनर्विशेषेण दंडिना मर्कटिना च मषीलेपनं कुर्यात्। विषमिति पूर्वोक्तं। दंडीति
अस्य दंडी। चिरहते सुमर्कटी सुपिक्व रसं। पुनस्त्वरितामंत्र च यमकाली मंत्रो च जप्त्वा अधोमुखेन यंत्रं यंत्रस्थाप
येत्। तत्र उक्त फलं भवति ॥ अथास्यैव त्वरितामंत्रस्यानुग्रह चक्रमुच्यते ॥ खंडेषे काशीतिषु मध्ये दुकसाध्यं जस्वा
पूर्वं दिकस्थ चतुष्पंक्तिषु शैखं विलिख्यात्। लक्ष्मी शिष्ट चतुःषष्ठिषु विद्यानीशाद्य शून्यादि च बाह्येश्वरितास्थं। दिक्
संस्था मल्लपदापि वषंडां तां मेदोमाला वेष्टित बिंब घटवीतं पःस्थं तत् पंकजराजहृद नोतमोक्तं चक्र सम्यगथानुग्रह
वे संज्ञं। अस्यार्थः। प्रथमं पूर्व पश्चिमतः पंचरेखा विलिख्य पुनस्तदुत्तरतश्च पूर्व पश्चिमतः पंचरेखा विलिखेत्। पुनस्तयोर्द तामि
क्षिणोत्तर वर्त्तिनीः पूर्वाग्रेषु दक्षिणोत्तरतः पंचरेखा विलिख्य पुनरपि तयोरेव पश्चिमाग्रेषु पंचरेखा विलिखेत्। एवंवि
लिखेत् एकाशीति कोष्ठानि जायंते। तेषु मध्यम कोष्ठे चंद्रबिंबं ठकारं विलिख्य तस्मिन् साध्यनाम यंत्रं न्यासादीन्
विलिखेत् ॥ चतुर्दिकसंस्थेषु च चतुष्कोष्ठेषु बाह्यकोणादारभ्य तत्तः। क्रमेण जुसः वं पटद्दतेव तत् वर्णचतुष्टयमपि ताम.
एकैकस्मिन् कोष्ठे विलिखेत् एवं चतुर्दिकस्थेष्वतुः कोष्ठे व पिलिखेत्। पुनरीशानांत्यकोष्ठमारभ्य दक्षिणत आगत्यमध्य १५८

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कोष्ठं वर्जयित्वा आग्नेयांत्यकोष्ठपर्यंतं लक्ष्मीमंत्रस्य वर्णान् विलिखेत्। अवशिष्टान् वर्णान् अधस्तात् कोष्ठेषु
पूर्ववदेव क्रमेण विलिखेत्। पुनर्नैरृत्यांत्यकोष्ठमारभ्योत्तरत आगत्य तत्रापि मध्यकोष्ठं वर्जयित्वा वायव्यांतकोष्ठपर्यं
तं क्रमेण तस्यैव लक्ष्मीमंत्रस्यैकैकवर्णान् लिखेत् तत्रापि तदधस्तात् कोष्ठेषु पूर्ववदेव क्रमेणावशिष्टान् वर्णान् विलिखे
त्। पुनरेकाशीतिखंडयुक्तमंडलस्य बहिः एकैकस्यामपि दिशि त्वरितामंत्रस्य वर्णं विलिख्यात्। तत्र त्वरितामंत्रम्योंत्याक्षर फ
ट् पदस्थाने वषट् इत्येवं। संयोज्य विलिखेत् पुनस्तद्बहिर्वृत्तं विलिख्य तस्मिन्मेदोमालां वं वं इत्येवं मालाकारेणान्योन्यसं
बद्धं विलिखेत्। पुनरेतन्मंडलं घटस्थं यथा भवेत् तथा घटाकृत्या वेष्टयेत्तस्य घटः पद्मस्थो यथा भवेत्। तथा तदधः पं
कजं विलिखेत्। लक्ष्मीमंत्र उच्यते। श्री सा मा या या मा दि सा श्री सा नो पा शे शे या नो सा। माया लीला लाली या माया ह्रे
लाली लीला ह्रे या। इति लक्ष्मीमनुः। पुनर्लेखनद्रव्यं च लेख्यपट्टविशेषश्च लेखनीविशेषश्च फलं चोच्यते। लाक्षा
भिः कुंकुमैर्वा विलिखतु धवलावांशुके स्वर्णपट्टे लेखिन्या स्वर्णमय्या दृढमपि गुलिकां कमसं धारयेद्यः। कृत्याभ्यो
मृत्युतो वा ग्रहविषदुरितेभ्यो विमुक्तः स धन्यो जीवेत् स्वैः पुत्रपौत्रैरपि रिभिन महासंपदा दीर्घकालं धवलांशुकं
धवलपटं लाक्षे अलक्तकं घं कंजुरसं। अंशुके चेत् लाक्षारसेन कुंकुमैर्वा स्वर्णपट्टे चेत् स्वर्णलेखन्यापि लिखेदि
पुनर्घटन्द्रने पद्मादेकमहज्जद्रवेत्। तथा च उवदने पि ऊर्ध्वमुखपंकजं विलिखेत्। ५

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भ.सं. त्यभिप्रायः। एवं विलिख्य त्वरिता लक्ष्मी मंत्रो जप्त्वा धृतं चेत् उक्तफलं भवंति॥ अथास्यैव त्वरिता मंत्रस्यानुग्रह
१५३ कांतरमुच्यते। चतुःषष्ट्यंशेर्वा क्रमवदेवं लक्ष्मी मनुमसुशिवाद्यं नैर्ऋत्यादिकमपि चतुर्णामृतकृतां बहिः स्वच्छ
पट्टे कर्ने विहिते पूर्वं विधिना लिखित्वा जप्त्वा निक्षिपेत् हित वीर्येन विदिदं चक्रमनुग्रहसंज्ञं मंत्रीदेशेन संपदो
का२ विरतं। शुभतर फलदायिन्यो भवंति सत्यर्द्धिकाल वृष्याद्याः। अस्यार्थः। प्रथमं पूर्वपश्चिमतः नवरेखा विलिखेत्
पुनस्तदुपरि दक्षिणोत्तरतश्च नवरेखा विलिखेत्। एवं विलिखिते चतुःषष्टिकोष्ठानि जायंते। ईशानेत्य कोष्ठमार
भ्य दक्षिणत आगत्य आग्नेयांतकोष्ठपर्यंतं क्रमेण रमापत्नोः एकैकाक्षरान् विलिखेत्। अवशिष्टाक्षरान् तदधस्तात्
कोष्ठेषु पूर्ववदेव क्रमेण विलिखेत्। पुनरपि नैर्ऋत्यांत्य कोष्ठमारभ्य उत्तरत आगत्य वायव्यांत्य कोष्ठपर्यंतं लक्ष्मी
मंत्रस्य एकैकाक्षराणि विलिखेत्। तत्राप्यवशिष्टाक्षराणि तदधस्तात् कोष्ठेषु पूर्ववदेव क्रमेण विलिखेत्। पुनरपि
वृत्तद्वयं विलिख्य पूर्ववृत्ते त्वरितामंत्रेण वेष्टयेत्। द्वितीयवृत्ते अमृतबीजेन वं वं इत्यनेन वेष्टयेत्। लक्ष्मीमंत्र
स्य पूर्वोक्त मंत्रविधाने उक्तः। एवं कनकपट्टे स्वर्णादिलेखिन्या लिखित्वा त्वरिता लक्ष्मी मंत्रो जपित्वा स्थापिते उक्तफ राम
लं भवति। अथ त्वरिता यंत्रांतरमुच्यते। हुंकारे साध्यसंज्ञां विलिख्य तु तदधो कार्णिकायां वशिष्ठान स्तोवर्णान्। द १५३

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लेपारचयतु रमायांन्निशोवेष्टयीत ।कुंभस्थं यंत्रमेतत् सरसिजयुटितं सर्वरक्षाप्रसिध्यै क्लृप्तं सर्वोपसर्गोपशा
मनफलदं श्रीकरं वश्यकारि।अस्यार्थः।अष्टपत्रपद्मं विलिख्य तत्कर्णिकायां हुं इत्येतत् विलिख्य तन्मध्ये साध्यना
मादि यंत्रन्यायान्विलिखेत् पुनरष्टदलेषु खेचछेत्यादिमंत्राक्षरान् भुवनेशीं विनाअष्टौवर्णानेकैकं विलिखेत्।पुन
स्तद्बहिः हरमायां भुवनेशीं यन्त्रावेष्टनेन विलिख्य तस्याएवभुवनेश्याः ईकारेण तामेव भुवनेशीं त्रिंशावेष्टयेत् पुनरेतद्यं
त्रं कुंभस्यांतस्संपन्नः भवेत् तथा कुंभाकृतिं विलिखेत्।पुनःसकुंभः यथा सरसिजपुटितो भवेत्।तथा सरसिजरूपां वि
लिखेत्।एवं विलिख्य त्वरिता मंत्रं जप्त्वा धृते उक्तफलं भवति।इतित्वरिताविधानं समाप्तं।अथवज्रप्रस्तारिणावि
धानमुच्यते॥अंगिरोऋषिः त्रिष्टुप्छंदः वज्रप्रस्तारिणी देवता लिखेद्भूत्।ऐं शिरः क्रों शिखा नित्यकवचं मदने
त्रं द्रवे अस्त्रं॥ध्यानं॥इंदुकलाकलितोज्वलमैौलिर्मोरमदाकुलिमागयुगनेत्रा शोणितसिंधुतरंगितयोतध्ये
तिनभानुदत्वांबुजसंस्था दोर्धृतदाडिमसायकयाशांकुशपाशकपालसमेता शोणादुकूलविलेपनमाल्या शोण
तद्राभवतोवतुदेवी ———ऐं क्रों नित्यमद—— इति मंत्रः ऐश्वर्यप्रधानोयं मन्त्रः।स्मृत्वामित्यां देवीमेवप्रजपे
न्मतुं शतसहस्रं।अयुतजुहुयादनेन पतह्रसमिधा धृतेनवासिध्यो नृपतिरूजाजवृक्षः।वर्णौ लक्षंजप्त्वा नृपतह्रस

For Private And Personal

प्र.सं. निद्रिर्वा आज्येन दशांशं पुरश्चरण होमः इत्यर्थः ॥अथ पूजा विधिः॥ अष्टदल पद्मे पीठे। जयायै। विजयायै। अ
१५४ जितायै। अपराजितायै। नित्यायै। विलासिन्यै। दोग्ध्र्यै। अघोरायै। मंगलायै। इति शाक्तं पीठं संपूज्य तस्मिन्वज्रप्र
स्तारिणीं मंत्रदेवतां नित्यां देवीं समावाह्य समर्चयेत्। अंगैः प्रथमावृत्तिः। हृल्लेखायै। क्लेदिन्यै। नंदायै। क्षोभिण्यै
मदनातुरायै। निरंजनायै। रागवत्यै। क्लिन्नायै। मदनावत्यै। मेखलायै। द्राविण्यै। स्मरवेगवत्यै इति द्वादशपत्रेषु द्वि
तीयावृत्तिः। मातृभिस्तृतीयावृत्तिः। लोकेशैश्च तुर्या। इत्थमीरिता लोकहिताय वज्रप्रस्तारिणी मंदिरामिंदिरा यामया
सर्वनारीनरराजवर्गसंमोहिनी मोहनबाणभूता ॥इति वज्रप्रस्तारिणी विधानं समाप्तं॥ अथ नित्यक्लिन्नाविधा
नमुच्यते। संमोहन ऋषिः त्रिष्टुप् छंदः। नित्यक्लिन्ना देवता। ह्रीं हृत्। नित्यशिरः। क्लिन्ने शिखा मदकवचं द्रवे नेत्रं
स्वाहा अस्त्रं। ध्यानं। रक्ताकारकोंशुक कुसुमाविलिप्तादिकासेंदुमौलिः स्विद्यद्वक्त्रा मदवशसमाघूर्णितत्रीक्षणा च
दीर्घैत् पाशांकुशयुतकपालाभया पद्मसंस्था देवी पायाद्भिमतफलदा नित्यशः पार्वती वः। ह्रीं नित्य क्लिन्ने मदद्रवे
स्वाहा इति मंत्रं। लक्षं जपेत्। मधूकपुष्पैस्त्रिमधुरसिक्तैर्वा हविषैर्वा अयुतं जुहुयात्। पुरश्चरणार्थं मधूकं मधूक राम:
पुष्पं। अथ पूजाः। अष्टदलं पद्मं पीठे वज्रप्रस्तारिणी विधानोक्ताभिर्नवशक्तिभिः पीठं संपूज्य तस्मिन्नावाह्य नित्यक्लिन्नां १५४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देवीं पूजयेत्। अंगैः प्रथमावृत्तिः। नित्यायै। निरंजनायै। क्लिन्नायै। क्लेदिन्यै। मदनतुरायै। मदद्रवायै। द्राविण्यै। द्रविणायै।
इति द्वितीयावृत्तिः। लोकेशैस्तृतीयावृत्तिः। अथ प्रयोगः। प्रजपेत्स्मरदीं विचिंत्य यां वाशयनस्थो मनुवित्सहस्रमानं। निशि मार
षिलीं सुखाहतासा न चिरात्सा मदविह्वला समेति। नित्यभिः तद्दशतरान संति लोके लक्ष्मीदा जगद्दनुरंजनाश्च मंत्राः। इति म
श्रमहार्णवे संलिखिता॥ इति प्रपंचसारसंग्रहे गीर्वाणेंद्रविरचिते द्वादशः पटलः॥ अथ मूलदुर्गाविधानमुच्यते॥ श्रीनार
दऋषिः। गायत्री छंदः। मूलदुर्गा देवता। हुं बीजं। ह्रीं शक्तिः। ॐ ह्रीं दुर्गायै ह्रां हृत्। ॐ ह्रीं दुर्गायै ह्रीं शिरः। इत्याद्यं
गानि। ध्यानं। शंखारिचापशरभिन्नकरां त्रिनेत्रां तिग्मेतरांशुकलया विलसत्किरीटां। सिंहस्थितां ससुरसिद्धनतां च
दुर्गां दूर्वाभिभां दुरितवर्गहरां नमामि। ॐ ह्रीं दुं दुर्गायै नमः। इति मंत्रः। अष्टलक्षं जपेत्। सर्पिःतिलैर्न क्षीरपायसे
न वा मधुराप्लुतैस्तिलैर्वा अष्टसहस्रं जुहुयात्। पुरश्चरणहोमः। रक्षाप्रधानोऽयं मंत्रः। अथ पूजा अष्टपत्रकर्णि
कायां भुवनेशीं दलेषु दुर्गाष्टाक्षरं विलिख्य बहिर्मातृकायासंवेष्ट्य चतुरस्रकोणेषु नृसिंहबीजं विलिखेत्। अस्मिं
श्चतुरस्रेन वशक्तिभिर्यजेत्। इति विवरणे प्रोक्तं। ओं प्रभायै। ह्रूं मायायै। उं जयायै। ऐं सूक्ष्मायै। ऐं विशुद्धायै। ॐ नंदिन्यै।
ॐ सुप्रभायै। अं विजयायै। अः सर्वसिद्धिदायै। इति नवशक्तिभिः। अष्टदलेषु कर्णिकायां वसुमभ्यर्च्य पुनस्तत्कर्णिकामध्ये

For Private And Personal

प्र.स. ॐ वज्रनखायै युधाय महासिंहाय हुंफट् नमः। इति एकोनविंशेति वर्णमंत्रां इति समर्चयेत्। एवं पीठ कल्पनां
१५५ तस्मिन्नावाह्य समर्चयेत्। अंगैः प्रथमावृत्तिः। जं जयायै। विं विजयायै। कीं कीर्त्यै। प्रीं प्रीत्यै। प्रं प्रभायै। श्रं श्रद्धा
यै। मं मेधायै। श्रुं श्रुत्यै। इति द्वितीयावृत्तिः। चक्राय शंखाय। गदायै। खड्गायै। पाशाय। शशाय। धनुषे। इति तृती-
यावृत्तिः। लोकपालैश्चतुर्थी। तदायुधैः पंचमी। अथ प्रयोगः। विधाय विधिनानेन कलशं वाभिषेचयेत्। यमसो मृतवेता
लपिशाचाद्यैर्विमुच्यते। अयमर्थः। अनेन पूजाविधि क्वाथोदकादिभिः कलशं संपूज्य समभिषिंचयेत्। भूतवेतालादि
शांतिः। प्रयोगांतरं। पमुनाविधिना कृताभिषेका ललना पुत्रं नवाप्नुयादिनीतं प्रयोगांतरं। हवनातिलसर्षपैः सहस्रं हि
तयैरामु भवेच्च गर्भरक्षा। तिलसर्षपौ पृथगेकैकं सहस्रं जुहुयात्। इत्यभिप्रायः। अथ दुर्गामंत्रप्रसंगात्। शारदातिलो
कोक्तमहिषमर्दिनी मंत्रोपि लिख्यते। नारद ऋषिः। गायत्री छंदः। महामहिषमर्दिनी दुर्गा देवता। महिषहिंसे हुं फट् स्वाहा
हृत्। महिषशत्रुं सिनि हुं फट् शिरः। महिषं भीषभीषय हुं फट् स्वाहा। महिषं हने हनदेवि हुं फट् कवचं। महिषं निषू
दति हुं फट् अस्त्रं। ध्यानं। गारुडोपलसन्निभां मणिमौक्तिकुंडलमंडितां नौमि भाल विलोचनां दनकुंतलां महिषोत्तमांग राम
निषेदुषीं चक्रशंखकृपाणखेटक बाण कार्मुक शूलकां तर्जनीमपि बिभ्रतीं निजबाहुभिः शशिशेख – महिषमर्दिनी स्वाहा। १५५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्यष्टाक्षरो मन्त्रः। अष्टलक्षं जपः। तिलैरष्टसहस्रं जुहुयात्। अथ पूजा। पूर्वोक्ते मूलदुर्गापीठे समावाह्य समर्च्च
येत्। अं ऐः प्रथमावृतिः। अं दुर्गायै। इं वरमूर्तिन्यै। उं आर्यायै। एं कनकप्रभायै। ऐं कृत्तिकायै। ॐ अभयप्रदायै। औं कन्या
यै। अः स्वरूपिण्यै। एवं द्वितीयावृतिः। यं चक्राय। रं शंखाय। लं खड्गाय। वं खेटाय। शं बाणाय। षं धनुषे। सं शूलाय। हं कपाला
य। इति तृतीयावृतिः। इंद्रादिभिश्चतुर्थी। वज्रादिभिः पंचमी। अथ प्रयोगः। वश्ये तिलहोमेन नरान्नरपतीनपि। सिद्धार्थैर्जु
हुयान्मंत्री रोगान्मुच्येत तत्क्षणात्। पद्मैर्हुत्वा जयेच्छत्रून्दूर्वाभिः शांतिमाप्नुयात्। पालाशकुसुमैः पुष्टिं धान्यैर्धान्यश्रियं
लभेत्। काकपक्षैः कृते होमे विद्वेषं तनुते नृणां। मरीचहोमान्मरणं रिपुराप्नोति सर्वथा। क्षुद्रारिचोरभूताद्यान् ध्यात्वा
देवीं विनाशयेत्। अथ वनदुर्गाविधानमुच्यते। आरण्यक ऋषिः। अनुष्टुप् छंदः। वनदुर्गा देवता। हुं बीजं। स्वाहा श
क्तिः। उत्तिष्ठपुरुषि हृत्। किं स्वपिषि शिरः। भयं मे समुपस्थितं शिखा। यदि शक्यमशक्यं वा। कवचं। तन्मे भगवति
नेत्रं। शमय स्वाहा। अस्त्रं। ध्यानं। हेमप्रख्यामिंदुखंडात्तमौलिं शंखाविष्टाभीतिहस्तां त्रिनेत्रां। हेमाब्जस्थां पीतव
स्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि। इति सात्विकध्यानं। अरिशंखकृपाणखेटबाणान् सधनुः शूलककतर्जनीं दधा
ना। महतीं महिषोत्तमांगसंस्था नवदूर्वासदृशी श्रियेऽस्तु दुर्गा। इति राजसध्यानं। चक्रदरखड्गखेटकशरकार्मुकशूलसं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



त्रकक पालैः त्रुटि मुसल कुंद नंद कवल प्रगदा मिंदिपाल शक्त्याद्यैः। उद्यद्दिकृति भुजा श्यामा हिषकेसजलजलद
संकाश सिंहस्था वाग्निनिभा पद्मस्था चाप्य मरकतश्यामा। त्मा घ्रत्वकृ परिधाना सर्वाभरणान्विता त्रिनेत्रा च। अ
हिकलित नीलकुंचित कुंजल विलसत्किरीट कशशि कलास पालि वलयनूपुर कांचिनिकेयूर हार संभिन्ना
सुरदितिजाभयभयदा ध्येया कात्यायनी प्रयोग विधौ। प्रयोगविधौ रक्षानिग्रहादाविल्पार्थः। इतिताम संध्याने। उत्तिष्ठ



रुकिं स्वपिषि भयं मे समुपस्थितं। यदिशक्यमशक्यं वा तन्मे भगवति शमय स्वाहा। इति मंत्रः। उपद्रव शांति रक्षा प्रधानोयं
मंत्रः। पदद्वय संधि गुदांघु आधारोदर पार्श्व हृत्। स्तनेषु राक्षेदो। संधिबदनं नासा कपोल दृक् कर्ण पृर्क भ्रुवोर्न्यसेत्। इत्य
क्षरन्यासः। चतुर्लक्षं जपः। श्री हि ति लाज्य हविर्भिः दशांशं पुरश्चरण होमः। अथ वनदुर्गा यंत्र कल्पांतरोक्त मंत्रं लिख्य
ते। षट्कोणा कर्णिकं पद्ममष्ट पत्रं सकेसरं। तद्बहिर्द्वादश दले चतुर्विंश दले प्रपन्नः। तद्बहिर्वृत्त युगलं मध्ये
दु साध्य संपुतं दावदुर्गा षडंगानि कर्णिकास्य शडश्रिषु अष्ट पत्रेषु विलिखेन्मातिमान् महिषार्दिनी। दल द्वादश
केशाव दौर्ग वह्निशः। नक्षिशः। शिष्टं प्रथमं पत्रेषु चतुर्विंश दले पुनः। माका न नो युग्मं प्रति मंत्रं समालिखेत्। राम
त्रैष्टुभं प्रतिलोमेन तद्बहिः पत्र संधिषु वर्तुले प्रथमे वृत्ते अष्ट मूर्तीं भविन्यसेत्। द्वितीयो क्षासुधान्ये तद्बौर्णयं

णीन्द्र वर्णी२



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लि

गमनुत्तमं। अस्यार्थः। प्रथमं षट्कोणं तदंतः दुंदुं इति लिखेत्। तत्कोणेषु वनदुर्गा षडंगानि। तद्बहिरष्टदले विलिख्य ते
षु महिषमर्दिनी स्वाहेति अष्टाक्षराणि लिखेत्। तद्बहिर्द्वादशदलं विलिख्य तेषु ॐ तिष्ठस्यादि वनदुर्गा मंत्राक्षराणि त्रिश
स्त्रिशो विलिखेत्। अवशिष्टं पूर्वदले विलिखेत्। तद्बहिश्चतुर्विंशति दलं विलिख्य तेषु ॐ भूर्भुवः स्वः ज्वलज्ज्वालामालि
नि सर्वभूतसंहारकारिके वरदे जातवेदसे। ज्वल ज्वल प्रज्वल प्रज्वल हुं फट् स्वाहा इत्यस्याक्षरद्वंद्वं विलिखेत्। त
द्बहिः पत्रसंधिषु जातवेदो मंत्रं प्रतिलोमेन वेष्टयेत्। तद्बहिर्वृत्तद्वयं विलिख्य प्रथमे वृत्ते दुर्गायै नमः। वरव
र्णिन्यै। आर्यायै। कनकप्रभायै। कृत्तिकायै। अभयदायै। स्वरूपायै। इत्यष्टभिर्वेष्टयेत्। द्वितीये चक्रायै। कन्यायै
शंखाय। गदायै। खड्गायै। पाशाय। शराय। धनुषे। इत्येतैर्वेष्टयेत्। इति। अथ पूजा। कर्णिकायां बीजं। द्वादश
पत्रेषु षडंगानि पदावृत्तिद्वयं विलिख्य। प्रथमे वृत्ते त्रिष्टुभा वेष्ट्य द्वितीये वृत्ते मातृकया संवेष्ट्य चतुरस्रकोणे
षु ठमिति विलिखेत्। अस्मिन्मंडले नवशक्तिभिर्यजेदिति। विवरणे प्रोक्तं। मूलदुर्गायाः पीठसमावाहनस
मर्चयेत्। अंगैः प्रथमावृत्तिः। आर्यायै। दुर्गायै। भद्रायै। भद्रकाल्यै। अंबिकायै। क्षेम्यायै। वेदगर्भा
यै। क्षेमकायै। इति द्वितीयावृत्तिः। अस्योदराय कृपणाय। खेटाय। बाणाय। धनुषे। शूलाय कपालाय। इ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. तितृतीयावृतिः। मातृभिश्चतुर्थी। लोकपालैः पंचमी। अथ प्रयोगविधिः। उद्दिश्य यद्यदेनं मनुंजपेत्सहस्रम
१५७ युतं वात तन्मंत्री लभते त्वरितं तदनुग्रहादसाध्यमपि। प्रयोगांतरं। स्नात्वार्कोभिमुखः सन्नाभिद्वयसे भसित्ति
प्र तोमंत्री। अष्टोर्ध्वंशतं जपेत्। निजवांछितसिद्धयेच लक्ष्म्यै। नाभिद्वयसं। नाभिप्रमाणं। प्रयोगांतरं। ध्यात्वा त्रिशू पं
ह लहलांज्वरसर्वग्रविपत्स्त्र जंतूनां संस्पृश्य शिरसि जप्यात तर्जन्यं गुल्मा संस्पृश्य त्रिशूलहस्तां वनदुर्गां ध्यात्वाज
पेत्। तदुपद्रवनिवृत्तिर्भवति। प्रयोगांतरं। अयुतं तिलैर्वनोत्थैः राजीभिर्वा हुनेत्त समिद्भिर्वा रुमायूरिकोभि
रचिरात् सोपस्मारादिकांश्च नाशयति। वनोत्थतिलं। कृष्णतिलं। मा पूरं अपामार्ग। राजा। वदुघु। मायूरिको
नामुरिधिसमित्। अयमर्थः। एतेषु केकेनायुतं जुहुयात्। अपस्मारादिशात्वान्निवृत्तिर्भवति। प्रयोगांतरं। पि
जुहुयाद्रोहिणीसमिधामयुतं मंत्री पुनः। सशुंडां सर्वापदां विमुक्त्यै सर्वसमृद्ध्यै ग्रहादिशांत्यैच ऽरोहिणो
वटांसशुंगंसाग्रमित्यर्थः। अयमर्थः। शत्रुशांत्यर्थं चपिशाचादिशांत्यर्थंच अयुतं साग्राभिः वटसमिद्भिः जु
हुयादिति। प्रयोगांतरं। अर्कैः समित्सहस्रैः प्रतिजुहुयादर्कवार नारभ्य दशदिनाद र्वांवांछितसिद्धिर्देव्याः प्र राम
सीदतो भवति। अर्कः परुकु। अर्कवारमारभ्य दशदिने नित्यशः सहस्रं जुहुयादित्यर्थः। प्रयोगांतरं। शुद्धैः १५७

सिजप्यात्तर्जन्योपद्रवं शमयेत्। अयमर्थः। ज्वरेणवासर्पेण
वापिशाचादिनाताडिते साध्यस्य शिरसि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सारैरिध्मैस्त्रिदिनं वासमरात्रकं वाथोमतिशाकलं। प्रत्येकैकेन कुर्यात् दित्यर्थः। संख्यानुक्ते सहस्रमिति न्यायात्
सारसमिद्भिः सहस्रं जुहुयात्। निजवांछितसिद्धये। प्रयोगांतरं। विशिखानां त्रिंशत्कं पुरो निधायाथ तीक्ष्ण
तैलेन। जुहुयात्सहस्रकं वायुतमपि संख्यासु पूरितासु पुनः। संपातिततैलेन च शरान्समभ्यज्य पूर्ववज्ज्वा
त्। तानथ प्ररोधन्वी मुद्धाचारः प्रवेशये द्बाणान्। प्रतिसेनायां न च्येसा धावति। सघ एव संभ्रांता। भूयो गुरुं
धनैरपि धान्यैः परिपूरये त्स्वकाम्यिना। विशिखा बाणा। अंबु। तीक्ष्णतैलं। कटु चैण्ये। प्रयोगांतरं। अंष्टोत्तरं
शतं जप्तं यच्छिरसि प्रक्षिपेद्भिताभस्म सतु विद्विशतो कैंदै घा दे शांतरं परिभ्रमति। प्रयोगांतरं। कारस्करस्य
पत्रैरष्टसहस्रनिपातितैर्मरुता। जुहुयात्स पादपांसून् चटिकरं भवेद्रिपोस्तद्धः कारस्करं विषवृक्षः। अयम मि
र्थः। स्वयमेव पतितैः कारस्कारस्य पत्रैः अष्टोत्तरसहस्रं साध्यस्य पादपांसुभिर्युक्तैर्जुहुयात् रिपोरुच्चाटनं भवति
स । प्रयोगांतरं। सेनास्तंभयितुं विषतरुसुमनस्सहस्रकं जुहुयात्। तावद्विस्तत्रैर्मन्त्रो सेनां निवर्तयति। विषतरुसु
मनः। विषतरुपुष्पं। अयमर्थः। विषतरुपुष्पैः। परसेनास्तंभनार्थं। तत्रैः परसेन्योच्चाटनार्थं च सहस्रं जुहुयात्। प्र
योगांतरं। स्ववसारकोपत्रे जुहुयात्। पत्रे रु लूक वायसयोः। क्षिपते रातिर्मंत्रसु भन समित्सहस्रहोमेन। संस्था

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. पितानिलांताप्रतिकृतिमुष्णोदके विनिक्षिप्य प्रजपेत्तदुक्तस्याद्यन्तोदुग्धाभिषेकतः शांतिः ।उन्मत्तैर्धत्तूरं
१५८ साध्यनामयुक्तेन मंत्रेण उन्मत्तसमित्सहस्रहोमात् साध्यनाम उन्मत्तो भवति ।पुनरपि तेनैवोन्मत्तशाके
लेन साध्यप्रतिकृतिं निर्माय तस्यां प्राणप्रतिष्ठां च कृत्वा तामुष्णोदके विनिक्षिप्य तां स्पृष्ट्वा मंत्रं साध्यनामयुतं ज कीर्ति
पेत् ।शत्रोरुन्मादो भवति। अथ कादिमताख्ये नित्यातंत्रे प्रोक्तेन प्रकारेण सर्वत्र प्रतिनिर्माणलक्षणमुच्यते
साध्यजन्मांशकं ज्ञात्वा चंद्रांशकेषु चेत् । षोडशांगुलां सूर्यांशकेषु चेत् । द्वादशांगुलां अन्यांशकेषु अश्वि
न्यादिषु च नवसु नक्षत्रेषु चेत् । चतुर्दशांगुलां मघादिषु नवसु चेत् ।अर्ध्यर्द्धत्रयोदशांगुलां मूलादिषु
नवसु चेत् ।त्रयोदशांगुलां च प्रतिकृतिं कुर्यात् । तत्र सर्वत्र स्वाष्टमांशेन शिरोदेदो तावता वक्षः तावता जठरं
तावता नाभेराकटिबंधं ।द्विगुण्या दुरूलावता जंघे प्रपदे च यथा च यवशोभं विदध्यात् ।प्रयोगांतरं ।रविबिंब
गतामरुणां करयुगपरिकुसुम्भलिर्जनिकां ।ध्यात्वा युतं प्रजप्यात् मारयितुं सघर वनि हंति तर्जनी। तर्जन्यंगु
ली।अयमर्थः। उक्तलक्षणां देवीं सूर्यमंडले ध्यात्वा तस्यास्तर्जनी अधस्तात् साध्यं च ध्यात्वा युतं जपेत् । राम
उक्तफलं भवतिः प्रयोगांतरे ।असिख्येटधरकेस्थाकुद्दामास्वनिसैवजपं विधिनाअआपिअयुतसंख्याजपः ।प्रयो १५८

एवं सर्वत्र प्रतिकृतिनिर्माणविधानमुक्तं। पुनस्तच्छांतिः कर्त्तव्या चेत् क्षीरेण तां प्रति
कृतिमभिषिंचेत्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गांतरं। सिंहस्याबाणधनुःकरासमुच्चाटयेदरीनचिरान्।अयमर्थः। दुर्गायाः पुरतः धावमानं शत्रुं धावतीं च तां ध्यात्वा अयुतं जपेदुच्चाटनार्थमिति। प्रयोगांतरं। विषतरुसमिदयुतुहुतादथ करिणो रोगिणोभवंत्यचिरात्।गजानां मरणं भवति। विषतरुपुष्पैरयुतं जुहुयात्।प्रजानामुच्चाटनं भवति।प्रयोगांतरं। आदित्यसमिद्धोमाद्रोगान श्यंति दंतिनामचिरात्।आनिसं। दंती गजः।प्रयोगांतरं। तत्पुष्पैर्मधुराक्तैर्होमाद्वशीभवंति मातंगाः।अयमर्थः।अनित्यपुष्पैस्त्रिमधुरसिक्तैः संख्यानुक्तेः सहस्रमितिन्यायात् सहस्रं जुहुयात्।गजावशीभवंति।प्रयोगांतरं।त्रिमधुरसिक्तैरनित्यपत्रैर्मत्ताभवंति ते सद्यः।अयमर्थः। त्रिमधुरसिक्तैरनित्यपत्रैस्सहस्रं जुहुयात्।मत्ताभवंति ते सद्यः।आज्यतिलराज्यनित्यकेरदाक्षाकरसुकरिणां तज्जापितपंचगव्यलेपः स्यात्। दुग्धोदने पंचगव्यतंडुलैः केशसघृतैश्च प्रत्येकं सहहवतं गजाश्ववर्द्धनकृत्।अनित्सोनिंबमितिकेचित्। आज्याद्यैराज्यांतैरष्टद्रव्यैरेतैः प्रत्येकं सहस्रं हुनेदित्यर्थः।प्रयोगांतरं। द्विजभूसिंह माद्यातंत्यो त्वानिर्भिघपंचधाभूयः।आशाक्रमेण पंचायुधा विधेयाश्च साधुशिल्पविदा। शंखः तनंदकारिः शार्ङ्ग कौमोदकी दिशाक्रमतः।पंचेति पंचगव्ये निधाय जप्याच्च पंचसाहस्रेनावधृतेन जुहुयात्। तेषथः संपात्यसाधु संपात्तं पुनरपि तावज्जास्त्वा मस्याघवटेषु।पंचगव्ययुतं।संस्थाप्य समी कृ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्र सं· स्य बलिं हरेत्। तत्रतत्रतन्मंत्रैः। पुरशब्दग्रामाणां कार्या रक्षैवमेवमंत्रविदस्य त्विन् देशे निहिता रक्षेयं तत्र वर्द्धते लक्ष्मीः। ध
१५९ नधान्यसमृद्धिः स्याद्रिपुचोरादयाश्च नैव बाधंते। अयमर्थः पलाशवृक्षमेकं छित्वा तस्य वृक्षरूपेणावस्यानसमयेश्च
र्वादिक्स्य पार्श्वे पृथक् छित्वा तेन शंखं संपाद्य पुनस्तस्य दक्षिणदिक्स्थमपि पार्श्वं पृथक् छित्वा तेन नंदकायुधं संपा
द्य एवं पश्चिमदिक्स्थखंडेन चक्रायुधं संपाद्य उत्तरखंडेन शार्ङ्गायुधं सर्वं मध्यस्थखंडेन कौमोदक्यायुधं संपाद्य पुनर
तान् पंचगव्ये निधा[illegible] द्वा वनदुर्गामंत्रं चतुर्विंशतिपटले उपरि विष्णुपंजरे वक्ष्यमाणं तत्तदायुधमंत्रा
श्च पंचसहस्रं जपेत्। [illegible] सहस्रसंख्यं घृतेन हुत्वा तत्संपातं गृहीत्वा आयुधानां संपातस्पर्शं कुर्यात्। पुनरपि पूर्व
वदेव पंचायुधानि स्पृष्ट्वा वनदुर्गामंत्रं तन्मंत्रं च पंचसहस्रसंख्यं जपेत्। पुनः साध्यस्थले चतुर्दिक्षु मध्ये च पंचकुं
डानि खनित्वा तेषु पूर्वादिक्रमेण शंखाद्यायुधानि पंचगव्यपुतानि स्थापनीयानि पुनस्तानि कुंडस्थानि विधाय पु
नस्तत्र तत्र तत्तदायुधमंत्रैः शंखाय नम इत्यादिभिर्बलिं हरेत्। अक्षतादिद्रव्यैः पुनर्मूलमंत्रोक्तवदेव सर्व
त्र पूजा। पुनः। आयुधानां समीपस्थित्वा स्तोत्रं कुर्यात्। कुंदेंदुनीकाशमशेषयोपरक्षौ विषघ्नं वरधीरनादं। आ रा·म
स्मानिला पूरितमच्युतस्य शंखं सदा शरणमहं प्रपद्ये। प्रभासमंतं भुवनं महांतं सुपुष्करं पुष्करासो घृतं। वेविद्यामयं १६०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नंदकनामधेयं खड्गं सदा शरणमहं प्रपद्ये॥ प्रभासूर्यप्रतिमांशुजालस्फुरद्दहनद्विशिखावृतं च। ब म
त्कराग्रे पद्रिष्टमेनेव भुञ्जं सदा शरणमहं प्रपद्ये॥ येनाखिलं विश्वमिदं सुगुप्त हत्वादिसंधान् परमेश्वरेण।
समस्तदेवासुरदुर्निरिक्षं शरं सदा शरणमहं प्रपद्ये। सविस्फुलिंगान्वमतीं समंताद्दग्नीनशेषासुरदैत्यहं
त्रीं। कौमोदकीं वामकरे निषण्णामस्त्रं सदा शरणमहं प्रपद्ये। एवं कृते दुक्तफलं भवति। प्रयोगांतरं॥
पद्मोत्पलकुमुदहुतैः नृपबलीब्राह्मणान्वशीकुरुते अयमर्थः पद्मशतहोमात् नृपवशगाभवं
ति। उत्पलशतहोमात् नृपस्त्रियो वश्याभवंति। कुमुदशतहोमात् ब्राह्मणावशगा भवंति। प्रयोगां
तरं। कल्हारलोणहोमैर्विट्शूद्रौ जातिभिस्तथा कल्हारं चंपकसदृशं कमलं वा ग्रामहोरं। लोणं
जातिवर्केण अयमर्थः। कल्हारशतं होमे वैश्यावशगाभवंति। लोणशतहोमात् शूद्रावशगाभवं
ति। जातीकुसुमशतहोमात् ग्रामोवशगोभवति। प्रयोगांतरं। अथवारिदरगदांबुजकरमुकुंदंवि
चिंत्य रविबिंबे। व्यत्यस्तं पुरुषिभगवति पदमनुं जपन् सर्वसिद्धिकरं। अयमर्थः। चतुर्भुजं विष्णुं सूर्य
मंडले ध्यात्वा पुनर्वनदुर्गामंत्रं जपेत्। तत्र उत्तिष्ठ पुरुषीत्यत्र इकारांतं मंत्रुषौ उत्तिष्ठ पुरुषेति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रसं· अकारांतसंबुध्यायोजयित्वाजपेत् पुनस्तन्मे भगवतीत्यत्रापि पुल्लिंगसंबुध्यायोजयित्वाजपेत्। एवं जप्ते अ
१६० भीष्टसिद्धिर्भवति। प्रयोगांतरं। साध्याख्याक्षरगर्भितं मनुमिमं पत्रे लिखित्वा चतुश्चक्री— हस्तमुद्राकृतप्रति
कृते विन्यस्य मंत्री हृदि। स ताहं त्वथ सुतली मभिमुखे वस्थाप्य संध्यात्रयो जपादष्टशतं चिराय वशतां गच्छत्यसौ
निश्चयः। अयमर्थः। कर्णिकायां साध्यनाम लिखित्वा तद्बहिरष्टदलं विलिख्य तेषु वनदुर्गामंत्रवर्णात् विभाग
शो विलिख्य तद्यंत्रं तालपत्रे लिखित्वा कुलालहस्तात् श्लिष्टमृदा निर्मितायाः साध्यप्रकृतिकृते। हृदि विन्यस्य ता
प्रति— चिमां पुरतः संस्थाप्य त्रिदिनं त्रिसंध्यासु अष्टोत्तरशतं जपेत्। एवं जप्ते साध्यो वशी भवति। प्रयोगांतरं
व्रीहीणां जुहुयान्नरोष्टशतकं। संवत्सरात् श्रीहिमान्गोदुग्धैः पशुमान्। घृतैः कनकवान्। दध्ना च संवृद्धिमान्। अ
न्नैरन्नसमृद्धिमांश्च मधुभिः स्यात् द्रव्यवान् दूर्वयाप्यायुष्मान् प्रतिपद्धुतेन महतीं सद्यः श्रियं माप्नुयात्। अयमर्थः
एतैरुक्तैर्द्रव्यैरष्टशतसंख्यं दिनशो हुते तत्तत्फलं भवति। दूर्वायातु सामान्यो तु आयुष्मान्भवति। प्रतिप्रतिपदं
हुते दूर्वया लक्ष्मीर्भवति॥ अथ शूलिनीविधानमुच्यते॥ दीर्घतमा ऋषिः ककुप्छंदः श्रीशूलिनी दुर्गादेवता हुं
बीजं स्वाहा शक्तिः। शूलिनि दुर्गे देवसिद्धसपूजिते नंदिनि मां रक्ष रक्ष महायोगेश्वरि हुं फट् स्वाहा। शूलिनि व

For Private And Personal

रदे देवसिद्धसुपूजिते नंदिनि मां रक्ष रक्ष महायोगेश्वरि हुं फट् शिरः। शूलिनि विंध्यवासिनि देवसिद्धसुपूजिते नं
दिनि मां रक्ष रक्ष महायोगेश्वरि हुं फट् शिखा। शूलिनि असुरमर्दिनि देवसिद्धसुपूजिते नंदिनि मां रक्ष रक्ष महा
योगेश्वरि हुं फट् कवचाय हुं। शूलिनि वरदे देवसिद्धसुपूजिते नंदिनि मां रक्ष रक्ष महायोगेश्वरि हुं फट् अर्स्त्रत्रयाय
वौषट्। शूलिनि युद्धप्रिये त्रासय देवसिद्धसुपूजिते नंदिनि मां रक्ष रक्ष महायोगेश्वरि हुं फट् अस्त्रं। ध्यानं। बिभ्रा
णा शूलबाणासि सदर गदाचापपाशान् कराब्जैर्मेघश्यामा किरीटोल्लिखितजलधराभीषणा भूषणाढ्या ॥
सिंहस्कंधाधिरूढा वतसृभिरसिखेटान्विताभिः परीता कन्याभिर्भिन्नदैत्या भवतु भयभयध्वंसिनि शूलिनी वः ॥
ज्वलज्वल शूलिनि दुष्टग्रह हुं फट् स्वाहा। इति मंत्रः। पंचदशार्णः। शारदातिलके तु शूलिनी पदमपि वी(?)स्यात्
दशार्णोयं मंत्रः। रक्षाप्रधानोयं मंत्रः। पंचदशलक्षं जपेत्। आज्येन वा आज्यसिक्त हविषा वा दशांशं पुरश्चरणहो
मः॥ अथ पूजाविधिः। आं प्रभायै। ईं मायायै। ऊं जयायै। एं सूक्ष्मायै। ऐं विशुद्धायै। ओं नंदिन्यै। औं सुप्रभायै। अं
विजयायै। अः सर्वसिद्धिदायै। इति नवशक्तीभिरष्टदले पुनर्नवमीं कर्णिकायां च समर्च्य। पुनः ओं वज्रनखदंष्ट्रायुधा
य महासिंहाय हुं फट् नमः इति कर्णिकायां समर्च्य। अस्मिन्पीठे शूलिनीं समावाह्य समर्चयेत्। अंगैः प्रथमावृत्तिः॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र॰सं॰ दुर्गायैवरदायै । विंध्यवासिन्यै असुरमर्दिन्यै । युद्धप्रियायै । देवसिद्धसुपूजितायै । नंदिन्यै । महायोगेश्वर्यै । इति
१६१ द्वितीयावृत्तिः । रथांगाय । शंखाय । अरये । गदायै । बाणाय । कार्मुकाय । शूलाय । पाशाय । इति तृतीयावृत्तिः ।
लोकपालैश्चतुर्थी । अथ प्रयोगः । अंगकर्मैव रक्षाकृत् प्रोक्तं ग्रहनिवारणं । अयमर्थः । मंत्रस्यांगानि कुर्यात् सा
ध्यशरीरे तस्मादेतीव रक्षाकरं भवति । प्रयोगांतरं । उत्घुर्णैः प्रहरणैवै उदीर्णवेगैः शूलाद्यैर्निजमथ शूलिनीं
विचिंत्य । आविश्य क्षणमपि जप्यमानमंत्रस्यावृत्या द्रुतमपयांति भूतसंघाः अयमर्थः । आत्मानं शूलबाणादिभिः
श्लोकोक्तैरायुधैर्युक्तां शूलिनीं ध्यात्वा मंत्रजप्यात् भूतपिशाचादय आविश्य क्षणेन गच्छंति । प्रयोगांतरं । अंत
राथ पुनरात्मवैरिणो रंदिकामपि निजायुधाकुलां । संविचिंत्य जपतोरिमुद्रया विद्रवंत्यवशविग्रहाः ग्रहाः । अ
रिमुद्रा च चक्रमुद्रा । पाण्योस्तलद्वयमन्योन्यं संमुखं प्रसृतांगुलिकं । कनिष्ठिकाद्वयस्पृष्टांगुष्ठद्वयाग्रमन्यो
न्यदृढसंश्लिष्टं चक्रमुद्रा । रोगिणः साध्यस्य साधकस्य जमुश्च मध्ये शूलिनीं निजायुधयुक्तां ध्यात्वा साध्ये अरि
मुद्राप्रदर्शनपूर्वकं जप्यात् । तस्माद्ग्रहादयः पलायंते । प्रयोगांतरं । अहिमूषिकवृश्चिकादिकं चाव हुयात् कुकु राम
रलूतिको द्रवं वा । विषमाशु विनाशयेन्नराणां प्रतिपत्त्यैव च विंध्यवासिनी सा । अयमर्थः । अनेन मंत्रजपेन भस्मना १६१

For Private And Personal

वाशनानुक्रान्विषान्नाशयेत्। प्रयोगांतरं। आधायबाणे निशितेष देवीं क्षेमंकरीं मंत्रमिमं जपित्वा। तद्वेधनाद्देववि
पक्षप्रनादि शोदिधो शीवतिन एसंतृा। अयमर्थः। तास्मिन्वाणे शूलिनीं समावाह्य जप्त्वा तेन बाणेन वेधयेत्। प्रतिसे
नामध्ये तस्मात्सा सेना भ्रांता धावति। प्रयोगांतरं। आत्मानमार्याप्रतिपद्य शूलपाशान्वितां वैरिबलं प्रविश्य। मंत्रंजप
ण न्नाशु परायुधानि गृह्णाति मुक्तानि च बोधमेपां। अयमर्थः। शूलपाशहस्तां दुर्गामात्मानं ध्यात्वा शत्रुसेनामध्ये प्र
विश्य जपेत् उक्तफलं भवति। प्रयोगांतरं। तिलसिद्धार्थैर्जुहुयाल्लक्षं मंत्री सपत्ननामयुतं। स तु रोमादिकृतात्मा मृति
मेति न तत्र संदेहः। सिद्धार्थकटुकु। अयमर्थः। तिलसिद्धार्थाभ्यां पृथक् स्वाहाकारांते तत्पूर्वं वा साध्यनाम मारय मार
येति युक्तं लक्षं जुहुयात् मृतिर्भवति। प्रयोगांतरं। त्रिमधुरसिक्तैस्तिलैरष्टसहस्रं जुहोति योनुदिनं। अप्रतिहता
स्य शक्तिर्भूयात्प्रागेव वत्सरतः। अयमर्थः। त्रिमधुरसिक्तैस्तिलैरष्टोतरसहस्रं जुहुयान्नित्यशः। संवत्सराद्बलाधि
कं भवति। प्रयोगांतरं। सर्पिषाष्टसहस्र होमतो मुनावांछितं सकलमब्दतो भवेत्। अष्टोतरशतं नित्यशः आज्येन
जुहुयात्। वत्सराद्वांछितं लभते। प्रयोगांतरं। दूर्वयात्रिकमुजेप्सितं लभेत् सम्यष्टेगं शतसंख्ययाहुतात्। अयमर्
थः। अष्टोत्तरशतं दूर्वात्रिके जुहुयात् वांछितं लभते। प्रयोगांतरं। क्षुरिकाकृपा— नखरा मंत्रेणानेन साधुसंजप्ता। ध

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.स. संपाताज्यसुसिक्ता अप्रतिहतशक्तयो भवंति युधि। अयमर्थः। नखरा इति असिधेनुः उक्तान्येतान्यायुधानि शू
१६१ लिनीमंत्रेणाज्यं हुत्वा। संपातसिक्तानि चानेन मंत्रेण जप्तानि च युधि समीचीनानि भवंति। प्रयोगांतरं। गोम
यविहितौ गुलिकौ जुहुयाद्धृतमष्टपूर्वके मंत्री दिवसैः सप्तभिर्द्विष्टौ तु छिन्नमिथो वियोगिनौ भवतः। अयम
र्थः। गोमयगुलिकां कृत्वाऽष्टोत्तरशतं नित्यशः सप्तदिनं जुहुयात्। तस्माद्द्विष्टयोः साध्ययोरन्योन्यविद्वेषणं भ
वति। प्रयोगांतरं। अस्पृष्टकं गोमयं मंत्ररिक्षेसंगृह्य जप्त्वा त्रिसहस्रमानं। पिपासतां चैव विनेनराणां स्तंभ
नं ह्यापि मुखे च। अयमर्थः। गोमयं तु पशोर्गुदान्निर्गत्य भूस्पर्शनात्पूर्वमेव हस्तेनतत्स्पृष्ट्वा पात्रांतरे संगृह्य रिस
त्रिसहस्रसंख्यं शूलिनीं जप्त्वा कलहरूपेण समागतानां नराणां मार्गे वा तद्द्वारि वा स्वद्वारि वा निखनेत्। तस्मात्त
त्स्तंभनं भवति। प्रयोगांतरं। पानीयाधिमायां प्रसन्नां ध्यात्वा ग्रामं वा पुरं वाभिगच्छेत्। जप्त्वा मंत्रेण तर्पयित्वा प्रविष्टो
शिष्टभोज्यं प्राप्नुयात् भृत्यवर्गैः। अयमर्थः। अन्नजलहस्तां दुर्गां ध्यात्वा जप्त्वा तर्पणं च कृत्वा यत्र क्वापि गतश्चेत्तं
पूर्णमन्नं लभते। प्रयोगांतरं। अर्कैर्मंत्री त्रिमधुरयुतैरर्कसाहस्रमिध्मैः आप्यतैर्वा त्वतिविशत्रैतानि लैर्वा जुहोति। या राम
नुद्दिश्यावहितमनसा तन्मयेसम्यगग्नौ तेवश्याः स्युर्विधुरितधियो नात्र कार्यो विचारः। अयमर्थः। त्रिमधुरसिक्ताभि १६१
अथवासेनापाआतलिमार्गे स्थापयेत्।
तस्मात्सेनास्तंभनं भवति। ४

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रर्कसमिद्भिर्वातत्तिस्त्राभिरश्वत्थसमिद्भिर्वातत्तिन्नैरेवतिलैर्वायान्साध्यानुद्देश्य शूलिनीविधानेन पूजितेग्नौ
जुहुयात्। ते शीघ्रं चंचलधियो भूत्वा अस्यवशगा भवंति। प्रयोगान्तरं। कुर्यात्प्रयोगान पिदावदुर्गाकल्पोदिता
न्वैमनुनामुनाच॥ मंत्रीजपाद्याहुतितर्पणाद्यान्कल्पोपि मन्त्रोरनयोर्विशेषः। वनदुर्गाकल्पेजपोयहोमादि य
दुक्तं। तत्सर्वमनेन शूलिनी मंत्रेणापि कुर्यात्॥ तस्मात्तत्फलंभवति तत्रहेतुमाह॥ अनयोः शूलिनी मंत्रवन
दुर्गामंत्रयोः कश्चिदपि विशेषो नास्तीति हेतोः॥ इति श्रीगीर्वाणेंद्रविरचिते प्रपंचसारसंग्रहे त्रयोदशः पटल
॥१३॥ अथ शूलिनी मंत्र प्रसंगादाकाशभैरवकल्पोक्तं शूलिनी मंत्र मप्यत्र योग्यतावशाल्लिख्यते॥ त्रिपंच
कोष्ठेषु विलिख्य शूलिनीं मध्येच साध्यांकितमध्यबीजं॥ रेखाशिरः कल्पितशूलयुक्तं यंत्रं महद्घोरपिशा
चहारि॥ अयमर्थः॥ प्रथमं दक्षिणोत्तरतः रेखाद्वयं विलिख्य॥ पुनस्तस्य पश्चिमे च दक्षिणोत्तरतः रेखाद्वयं
विलिखेत्॥ पुनः दक्षिणाग्रयोः रेखात्रयं पूर्वपश्चिमतो विलिख्य पुनस्तयोरेवोत्तराग्रयोरपि पूर्वपश्चिमतो
रेखात्रयं विलिखेत्॥ एवं विलिखिते पंचदशकोष्ठानि भवंति॥ तेषुकोष्ठेषु पैशान्यमारभ्य शूलिनी मंत्रस्यै
कैकमक्षरं विलिख्य मध्यकोष्ठे दुकारं सबिंदुकं च भुवनेशी मध्यास्थितसाध्यनाम च विलिखेत्॥ रेखाग्रे

प्र.सं. षुशूलं विलिखेत्॥एतद्यंत्र मतीवरक्षाकरं॥अथाकाशभैरकल्पे शरभशालुवपक्षिराजकल्पे शूलिनीविधाने
१६३ प्रोक्तः प्रयोगविशेषोप्यत्र योग्यतावशाल्लिख्यते॥ ब्रह्माऋषिः गायत्री छंदः शूलिनी दुर्गा देवता दुं बीजं स्वाहाश
क्तिः प्रणवादिशूलिनी मंत्रः॥जपेत् षोडशसाहस्रं विधिपूर्वं जितेंद्रियः दशांशं तर्पयेत्॥पश्चाद्धुतांशं होमयेत्
ततः॥त्रिकोणं कमले कुंडं मथात्माभिमुखाग्रकं॥स्वस्वसूत्र विधानेन कुर्याद्धोमं वरानने॥शुक्रवारे तथा सौम्ये
सौम्यहोमं समाचरेत्॥ कुजवारे तथाष्टम्यां क्रूरहोमं विशेषतः॥पायसं च तिलापूपे घृतं मधु तथा दधि॥क्षीरं गु
डं च कदली तिलतैलं फलत्रये॥मुद्गसर्षपमाषैश्च कुर्यादेकैकशः क्रमात्॥दक्षिणाभ्यंगपूर्वं तु कारयेद्द्विजभो
जने॥इतिएतै रुक्तै र्द्रव्यैस्सर्वैः संभूय शतांशविभागेन पुरश्चरणहोमं कुर्यात्॥अथ पूजायंत्रं। त्रिकोणं विलिखे
त्पूर्वं तद्बहिर्वृत्तमालिखेत्॥तद्बहिर्वसुपत्राब्जं पुटीकृतमहीपुरं॥भूपुरद्वंद्वबाह्ये तु षट्कोणं विलिखेत्ततः॥को
णाग्रे शूलमालिख्य तद्बाह्ये पृथिवीं लिखेत्॥अनुलोमविलोमाभ्यां बहिः प्रणवमालिखेत्॥पूर्वे त्वेंकारमालि
ख्य दक्षिणे मन्मथाक्षरं॥श्रीकारं पश्चिमे भागे मायाबीजं तथोत्तरे॥त्रिकोणमध्ये देवीं तां ज्वालामालां विभावयेत्॥ राम
॥अस्यार्थः॥ प्रथमं त्रिकोणं विलिख्य तद्बहिरष्टपत्रपद्मं विलिख्य तद्बहिः भूपुरद्वंद्वं संपुटीकृत्य तं विलिख्य त १६३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्बहिः षट्कोणं विलिख्य तत्कोणाग्रे शूलमालिख्य तद्बहिश्चतुरस्रं विलिख्य तद्बहिरनुलोमविलोमेन प्रणवेनसं
वेष्ट्य तद्बहिः पूर्वभागे वाग्भवं दक्षिणे कामबीजं पश्चिमे श्रींकारं उत्तरे भुवनेशीं विलिखेदिति वश्याकर्षणयो रक्ता
श्यामास्तंभविरोधयोः॥ निग्रहोच्चाटयोः कृष्णा श्वेता मोक्षापरोक्षयोः॥ सारस्वतप्रयोगेतु मुक्ताधवलरूपिणी॥
एवं ध्यात्वा जपे दुर्गां शूलिनीं सर्वसिद्धये॥ तरसा शेषसिद्धिः स्यात्संहृतिस्तु विशेषतः॥ मंत्रांतरं॥ मध्ये शक्तिं वसुद
ललसच्छूलिनीं वर्णयुग्मं किंजल्कोद्यन्महिषमथिनीं मंत्रवर्णं बहिश्च॥ त्रिष्टुप्दुर्गालिपि परिवृत्तं भूपुराश्रांतरस्थं दु
र्गाबीजं त्वभिधमहितः शूलिनीयंत्रमेतत्। अस्यार्थः॥ प्रथमम् अष्टपत्रं विलिख्य तन्मध्ये भुवनेशीं दलमध्ये शू
लिनी वर्णद्वंद्वं विलिख्य केसरेषु महिषमर्दिनी स्वाहा इति मंत्रं विलिख्य तद्बहि स्त्रिष्टुभा संवेष्ट्य तद्बहिश्चतुरस्रं
विलिख्य तस्य कोणेषु दुर्गाबीजं दुमिति पार्श्वयोः साध्यनाम च विलिखेदिति॥ सवातवृत्तमृतुकोणं लक्ष्मीं च
मायामथ तारसंध्यें। आराध्य यंत्रं प्रजपेत्सहस्रं आकर्षणं स्यात्तु चराचराणां। यक्षगंधर्वसिद्धादि देवास्त्रि य
स्तथा॥ आकर्षति महाभूतान्कि मु भूलोकवासिनः॥ अस्यार्थः॥ प्रथमं च षट्कोणं प्रागग्रत्रये॥ श्रीबीजं इतरत्र
त्रये भुवनेशीं कर्णिकायां तारं च विलिख्य तस्मिन्साध्यनाम विलिख्य वायुबीजेन बहिर्वेष्टयेत्॥ इति अस्यर्थं

For Private And Personal

प्र·सं· न्त्रस्य मालामंन्त्रस्तु। ॐ नमो भगवति दिग्बंधनाथकंकालि कालरात्रि दुं दुर्गे थुं शूलिनि बंबटुकभैरवि अ
२६४ ट्टहास विलासिनि महानिशि प्रतापकेलिनि महात्राधरि सर्वभूत प्रेत पिशाच सर्वज्वर शांति निमद भीष्टमा
कर्षयाकर्षय महाबटुकभैरवि हुं फट् स्वाहा। ॐ नमो भगवति रुद्रकालि कालकूट मोहिनि ऐं क्लीं ह्रीं इ
ष्टकाम्यार्थ सिद्धि प्रदायिनि सकल त्रापिनि संक्रामिणि ब्राह्मी माहेश्वरी कौमारी वैष्णवी महेंद्राणि चामुंडि
बटुकभैरवे श्वरि आकर्षयाकर्षय आवेशयावेशय देवदत्तदेहं प्रवेशय प्रवेशय केलय केलय भाषय
भाषय ह्रीं क्लीं ऐं हन हन सप्त मातृके हुं फट् स्वाहा॥ इति द्वाभ्यां जपेद्यंत्रे। क्लींकारं वृत्तमध्ये तदनु वसुदले श
क्ति लक्ष्मीं लिखित्वा बाह्ये भूकोणयुग्मे दिशि दिशि मदनं तद्बहिस्तार साध्यं। लोहे ताम्रे तु पूज्य प्रयतनरवर
लत्सहस्रं जपित्वा खन्याद्यं त्रं नलिन्याम्मधुकमलयुतं होमकं कर्म कुर्यात्॥ ततस्त्वादाय तद्भस्म न्यंत्रं त स्मि
विलिख्य तु। संपूज्य विधिवद्देवीं सहस्रं प्रजपेत्ततः। तद्भस्मरोचनागंधकुंकुमेन ललाटके॥ तिलकं मंत्र
वित्कुर्यात्सर्वलोकवशंकरं॥ अस्यार्थः॥ प्रथमं वृत्तमध्ये काम बीजं ससाध्यं विलिख्य॥ तद्बहिरष्टद राम
लं पद्मं तत् प्रागादि दलेषु भुवनेशीं आग्नेयादि दलेषु श्रीबीजं च विलिख्य तद्बहिरष्टकोणं विलिख्य कोणेषु २६४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कामबीजं विलिख्य तद्बहिस्तारेगसंवेष्टतास्मिन्साध्यनाम विलिखेदिति ।। अस्य मालामंत्रः ।। ॐ नमो भगवति
क्षां क्षां र – – लं वं बटुकेशि एह्येहि संहर संहर महाकालिपतिमानसनिवासिनि परे शत्रून्नाशय नाशय शोषय
शोषय नरभूतप्रेतपिशाचादि सर्वग्रहान्नाशय नाशय दह दह पच पच सर्वस्त्रीपुरुषवशंकरि सर्वलोकभुव
नेश्वरि तद्दृष्टौ भ्रंशय मद्दृष्टिमानय स्वाहा ।। अनेन यंत्रं जपेत् ।। त्रिकोणकोणेष्वथ वन्हिबीजं वाह्येतु वृत्तं परि
तो धरिण्याः ।। कोणेषु धात्रीमभितोथ तारं साध्यावृतं स्तंभनमंत्रमेतत् ।। लोहेथ ताम्रे फलके विषमोः संलि
ख्य यंत्रं परिपूज्य जप्त्वा ।। सहस्रवारं प्रयतो मनीषी खनेत्स मायां रिपुदिङ्मुखः सन् । स भाकुटे रिपोच्छ्नेद्वा
रे तोरणमंदिरे । मातृस्थानेऽथवा प्राच्यांदिङ्ग्येष्टागृहेथवा जिव्हास्तंभं हनुस्तंभं भुजपल्लिं गगुह्ययोः ।। वक्त्रहृत्
श्रवणस्तंभं सर्वलोकेषु पिप्रिये ।। अस्यार्थः ।। तत्र धरण्याः कोणेषु भूबीजं भूपुरपार्श्वयोस्तारं विलिखेदिति ।
सबिंदुकं पावकदीर्घबीजं बाह्ये सलग्नाक्षरराशिकोष्ठं ।। प्रत्येकरेखास्त्रिशिखं ससाध्यं विद्वेषणं क्षोभक
र तदेतत् ।। एतत्समाराध्य जपेत्सहस्रं कृत्वा निशायां रिपुकेश्मशाने पुनर्जपेदेवमथो द्विषंतश्चान्योन्ययुद्धान्मरणं
प्रयांति ।। दशाहमेवं प्रजपेद्रिपूणां कुलक्षयाय प्रलयाय मंत्री ।। अस्यार्थः ।। मध्ये सदीर्घं आग्निबीजं विलिख्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तद्बाह्ये मन्त्रवर्णैः संवेष्ट्य तद्बहि राशिकोष्ठं विलिख्य तद्रेखाग्रेषु शूलमालिख्य तेषु शूलेषु साध्यनामविलिखेदि
ति॥ अथवा सल्लुप्ताक्षरमिति प्राक्सप्तमपटले राशिकोष्ठपरिक्षोक्तक्रमेण राशिकोष्ठेषु मातृकाक्षरान्विलिखेदि
ति॥ अथवा षोडशकोष्ठं कृत्वा मध्यस्य कोष्ठ(चतुष्टय)मेकीकृत्य परितो द्वादशकोष्ठानत्र मध्ये रां॰ उपरिस्थ द्वितीयको
ष्ठमारभ्य द्वादशसु चुचेचो लेत्याद्यक्षरनवकमिउ ऐइत्यादिनवकमेवंक्रमेण द्वादशसु नवनवाक्षराणि पंचा
क्षराणि रव्य तदग्रशूलं मध्ये तु वृत्तपवनं च कोणे॥ मायाफड् र्णं त्रिशिखाम साध्ये तारं ततो ग्याटनयंत्रमेतत्॥
सं पूज्य जप्त्वा विधिवत्सहस्रं खनेत् श्मशाने रिपुकेतु कोष्ठे। शत्रुः सबंधुः सगणः सवर्गः प्रयाति देशांतरमाशु
गेहात्॥ भवेद्विनाशो ग्रह मध्यगानां भूतादिचेष्टा बहुशो भवंति॥ स्वप्नोद्भवाः क्रूरगणो ल्वणाश्च पाषाणभीष
पतनं च पश्चात्॥ अस्यार्थः॥ वायुबीजं मध्ये ह्रीं फडिति कोणेषु शूलाग्रेषु साध्यनाम बहिः प्रणवेन वेष्टयेदिति॥
त्रिकोणं च लिखेत्सर्वं पंचकोणं ततः परं॥ वसुकोणं ततः पश्चात् ऋतुकोणं बहिस्तथा॥ भूकोणं तितयं बाह्ये लि
खेद्यंत्रं महोज्वलं॥ तारं साध्यं त्रिकोणांतर्वन्हिबीजेन योजयेत्॥ पंचारेषु ठकारांतं विलिखेत्साध्यमारुतं॥ बहि रा·म
रष्टसु कोणेषु साध्यचिंतामणिं लिखेत्॥ ततः षट्कोणेषु कोणे उंडीशं साध्यसंयुतं॥ चतुःकोणे देवदत्तम्मारयेति २६५

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पृथक् पृथक्। लोहे संलिख्य तत्तत्पुष्पेणाभ्यर्च्य पूजयेत्। अष्टोत्तरसहस्रं तु स्पृष्ट्वा जप्त्वा जितेंद्रियः। पर्वआरभ्य पर्वांते
निशायां दक्षिणा दिशि। दक्षिणाभिमुखो मन्त्री खनित्वा बलिपूर्वकम्॥ पुनः स्नात्वा जपेन्मन्त्रं मष्टोत्तरसहस्रकम्॥ तत्स्मा
द्रिपवः सर्वे प्रयांत्यव्याजमारणम्॥ अथवा साध्यवृक्षस्य समिन्मधुघृतान्वितम्॥ तिलसर्षपसंयुक्तं कुर्याद्धोमं यथाविधि
मन्त्रानेसाध्यमारोप्य मारयेति हुनेच्छिवे॥ सप्ताहान्मरणं यान्ति शत्रवो नैव संशयः। अस्यार्थः। त्रिकोणमध्ये प्रणवस्यान्तः
साध्यनाम विलिख्य वन्हिबीजेन वेष्टयेत्। पञ्चकोणेषु ठकारस्यांतर्वायुबीजं तदन्तः साध्यनाम। अष्टकोणेषु प्रसिद्धचिंताम
णिभुपरिवक्ष्यमाणमन्तस्साध्यम्। पुनः षट्कोणेषुएकादशस्वराक्षरं विलिखेदिति॥ ह्रीं श्रीं दुं देवदत्तराजरूपेण ज्व
लदेवदत्तशत्रु विशेषसंहारशूलिनि देवदत्त हुं फट् स्वाहा। सर्वसंहारमन्त्रोयं शत्रूणां सर्वशांतिदः॥ सर्वलोकैकवि
जयः साध्यकाभीष्टसिद्धिदः। अनेनैव विधानेन यः करोति प्रयोगकम्॥ सस्र्वविद्वेन्मन्त्री संशयो नास्ति तत्वतः।
एवं पुनर्जपेत्पक्षं शत्रुग्रामस्वनाशने। देशस्वनाशने चैव लोकक्षोभायपीडने। दुं ज्वालामालिनि विद्महे महाशूलि
निधीमहि तन्नो दुर्गः प्रचोदयात्। महादुर्गास्तमन्त्रोयं महादुरितनाशनः। निग्रहानुग्रहकरो निखिलाभीष्टदायकः।
नानाप्रयोगभेदेषु मूलं जप्त्वा विधानतः। सिध्यर्थमस्त्रमन्त्रेण मिश्रितं प्रजपेत्पुनः॥ संतानयंत्रमाह। बिंदौ लक्ष्मीं हुत

For Private And Personal

प्र·सं· बहपुटेमारगायत्रिवर्णान्मायांसंधौस्वरदललसच्छूलिनीमन्त्रवर्णान्। भूमौलक्ष्मींतदनुलिपिभिर्वेष्टितंसाध्यभेदैःस
१६६ त्सन्तानप्रदमपहरंविश्वसौभाग्ययन्त्रं।अवंध्यानांकुलस्त्रीणामाशुसंतानसिद्धये। यन्त्रमाराध्यपंचाहंवंधयेन्मन्त्रवित्त
मः।अयमर्थः।प्रथमंषट्कोणंपुनःषोडशदलम्। पश्चाद्भूपुरम्।पुनःषट्कोणमध्येबिंदुंतदंतः श्रीबीजंषट्कोणको
णेषुकामदेवायेस्वाहेतिमारगायत्रीवर्णान्षट्कोणकपोलेषुमायाबीजंह्रीमितिपुनःषोडशदलमध्येशूलिनीमन्त्रवर्णा
न्चतुरस्रकोणेषुश्रीबीजंतद्बहिर्मातृकावर्णैःसाध्यपुटितैर्वेष्टयेत्।मध्येमायांहुतवहपुटेशक्तिषट्कंसचंद्रंनागाश्रे।
मांस्वरदलगंहेशूलिनीमन्त्रवर्णान्नामाबीतंमणिलिपिवंतकाककाकाख्यवंध्यासत्सन्तानप्रदमथमुखाशेषदुष्टा
ं तार्त्यम्।अयमर्थः।प्रथमंषट्कोणम्।तदंतःभुवनेशीम्।षट्सुकोणेष्वपिभुवनेशीठकां रती।तद्बहिरष्टदलंतद
न्तःश्रीबीजन्तद्बहिःषोडशदलन्तेषुमन्त्रवर्णान्विलिख्यतद्बहिर्दलद्वयंविलिख्यप्रथमेवनेसाध्यनामास्रैर्वेष्टये
त्।द्वितीयेउपरिसप्तविंशतिपटलेवक्ष्यमाणअर्द्धनारीश्वरचिंतामणिबीजेनावृत्यावेष्टयेत्॥ ॥हुंकारंत्र्यस्रमध्येप
वनसखपुटेपावकोच्चाटबीजंफट्कारंचार्कपत्रेसकलितभुवनोच्चाटवर्णस्वराश्रे।मूलंमायापिवीतंसहमरुदखिलं राम:
पावकंसर्वसंधौभूतप्रेताहिदुष्टग्रहगणदुरितोच्चाटसंहारयन्त्रम्।समस्तानांचसध्यानांसत्त्वंतानस्यसिद्धये।ततयंत्रेण १६६

चैतच्चसमाराध्यपटांनरो तत यन्त्रार्थसिध्यैच तत्तदुरितशांतये। जप्त्वा मंत्री त्रिसाहस्रं वंधये त्वाव धानतः। निग्रहानुग्रहा
भ्यांयः कर्मभ्यां सर्वयोषितां। सस्कृत्स्य वंधये द्रुस्रास यः स वीर्यसिद्धये॥ अयमर्थः। प्रथमं षट्कोणं तदंतर्वृत्तं तत दंतः हुंमि
ति। षट्कोणेषुवं इति वरुणबीजं अथवाग्नि बीजं वायुबीजं चविलिखेत्। अथवारः इति पावकस्योच्चाटबीजं विलिखेत्। पु
नः द्वादशवदलेषु फडिति तद्बहिः षोडशारं विलिख्य तन्मध्ये साध्यं भुवनेश्याउच्चाटवर्णहः इति। पुनर्वृत्तत्रयम्। आ
द्ये मूले नद्वितीये माययात्तृतीये वायुनावेष्टयेत्। सर्वसंधिरेखायां वन्हि बीजं म्। विलिखेदिति॥ ॥शुक्रेचंद्रं षिखिपुटग्र
हेमारषद्कं सविंदु वारीशाश्रेमणि भिनयुतंशूलिनीं षोडशारो नामवीतं लिपिपरिवृतं जन्मजन्मास्व्यवंध्या दोषाध्वांत
प्रलयावमणिं पुत्र दं शत्रुवक्त्रम्। अयमर्थः। प्रथमन्त्रि कोणंतदंतश्चं प्रबीजं ठं इति। तद्बहिः षट्कोणं षट्कोणेषु सविं
दु कं कामबीजम्। द्बहिरर्द्धचंद्राकार वारुणरकोणे। अर्द्धनारीश्वरं चिंतामणि बीजं सप्तविंशतिपटलंव स्यणणं विलिख्य।
तद्बहिर्वृत्तं विलिख्य तद्बहिः षोडश दलेषु शूलिनीमच्च वर्णान् बिलिखेत् इति तत्र शु क इति त्रिकोणम्। तदुक्तं चश
रभभुजंगे। महानीरशुक्रानिलव्योमसोमा हरी शात्ममूर्त्तष्ट भेदस्वरूपम्। इति शो विष्केशयहा उबिकोदरमरु ट्कोणमा
रो दरे सर्पाश्रेगगनोदरेवसुदलेसर्वसहार्णोदरे। भूकोणे वरुणोदरोदिशि बहिर्नाम्नाष्टधामारुतम्। शुलिन्यंकितयन्त्रमेत

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दचिराद्गर्भादिकोच्चाटनम्। त्रिलोहे यन्त्रमाराध्य षोडशाहं सहस्रकम्। त्रिसाध्यैः प्रत्यहं जप्त्वा वायव्यां दिशि मन्त्रवित्।
कालरात्रौ खनेत्पश्चाद् दृष्ट्वा गर्भमुद्धसेत्। गर्भस्योद्वासनं द्रष्टुं ब्रह्मणापि न शक्यते। तस्मादिदं सुगोप्यं स्यात् कुर्याद्द
दृढ हृदा फलम्। दैवयोगाद्धृतं गर्भं पुनरायाति न क्वचित्। अंतर्हितस्य गर्भस्य पुनरागमनं नहि। तस्मात्कृतापराधायां कुर्या
नान्यत्र मन्त्रवित्। अस्यार्थः। प्रथमं त्रिकोणं तद्बहिः षट्कोणम्। तद्बहिरष्टकोणम्। तद्बहिरष्टदलम्। पुनः त्रिको
णोदरे भुवनेशींतदंतः वायुबीजं तद्बहिः षट्कोणकोणेषु कामबीजं तद्बहिरष्टकोणेषु ठमिति तद्बहिरष्टदलेषु
सर्वसहार्णोदरे इति सर्वसहार्णं भूमिबीजम्। ग्लौमिति विलिख्य। तद्बहिश्चतुरस्रं विलिख्य। तत्कोणेषु वमिति
विलिखेत्। त्रिकोणोदरोक्तवद्देवसर्वत्रोदरे वायुबीजं च विलिखेत्। तद्बहिरष्टदिक्षु साध्यार्णं वायुबीजं विलि
ख्य। तद्बहिश्चतुरस्रं विलिख्य तद्बहिः शूलिन्या वेष्टयेदिति॥ चन्द्रे चन्द्रसुबीजपंचकमथो सप्ताश्रके मामजां सूर्याश्रे
मणिबीजमष्टदलके श्रीशूलिनीं संस्मराम्। बाह्ये साध्यरमारतं लिपिवृतं श्रीजन्मकाकाख्यसंदृब्ध्य गर्भकरं त्रिलो
कदुरितस्वेलज्वरौघापहम्। अस्यार्थः। प्रथमं वृत्तं विलिख्य तन्मध्ये सोमिति सोमबीजं चतुर्दिक्षु मध्ये च विलि
ख्य। तद्बहिः सप्तकोणं विलिख्य तेषु श्रीं ह्रीं इत्या विलिखेत्। तद्बहिः द्वादशकोणं विलिख्य। तेषु वक्ष्यमाणार्द्ध



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नारीश्वर चिन्तामणिबीजं विलिख्य। तद्बहिरष्टदलम्। तेषु सकामबीजं शूलिनीमन्त्रवर्णद्वंद्वं विलिख्य। तद्बहिर्वृ
त्तद्वयं विलिख्य। प्रथमे वृत्ते श्रीबीजयुक्तसाध्याक्षरैर्वेष्टयेत्। द्वितीये मातृकया वेष्टयेदिति॥ मध्ये मन्मथमग्निकोणावि
वरे चिंतामणिं तस्य दैं जिसुं चन्द्रसमन्वितं वसुग्रहे श्री शूलिनीयंमनुम्। श्रांक्रांसूर्यसमन्वितं द्यादलेसाध्याखिलार्णावृ
तां पत्रं जन्मसृताख्य वंध्यवनितासंतान सौभाग्यदम् अस्यार्थः। प्रथमन्त्रिकोणम्। त्रिकोणकपोलेषु वक्ष्यमाणार्द्धनारीश्व
रचिन्तामणिम्। तत्कोणेषु ठकारयुक्तंलमिति विलिख्य। तद्बहिरष्टदलं विलिख्य। तेषु शूलिनीवर्णद्वंद्वं विलिख्य। तद्बहिर्द्वं
शैदलं विलिख्य। तेषु वृत्तं विलिख्य तदंतः श्रांक्रांमित्यावृत्त्या विलिखेत्। तद्बहिर्मातृकावर्णैः साध्यपुटितैर्वेष्टयेत्॥
मायां चन्द्रे हुतवहग्रहे कामराजं ससूर्यैः षट्कोणांतर्बलरिपुयुतं मूलबीजप्रभेदम्। आशाश्वासे मणिमिनयुते शूलि
नीसाध्यबाह्यं पत्रं पुत्रप्रदमखिल द काकजन्मापवज्जम्। अस्यार्थः। प्रथमं वृत्तं तन्मध्ये भुवनेशीं तद्बहिस्त्रिकोणं
तदन्तः कामबीजं तद्बहिः षट्कोणं तत्कोणेषु श्रीं ह्रीं ट्रुमित्यावृत्त्या लमिति युक्तया विलिखेत्। तद्बहिरष्टकोणं विलिख्य तत्को
णेषु चिंतामणि बीजं कोणस्य वृत्ते विलिखेत्। तद्बहिः साध्यवर्णपुटितैः शूलिनीवर्णैर्वेष्टयेदिति॥ ॥ अथवा सर्वत्र चन्द्र इ
त्युक्ते सकारः ऐंकारबिंदुनां कूटं वा ठकारेफबिंदुनाकूटं ब्रमिति वा। सूर्य इत्युक्ते गां तं द ह ननेत्रें दुसहितं तदुदीरितं

प्र·सं· इत्युक्तं भी इति सूर्यबीजं विलिखेत्॥ मध्ये भास्कर मग्निकोण राशिनं षट्कोणवैश्वानरं स्वस्वश्रेम णि मंष्ट पत्रद्विवे
१६८ श्री शूलिनीं सांबिकामथ स्तेगर्भ यये भवेद् विवरेस्ता ध्याखिलार्णाव्हतं यन्त्रं काकमृतास्य वंध्य वनिता संतानमिद्धि
प्रदम्। अस्यार्थः। प्रथमन्त्रिकोणन्तन्मध्ये रतम्। तत्कोणेषु विंदुम्। तद्बहिः षट्कोणम्। तत्कोणेषु अग्नि बीजम्। तद्बहि
रष्टकोणम्। तत्कोणेषु वक्ष्यमाण चिंतामणिम्। तद्बहिरष्टदलम्। तेषु शूलिनीमन्त्रा सरद्वं द्वं भुवनेश्या सह विलिख्य। त
द्बहिः द्वात्रिंशद् दलं विलिख्य। तेषु यस्तेगर्भमित्यग क्षराणि विलिखेत्। तद्बहिः साध्यपुटित मातृकावर्णैर्वेष्टयेदिति॥
शिखिमध्य चंद्र शिखिलस्मि सूर्य शिखियुग्म मारं क्षितियुग्मरलम्। वसुपत्रमन्त्रं स्मरनाम बाह्यं मृतजन्मवंध्यासुत
दं प्रशस्तम्। अस्यार्थः। प्रथमन्त्रिकोणे तन्मध्ये विंदुं तत्कोणेषु रतं तद्बहिः षट्कोणम्। तत्कोणेषु कामबीजम्। तद्बहिरष्ट
कोणम्। तत्कोणेषु उपरि वक्ष्यमाण चिंतामणि बीजम्। तद्बहिरष्टदलम्। तेषु मूलवर्णद्वंद्वम्। तद्बहिः साध्यपुटितेन का
मबीजेनावृत्या वेष्टयेत्। इति मृतजन्मवंध्या इति मृतवंध्या पाजन्मवंध्यायाश्चेत्यर्थः॥ ॥ राशिरत्नलक्ष्मीं शिखिकाममाया
मृतु भानु वन्हि वसु शूलिनीयं। परितो खिलार्णमणि नामबाह्यं मृतकाकवंध्या सुतदं त्वमोघम्। अस्यार्थः प्रथमं विंदुं त राम:
न्मध्ये चिंतामणिम्। तन्मध्ये श्री बीजम्। तद्बहिस्त्रिकोणम्। तत्कोणेषु कामबीजं भुवनेशीं च। तद्बहिः षट्कोणं विलिख्य। १६८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत्कोणेषुवृत्तम्। मध्येअग्नि बीजंविलिखेत्। तद्बहिरष्टदलम्। तेषुमूलवर्णद्वद्वम्। तद्बहिर्द्वन्द्वयम्। प्रथमेमातृकया
द्वितीयेसाध्यपुटितेनचिन्तामणिबीजेनावृत्तावेष्टयेत्। मृतकाकवंध्येतिमृतवंध्यायाश्वकाकवंध्यापाश्चेत्सर्थः॥ ॥
तवहरसकीलेरत्नचन्द्रार्कवह्नीन्सरयुतमखिलार्णैशूलिनीं षोडशारे॥स्मरमणिलिपिवीतंसाध्यपूर्णंवधूनाम्।जनि
तमृतकवंध्यापुत्रसंजीवनंतत्।अस्यार्थः। प्रथमन्त्रिकोणम्। तत्कोणेषुचिन्तामणिंचन्द्रार्कवन्हिबीजौनिरस्मौउ
र्ध्रिंरमित्येतानि। तद्बहिःषट्कोणम्। तत्कोणेषुचतथा। तद्बहिरष्टकोणम्। तेषुचतथा। तद्बहिःकामपुटितंमातृकावर्णै
र्वेष्टयेत्। तद्बहिःषोडशदलम्। तेषुशूलिन्येकैकाक्षरंविलिख्य। तद्बहिर्वृत्तत्रयंविलिख्य।प्रथमेवृत्तेकामबीजेनावृत्य
द्वितीयेचिंतामणिबीजेन।तृतीयेसाध्याक्षरैर्वेष्टयेत्॥ ॥मामायास्मररत्नबीजसुषिरंलूंकारवैश्वानरं लूंकारांकितकोण
षट्कमनुमांश्रीशूलिनीक्षाश्वकम्।यस्तेहंतिकचंखगाश्वविवरेरत्नांकविश्वांतरेयन्त्रंजन्ममृताख्यवंध्यवनितासंतानसि
द्धिप्रदम्।अस्यार्थः।प्रथमंवृत्तंम्।तस्मिन्श्रींह्रींक्लींरस्यौंहुं इतिविलिख्यतद्बहिस्त्रिकोणम्। तत्कोणेषुल्यूंकारंविलिख्य।
तद्बहिःषट्कोणम्। कोणेषुल्यूंकारंश्रीबीजंचविलिख्य।तद्बहिरष्टकोणन्तेषुमूलिन्यक्षरद्वयंविलिख्यतद्बहिर्द्वीत्रिंशद्दलंवि
लिख्य। तेषुयस्तेहंति इत्यक्षराणिविलिखेत्। तद्बहिः चतुरस्रम्। तत्कोणेषुचिंतामणिबीजंविलिखेत्। जन्ममृताख्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ध्य
वंध्याजन्माख्यवंध्यामृतारव्यवंध्याचेत्यर्थः॥ ॥एतानिदिव्ययन्त्राणिसद्यःसिद्धिप्रदानिवै। जन्मकाकमृतारव्यानांदिग्
नेंदुदिनक्रमात्। अष्टद्वादशषोडश दिनक्रमादित्यर्थः। सांगंहिसंध्यमाराध्यजलायन्त्राणिसंस्टशन्। भस्मनापिचसर्वां
गंहिसंध्यामभिषिंच। प्राशयित्वाभिमन्त्र्याज्यमुपविष्यफलत्वनम्। वंध्यये योपितांरसांसद्यःसंतानसिद्धये। सावधानकृतं
कर्मसद्यःफलनियोषिताम्। तस्मादेतानिकर्माणिसाधयेत्सावधानतः। । चन्द्रेकामंसपद्मांऋतुयहविवरेबीजयुग्मस्यष
ट्कंवस्वश्रेष्वन्त्मवर्णस्वरदलकमन्तेशूलिनीमन्त्रवर्णम्। द्रुमैमायांसकामांसकललिपिवृतांसाध्यनामार्णबाह्यंयन्त्रंस्त्री
जन्मवंध्यातनयकरमिदंपुष्टितुष्टिप्रदंच॥ अस्यार्थः। प्रथमंषट्कोणम्। तन्मध्येवृत्तम्। तन्मध्येकामबीजंश्रीबीजंच। षट्
कोणेष्वपिकामबीजं श्रीबीजंचविलिख्य। तद्बहिरष्टकोणम्। तत्कोणेषु चिन्तामणिबीजम्। तद्बहिः षोडशदलेषुशूलि
नीमन्त्रस्यैकैकमक्षरम्। तद्बहिश्चतुरश्रम्। तदन्तःभुवनेशींकामबीजंच। तद्बहिर्मातृकयासंवेष्ट्य। तद्बहिःसाध्याक्षरैर्वेष्ट
येत्॥ यन्त्रमेतदिदंगुह्यं अमोघंपुष्टिवर्द्धनम्। तुष्टिदंजन्मवंध्यानांसहसापुत्रसिद्धिदम्। दशाहंनित्यमाराध्यद्विसंध्यं
साध्यसंपुतम्। सहस्रमन्त्रं हुत्वाचवंध्येन्पुत्रसिद्धयेति॥ मायांकामंहुताशंठरविशशिनद्विनंवृतमध्येषडस्रेपद्मांवा
युसरन्ध्रंदशदलविवरेकामसूर्यौबिकार्णाश्च। वाह्येतारेशपत्रेमनुमिनमहितंभूपुरेमाध्यकामंयन्त्रंदिव्यंसमस्तग्रह



For Private And Personal

दुरितहरं काकवंध्याहितार्थम्। अस्यार्थः। प्रथमं षट्कोणम्। तदंते। रं तत्रयं तदंतर्भुवनेशी कामबीजाग्निबीजानि विलि
खेत्। षट्सु कोणेषु श्रीबीज वायुबीज चिन्तामणिबीजत्रयं विलिख्य। तद्बहिर्दशदलम्। तेषु तन्मध्ये कामबीजं भुवनेशीं
च विलिख्य। तद्बहिः षोडशदलपत्रन्तेषु वृत्तम्। तन्मध्ये शूलिनिमन्त्रवर्णान्। तद्बहिश्चतुरस्रम्। तत्कोणेषु कामबीजं
साध्ययुतं विलिखेत्। अत्र पटादिविशेषमाह। सीसेपत्रे हिरण्ये वा पत्रे मालिख्य मन्त्रवित्। वादगाहं समाराध्य मवो
गमभिमन्त्र्य च। अभिषिच्योचितैर्द्रव्यैः संपातनाज्याभिमर्शनम्। कृत्वा शेतरशानकं प्राशयित्वानुवासरम्। वंध्ययेन्मन्त्रवि
दुस्तां काकवंध्यासुताप्तये॥ युगबिंदौरविवारुणौ पुरुषद्वैरविपावकौ। वसुपत्रे स्मरमारुतौ रविपत्रे वसुधांबरे। कमलान्ते
वरशूलिनीं स्मरमायाकमलावृतम्। कलितैस्तत्तु तदायकं स्रवंध्यादुरितापहम्। अस्यार्थः। प्रथमं वृत्तं विलिख्य। तदं
तश्चरकं वृत्तं विलिख्य। तदंतवरुणबीजं विलिखेत्॥ तद्बहिर्द्वादशदलं तेषु ग्लौमिति विलिखेत्। तद्बहिः षोडशदलं ते
षु श्रीबीजमिलितान् शूलिनीमन्त्रवर्णान्। तद्बहिः कामबीजभुवनेशी श्रीबीजैरावृत्य साध्यवर्णमिति तैर्वेष्टयेदिति॥
अत्रापि कर्तव्यविशेषानाह। पंचलोहे त्रिलोहे वा ताम्रे सीसे यवायसि। आलिख्य मन्त्रमाराध्य शूलिनीमिष्टदापिनीम्। षो
डशाहं दिनं मन्त्र्य सहस्रं मायया सह। तैलाभिषेकहोमाज्यभस्मारव्यैः पंचकर्मभिः। शुद्धा पाबंद्धयेद् स्तां सहसा पुत्रसिद्धये॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र॰स॰ षट्त्रिंशत्कोष्ठकोष्ठे निगमशिखिगृहे रत्नधामूलमन्त्रं मायापूर्वं परात्मत्रिशिखकलनकं मर्मसुव्याप्तवह्निं। मायासार्णादि
१७० बाह्यं विखिलरिपुमनोगर्वनिर्वाणपैकं श्रौं ह्रं श्रीशूलियन्त्रं प्रणतभयहरं सर्वसंहारयन्त्रम्। भस्मन्येनत्समालिख्य साव
धानं सुलक्षणम्। आराध्यपरया भक्त्या निग्रहोक्तविधानतः। मायां तेत्विष्टरूपेण नाम्ना संहारशूलिनी। वैरिणो नाम तस्य
श्चात् वर्माधतं क्रमेण तु। उद्धृत्य विधिवन्मन्त्रं सावधानेन चेतसा। अर्द्धरात्रौ जपेन्मन्त्रं सहस्रं रिपुदिङ्मुखः। सहसासैव
तद्रूपा संहरत्यरिमाशिवम्। अनया वर्द्धिता कृत्या ब्रह्मणाप्यतिवारिणी। तस्मान्मन्त्रं तु शुद्धात्मा सर्वत्रा शुनयोजयेत्। या
पातु बाध्यया बाधुमिच्छत्यरिनन्यधीः। तथा संपीड्यमानात्मा शत्रुः क्षयमवाप्नुयात्। अस्यार्थः। प्रथमं पूर्वपश्चिमतः संत्र
रेखा विलिख्य तदुपरि दक्षिणोत्तरतश्च सप्तरेखाः विलिख्य एवं विलिखिते षट्त्रिंशत्कोष्ठानि जायन्ते। तेषु कोष्ठेषु प्रति
कोष्ठं त्रिकोणचतुष्टयं विलिखेत्। अस्यत्रोपदेशः। तत्तच्चतुरश्राकारकोष्ठेषु अग्निकोणमारभ्य वायुकोणावधिकां विद्रे
खां तथैव ईशानकोणमारभ्य निर्ऋतिकोणपर्यंतं कांचिद्रेखां विलिखेत्। एवं विलिखितेन तत्र तत्र त्रिकोणचतुष्ट
यं जायते॥ तेषु त्रिकोणेषु मायापूर्वकशूलिनीषोडशार्णं प्रतित्रिकोणं एकैकमक्षरं विलिखेत्। एवं विलिखिते शू राम:
लिनीमन्त्रस्य नवावृत्तिर्जायते। त्रिकोणाग्रसंधिषु प्रत्येकं वह्निबीजं विलिखेत्॥ संभूय षट्त्रिंशदनलबीजानि जा १७०

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यंते। तद्बहिः प्रत्यक्षरं मायासहितमातृकावर्णैः प्रतिलोमेन वेष्टयेत् रेखाग्रेषु अष्टविंशतिशूलानि विलिखेत्। ह्रीं
व्याघ्ररूपेण संहारशूलिनी देवदत्तं हुं फट् स्वाहा। तत्र व्याघ्रदंतिसर्पादीनामुपलक्षणम्॥ ॐ ईं तिर्यक्कोष्ठे प्रतिभव
नलसहेद्वैश्वानरांतं माप्राप्तारो द्रोपद्धि धिमुखलिपिभिर्मूलवर्णैः क्रमेण। पङ्क्तौनुविंशत्रिभिस्त्वपरिलसत्तनाम
मर्मस्वजीर्णा नाचोरस्मं शारिरोगग्रहदुरितहरं शूलिनी घोरयन्त्रम्। यन्त्रं मन्त्रमानिश्यमीसे वाग सिभस्मनि। दृष्ट्वा जपेत्त्रि
मा हस्रं मन्त्री माहै त्रयान्वितम्। दिवानिशमविच्छिन्नदीपद्धूतयमंनिधौ। सप्ताहं मन्त्रं वै नित्यं सहस्रं सर्वशांतये। क्षीर
मध्ये विनिक्षिप्य सहस्रं प्रजपेत्स्टशान्॥ नरसापंचबाधेभ्यो मुच्यते नात्र संशयः॥ अस्यार्थः॥ प्रथमं पूर्वपश्चिमतः षड्रे
खा विलिख्य तथैव दक्षिणोत्तरतः षड्रेखा विलिखेत्। एवं विलिखिते पंचविंशतिकोष्ठानि भवंति। तेषु कोष्ठेषु प्रतिको
ष्ठं त्रिकोणचतुष्टयं विलिखेत॥ तेषु त्रिकोणेषु मायाबीजोदरे प्रणवं विलिख्य। अस्योदरेषु नः पंचब्रह्मबीजपूर्वकशू
लिनीमन्त्रपंचदशवर्णान्। प्रथमपङ्क्तौ प्रतित्रिकोणं मध्ये एकैकवर्णशो विलिखेत॥ एवं द्वितीयतृतीयचतुर्थपंचमपङ्क्तिषु
विलिखेत्॥ रेखाग्रेषु शूलं शूलाग्रेषु साध्यनाम च विलिखेत्। कोष्ठमध्यत्रिकोणग्रेषु मायाबीजं ह्रींकारं विलिखेत्। सं
भूय पंचविंशतिमायाबीजानि भवंति। ऐं ह्रीं श्रीं क्लीं सौः एतानि पंचब्रह्मबीजानि श्रींह्रीं दुं देवदत्तदुरितशांतिरूपेण ज्वल

For Private And Personal

प्र.सं. ज्वलदेवदत्तदुरितविशेषसंहाररूपिणि शूलिनि देवदत्तदुरितं हुं फट् स्वाहा। इति साध्यत्रययुक्तो मन्त्रः। तत्र विधिमु
१७१ —लिपिभिरिति पंचब्रह्मबीजैरित्यर्थः। विधिमुखाः अंबुजन्मोद्भवसुररिपुरुद्रेश्वरशिवाः। तेषां पंचब्रह्मात्मकत्वं पंचविंश
पटले प्रासादविधाने वक्ष्यति। ऐतेषां बीजानां पंचब्रह्मबीजत्वं च तत्रैवाष्टत्रिंशत्कर— न्यासविधाने द्योतयति। पंच बा
णोति चोरयुक्त पंच बाणाः॥ चातुर्लिंशान्त्रिकोणे स्वरविहृदये शूलिनीं पंच वारं लक्ष्मी माया क पूर्व क्षिति निगमस्थ हेतारमा
रोदरार्णम्। भूयो मर्मास्त्रनंगं व्रणमणिकमले पंच संधौ हुतां शाम्। पंत्रं साध्येंदुबाह्ये। ग्रहदुरितहरं गर्भवृद्धिप्रदं च। पट्भे
दे समालिख्य पंचाहं पूज्य मन्त्रं वितन्। त्रिसंध्यं प्रजपेन्मन्त्रं षट्त्रिंशत्त्रिशताधिकम्। त्रिसंध्यमभिषिच्याथ भस्मना मन्त्र
सुस्थिरम्। बंधयेद्दूनयांत्यै च गर्भवृद्ध्यै सुखाप्तये। अस्यार्थः। प्रथमं दक्षिणोत्तरतः पंचांगुलिमानेन रेखाषट्कं अंगुलिमान
वीथीकं विलिखेत्। तत्र मध्यमवीथीं द्व्यंगुलिमानेन विलिख्य प्रथमषष्ठरेखयोः पार्श्वद्वयेपि प्रत्येकमेकांगुलिं मार्जयेत्।
द्वितीयपंचमरेखयोः पार्श्वद्वयेपि प्रत्येकं अर्द्धांगुलिमानं मार्जयेत्। एवं मार्जनं कृत्वा प्रथमवीथ्यां प्रथमरेखामारभ्य द्विती
यरेखासंबंधार्थं त्रिकोणत्रयं विलिख्य पंचमरेखापार्श्वद्वयं प्रथमवीथीगतमध्यत्रिकोणे त्रिकोणाकारेण योजयेत्। चतुर्थ राम:
रेखापार्श्वद्वयमपि प्रथमवीथीगतपार्श्वत्रिकोणाग्रयोः रुतरमुनरे दक्षिणं दक्षिणे योजयेत्। पंचमवीथीगतमध्यत्रिकोणे १७१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्रिकोणाकारेण योजयेत्। तृतीयरेखापार्श्वद्वयमपि पंचमवीथीगतपार्श्वद्वयवर्तिनोस्त्रिकोणयोरग्रे उत्तरमुत्तरे दक्षिणं
दक्षिणेन नियोजयेत्॥ पुनः प्रथमवीथीगतउत्तरत्रिकोणाग्रमारभ्य पंचमवीथिगतदक्षिणत्रिकोणाग्रपर्यंतं रेखां वि
लिख्य पुनश्च प्रथमवीथीगतदक्षिणकोणाग्रमारभ्य पंचवीथीगतउत्तरत्रिकोणपर्यंतं रेखां विलिखेत्। एवं विलिखिते
चतुस्त्रिंशत्त्रिकोणानि चमध्यमवीथ्यां चतुरस्रचतुष्टयं च जायते। स्वररवीति। विस्वरे द्वादशस्वरे इत्यर्थः। तत्र चतुस्त्रिं
शत्कोणेषु उ विस्वरमेकाक्षरं विलिख्य तेषु लक्ष्मीबीजमायापूर्वकशूलिनीमंत्रवर्णान् प्रत्येकमेकैकमक्षरं विलिखेत्। ए
वं विलिखिते मंत्रस्य द्विरावृत्तिर्भवति। मध्यमरेखाद्वयमध्यस्थचतुरस्रचतुष्टये प्रत्येकं प्रणवकामबीजलक्ष्मीबीज
दुर्गाबीजानि अंतरतः क्रमेण विलिख्य त्रिकोणचतुर्दशममर्मसु कामबीजं विलिख्य षट्रेखाउभयपार्श्वाग्रेषु चिंतामणि
बीजं च विलिख्य मध्यचतुरस्रस्य पंचसंधिष्वग्निबीजं विलिख्य तद्बहिर्वृत्तं विलिख्य साध्यनाम्ना वेष्टयेत्पुनर्वृत्तं विलि
खेत्॥ दीपाकाराः रणाग्नौ शशिहृदि दहनस्मारमायार्णपूर्वं मूलं वेदप्रमाणं त्रिशिखपरिलसत् निग्रहाजांसुसाध्यम्। म
र्मस्वाग्नेयमायेस्मरखलिपिवृत्तं नारमाया भिवीतं चोरक्ष्मेरोद्वपविहिंष। ——— सुन्वयभरणं पुष्टिदं सत्यमेतत्॥ अ
हे समालिख्य मंमगराजेन पूजयेत्। कुसुमपाद्यादिदर्शांतं प्रतिवारं सहस्रकम्। बीजत्रयां ततो नाचोररूपेण तत्स्वरंद्वि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



 ज्वैलैश्वर्यसंहारशूलिन्यरिवसुं ततः। हुंफट्स्वाहेत्ययंमन्त्रः शत्रुसंहरणाप्ततः। यस्यांदिशिखनेघंत्रतेनमार्गेणतस्क
 राः। आगत्यारिस्वमखिलंगृह्णंत्येवविशंकिताः। कर्मभिर्बलवद्भिर्वापालितंबलवत्तरैः। शूलिनीशासनादेवनश्यत्य
रिधनंस्वयं तस्मात्सर्वप्रयत्नेनसावधानेनचेतसा। साधयेत्साधकैःसर्वशत्रुदर्पनिवृत्तये। एवंग्रहग्रामपुरदेशसंप
त्क्षयायवै। साध्यमेतैंनसाधकःस्थिरमानसः। दीपेत्यष्टादशसंख्या आरुणइतिवेदाः। तेनचतुःसंख्याएतद्रूंभव
ति। दक्षिणोत्तरतश्चतस्रोरेखाविलिख्यतदुपरिपूर्वपश्चिमतस्तत्ररेखाविलेखनीयाः। एवंविलिखितेअष्टादशकोष्ठा
निजायंते। तेषुकोष्ठेषुपूर्ववत् त्रिकोणचतुष्टयंविलिखेत्॥ तेषुत्रिकोणेषुप्रतित्रिकोणंवृत्तंविलिखेत्। ततःअग्निबी
जकामबीजमायाबीजपूर्वकशूलिनीनीमन्त्रस्यवर्णान्प्रतित्रिकोणमेकैकमक्षरंविलिखेत्। एवंविलिखितेमन्त्रस्यचतु
रावृत्तिर्भवति। रेखाग्रेषुशूलंविलिखेत्। प्रतिशूलमग्निबीजमायाबीजसहितसाध्यनामा न्क्रमेणांतरंतर्विलिखे
त्। तत्रनिग्रहेतिअग्निबीजंम्। पुनस्त्रिरेखादिसंधिरूपेवर्म्मणिअग्निबीजंचमायाबीजंचअंतरंतर्विलिखेत्। तद्बहिः
सकाराद्यकारांतेमातृकयावेष्टयेत्। तद्बहिस्तारेणावृत्त्यावेष्टयेत्। तद्बहिर्मायया वृत्त्यावेष्टयेत्। श्रींह्रींदुंनानाचोर 
रूपेणज्वलज्वलदेवनैश्वर्यसंहारशूलिनिदेवदत्तवसुंहुंफट्स्वाहा। इतिसाध्यद्विनययुक्तोमन्त्रः अनेनजपेद्यन्त्रं 

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कोष्ठे षोडशसंमितैः प्रतिगृहं लिख्य। रणाग्नेः पुरंतारं स्मारविधूदरे मनुमजापूर्वम्मणिमम्मेसु। शूलाग्रेषु च साध्यानामनि
खिलैर्वर्णैः समावेष्टितं यन्त्रं भर्तृविरोधदोषशमनं संतानदं योषिताम्॥ यन्त्रमेतत्समालिख्य चंदनादिषु वस्तुषु हारिद्रे
वा समालिख्य जप्तानि लक्षं सहस्रकम्। शुक्लप्रतिपदारभ्य पूर्णिमांतं दृढव्रतः। बंधयेद्योषितां कंठे भर्तृकोपप्रशांतये
संतानसिद्धये सर्वसौख्याय शुभवृद्धये। अस्यार्थः। पूर्वपश्चिमतः पंचरेखा दक्षिणोत्तरतः पंचरेखा विलेखनीयाः एवं
विलिखिते षोडशकोष्ठानि जायंते। तेषु कोष्ठेषु प्रतिकोष्ठं त्रिकोणचतुष्टयं विलिखेत्। तेषु त्रिकोणेषु प्रतित्रिकोणं प्र
णवं च कामबीजं च वर्तं च अंतरं तद्विलिख्य वृत्तमध्ये मायापूर्वकशूलिनीमन्त्रवर्णानेकैकशो विलिखेत्। एवं या लिखिते
मन्त्रस्य चतुराष्टतिर्भवति। तस्य मध्ये सुचिंतामणिबीजम्। विलिखेत्। रेखाग्रेषु त्रिशूलं विलिखेत्॥ प्रतिशूलं साध्य
नामार्णान् विलिखेत्। तद्बहिर्मातृकावर्णैर्वेष्टयेत्। तस्मादुक्तफलं भवति। । एकारं तनमध्ये निगमसम दले दंपति
शेतिचाथात्। वस्ताद्वाह्ये दशारेस्य रमणि सहितं यस्त ऊ वादिरांतं योनिं यो अंतरारे त्यम्तक टदले शूलिनीयुक्तबाह्ये
सांध्यं नानावधूनां तनय हृमतुलं स्वप्रभोगादि वन्त्रम्। अस्यार्थः। प्रथमं चतुर्दलं पद्मं विलिख्य तत्कर्णिकायां यस्त ऊरू
इत्यचः प्रथमपादांत्याक्षरं येकारं विलिख्य चतुर्दले वदं पतीय इति वर्त्तुर्णं विलिख्य तद्बहिर्दशदलं विलिख्य तेषु का

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मबीजं चिंतामणि बीजं वांतरं विलिख्य पस्त ऊरू विहरत्यंतरेति दशार्णान्विलिख्य तद्बहिः षोडशदलं पद्मं विलिख्य तेषु
प्रणव पूर्वक शूलिनी मन्त्र वर्णाश्च योनियो अंतारालितमितोनु यायामसीति षोडश त्र वर्णांश्च विलिख्य। तद्बाह्ये साध्यव
र्णैर्वेष्टयेत्। ।मध्ये नाम समेद भाश्च विवरेकं दर्पवीजाष्टकं शूलिन्यष्टदलेर्मांसितिपुटे मापांचरे चिंतामणिम्। पं चाशल्लि
पिभिः श्रिया परिवृतं यन्त्रं जगन्मोहनं कन्यार्द्धिकरंकुचोद्भवकरं सौभाग्यभोगप्रदम्। अस्यार्थः। प्रथमं चतुरश्र द्वयपुटि
तरूपेणाष्टकोणं विलिख्य। तन्मध्ये साध्यनाम विलिख्य। अष्टाश्रेषु काम बीजं विलिख्य। तद्बहिरष्टदलपद्मं विलिख्य। ते
षु शूलिनी मंत्रार्णान्द्वंद्वशो विलिखेत्। तद्बहिश्चतुरश्र द्वयं पुटित्वा विलिख्य तस्याष्टकोणेषु लक्ष्मीमायाचिंतामणि बीजानि
विलिख्य। तद्बहिर्व्यंजनेमातृका वर्णैर्वेष्टयेत्। तद्बहिः श्री बीजेन वेष्टयेत्॥ मायागर्भस्य साध्याक्षरहृदि परितो मारुतं द्वं
व्यवाहं नागास्ले रुद्र वर्णं शशि दलकमले शूलिनीमष्टकोणे। कालार्णं साध्यमायाखिल लिपिसुवृतं विश्ववीयोग नानांग
र्भक्षीणप्रदं तद्दुरितकरमिदं गर्भसंक्षोभणं च। सौकुमार्यपरे यन्त्रं समालिख्य सलक्षणम्॥ आवाह्य कुलपंचम्यां पूर्वरा
त्रौ मरुन्मुखः। आराध्य साध्यसंयुक्तं जप्त्वा दशशतं सुधीः। नित्यमेवं क्रमेणैवापररात्रौ सुवर्शके। तस्मिंस्तौ। कांस्ययुग्मे
वासीमांतेवायथौचितम्। खनित्वा बलिपूर्वं तु जपेद्वूपस्य तु दिनम्। नाना विधारिपो षाणागर्भमत्यद्भूतं शनैः। क्षयं यान्ति



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वपरूसपसचंद्रकलाद्व। अस्यार्थः। प्रथममष्टपत्रंपद्मंविलिख्य। तन्मध्येभुवनेशींविलिख्य। तन्मध्येसाध्यनामविलि
ख्य॥ तन्मध्येवायुबीजमग्निबीजंचविलिख्य। मायाबीजस्यपरितश्चवायुबीजंवन्हिबीजंचविलिख्य॥ पुनरष्टदलेषुश्रीं
ह्रींरुद्राय नमः। इतिरुद्रमन्त्रंविलिख्य। तेषुपुनःषोडशदलंपद्मंविलिख्यतेषुप्रणवपूर्वकंशूलिनीमंत्र वर्णान्विलि
ख्य। तद्बहिरष्टकोणंविलिख्य। तेषुकलावर्णाख्यंमकारं विलिखेत्। तद्बहिःसाध्येनमायामायंचायाद्वर्णैश्चक्रमेण वेष्टये
त्॥ उक्तफलंभवति। सौकुमारपद्मंपितलं। ।अथ —— शूलिन्याःक्रियोत्कर्षयंत्रंलिख्यते। आलिख्याष्टाष्टकोष्ठेप्रतिग्रह
सुषिरंकीलपत्रंचमध्यात्प्राग्दक्षिण्येनपादु कंविहितरसरसतत्वास्तत्सामवर्णैः। मध्येरत्नंतुबीजंप्रणवपरि वृत्तंपंचधामू
लमन्त्रम्। संधौशूलाग्रसौध्यंविहितपरिवृतंसत्क्रियोत्कर्षमेतत्। ———————— अस्यार्थः। प्रथमंपूर्वपश्चिमतोनव
रेखाविलिख्य। तदुपरिदक्षिणोत्तरतश्चनवरेखाविलिख्य। एवंविलिखितेचतुःषष्ठिकोष्ठानिजायंते। तेषुचतुःषष्ठिकोष्ठे
षुप्रतिकोष्ठंकर्णिकावृत्तंविलिख्य। तद्बहिःकीलपत्रसंज्ञकानिदीर्घायामानाष्टपत्राणिकर्णिकारत्नाभिमुखानिविलिखे
त्। पूर्वपद्मावुत्तरकोष्ठगतकर्णिकावृत्तमारभ्यतदष्टदलेषुरसरसस्वाहेतिअकारादिषोडशस्वरसहितानिषट्त्रिंशद
क्षराणीत्यर्थयतत्रककारादिसकारांतात्र र्णाःपंचत्रिंशद्वर्णाप्रथमस्वरविकाराः षोडशस्वराःसर्वेपिसंभूयएकम

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र० सं० स्वरं प्राथमिकस्वरविकारत्वात् एतानि सर्वाणि संभूय षट्त्रिंशदक्षराणि एतानि षट्त्रिंशदक्षराणि सर्वाण्यपि प्रत्येकं अका-
१७५ रादिषोडशस्वरसहितानि भवेयुः। तत्कथम्। अ आ इ ई इत्यादिप्रकारेण अकारस्य षोडशस्वरयोगः। क का कि की ख खा
खि खी इत्यादिप्रकारेण इतरपंचत्रिंशद्वर्णानां षोडशस्वरयोगः। एवं योजिते तत्साम वर्णमिति कटपयादिसंख्यया षट्स-
प्तत्युत्तरपंचशताक्षराणि जायंते। एतान्यक्षराणि क्रमेण एकैकस्मिन् कीलपद्मकर्णिकादिक्रमेण दलेषु स्वाग्रादि अ आ
इ ई उ ऊ ऋं ॠं लृं इति नव लॄं एं ऐं ओं औं अं अः कं कां इति द्वितीयकीलपद्मकर्णिकायां स्वाग्रदलादिदलेषु एवं तत्नायादि-
षु नव नवाक्षराणि विभज्य विलिखेत्। पुनः। मध्ये रत्नं तु बीजं प्रणवपरिवृतं पंचधा मूलमन्त्रम्। संधाविति पूर्वलिखितरे-
खास्वेकाशीतिसंधयो विद्यंते। द्विरेखासंयोगः संधिरित्युच्यते। तासां संधीनां मध्ये मध्यसंधौ चिंतामणिबीजं प्रणवेनावृतं
विलिख्य तन्मध्ये साध्यनामादीन्विलिखेत्। इतरास्वशीतिसंधिषु प्रणवादिशूलिनीषोडशाक्षरीवर्णानामेकैकं विलिखे-
त्। एवं विलिखिते मूलमन्त्रस्य पंचावृत्तिर्जायते। पुनः रेखाग्रेषु शूलानि विलिख्य तेषु साध्यनाम विलिखेत् विहितपरिवृत-
मिति शूलाग्रेषु मूलमन्त्रवर्णैकैकयुक्तं साध्यनाम विलिखेदित्यर्थः। अथवा तत्तत्कार्यविशेषार्थमन्यं मन्त्रं वा यंत्रं वेष्टनार्थं राम:
विधास्यतीति तेनेत्यर्थः। तत्र मध्ये रत्नं तु बीजमित्यत्र तु शब्दाच्चिंतामणिबीजस्थाने तद्द्विहाय चतुरशीतिफलविशेषावाप्तये च १७४

तुरशीतिबीजविशेषान्विलिख्य चतुरशीतिप्रयोगविशेषः सूचितः। तत्सर्वमतिविस्तरभयादत्र न लिख्यते। तस्मा
दुरुमुखादेवावगंतव्यम्। ।मध्ये दुर्जंतु नाम प्रतिभरसुलिपिम्। निग्रहाजाभिवीतं षट्कोणे वीजभेदं स्मरहरस्यहि
तभूपुरे मूलमन्त्रम्। कोणाग्रे शूलसाध्यं सृमुखलिपिरतं स्लेष्टदुर्जंतुदंष्ट्रात्राशूणां क्षिप्रवंशास्यकरमतुलं शूलिनी
धारयन्त्रम्। अस्यार्थः। प्रथमं षट्कोणं विलिख्य तत्कर्णिकामध्ये साध्यदुर्जनोर्नामसाध्यपुरुषस्य नाम च विलिख्य।
तदुपरि अग्निवीजं भुवनेशीं च विलिखेत्। षट्कोणेषु दुं क्रीं ह्रीं इत्याद्यत्वा विलिखेत्। तद्बहिश्चतुरस्रं तत्कोणे
षु मूलमन्त्रवर्णान्विलिखेत्। रेखाग्रेषु शूलानि विलिख्य तेषपि साध्यनाम विलिखेत्। तद्बहिर्मातृकावर्णैः प्रतिलो
मेन वेष्टयेदिति॥ ॥पट्टफलकविशेषानाह। यंत्रमेतत्समालिख्य विषरसे सरूसणम्। आवाह्य दर्शदिवसे
मन्त्री साध्यत्रयान्वितम्। निशिसंपूज्य साहस्रं जप्त्वा पूर्णां तमन्वहम्। रिपुसेनेष्ववाकोष्ठे खनित्वा तद्दिगाननः पु
नर्जपेत्सहं वैरिनाशाय स्वेष्टं दशाहात्। पजंतु नाम लिखितं तद्दंष्ट्रा देयवैरिणः। नश्यत्यव्याजमचिराकुलिन्यात
त्स्वरूपया। निवृत्त्यै पूर्ववन्मंत्री क्षीरे निक्षिप्य वै जपेत्। नो चेद्दशातिसं बंधान्नाशयत्येव शूलिनी। तस्मात्सर्वप्र
यत्नेन नाशयित्वारिमात्रकम्। निवारयतु तद्दंष्ट्रास्त्रार्थं पुष्पवृद्धये। ।बिंदौ रलंसबीजं क्रतुगहविवरे सं दुशाक्षं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. गषट्कम्।वलयेषष्टवन्हिंस्वरदलकमलेषु.लिनीमन्त्रवर्णाम्।यस्यास्वप्नेनमन्त्रंफलदलकमलेसाध्यमायामिवीत
१७५ म्। यन्त्रंदुःस्वप्नवंध्यातनमयदमतुलंसर्वदुष्टाहितार्थम्॥अस्यार्थः॥ प्रथमंषट्कोणन्तदंतःर्वृत्तंतदंनःदुर्गाबीजस
हितंचिंतामणिबीजम्।षट्सुकोणेषुवृत्तस्यांतः—मायंगंतद्बहिरष्टकोणम्। तेषुवन्हिबीजम्।तद्बहिःषोडशदलम्।
तेषुशू.लिनीमन्त्रवर्णान् तद्बहिर्द्वात्रिंशद्दलंविलिख्यतेषुयस्यास्वप्नेनइत्यगसरान्विलिख्यतद्बहिःसाध्यपुरितांभुव
नेश्यावेष्टयेदिति॥ ॥पुत्रैर्जुहुयाद्ध्मैर्मंडलंवद्धिपल्लवैः।मंडलंभोजयेद्विप्रान्उक्तसंख्यंस्वशक्तितः।निजवंशद्
यस्निग्धपोष्यतत्स्निग्धवर्गिणाम्।पुत्रपौत्रमुखाशेषशुभवद्धिर्भविष्यति।तत्रपुत्रदमितिपुत्रवीजकम्। वद्धिपल्लवमि
तिगुडूची।अथवावारुणंसूक्तंजापयेद्धदवित्तमान्। अष्टषोडशषट्त्रिंशच्चत्वारिंशत्—पंचकान्।आगुलस्थिरतोयस्या
न्अतिगंभीरमानसान्।गुलूचीसोमवल्लीभ्यांजुहुयात्तस्मंदिनम्।मंडलादेवतद्द्रव्यंवृष्ट्यापूर्णोदकंभवेत्।योन्वर्द्धंव
र्षणमासिन्दृष्टिसिध्यैजितेंद्रियः।जपहोमक्रियाःकुर्यात्कारयेद्वायथाविधि।अवग्रहैरनावृष्टिर्नभवेत्तस्यराजके।
अथवारिविपज्जन्मवधप्रत्यरिभद्रमान्।तमित्सहस्लमादायव्योषसैंधवसर्षणैः।गोघृतैर्जुहुयान्मंत्रीविजयायसुखाप्त राम:
ये।व्योषंत्रिकटु॥ ॥अथान्यंसंप्रवक्ष्यामिविचित्रकरणंपरम्।सर्वदोषहरंश्रेष्ठंसर्वाश्चर्यकलावहम्।गौमयेनसमा १७५

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लिप्य भूतलं चतुरस्रकम्। कृत्वाम्बितासने नैव नवकोष्ठसलक्षणम्। हरिद्रालेपितं न्यस्य संगंधाक्षतसुमार्चितम्। संस्था
प्य धूपितं मध्ये घृतदीपोज्वलच्छिखम्। कार्योमबीजं माहेंद्रे सर्षपं हव्यवाहने। मरीचि लवणे याम्ये तिलनिंबदलेसु
रे। वारुणे कलशं सोदं शाखानिंबस्य मारुते। रक्तप्रसूनं कौबेरे भस्मैशान्ये क्रमात्सुधीः। प्रागास्य उदगास्यो वा समासीनः
स्थिनोपि वाऽऋषिन्यासादिकं कृत्वा शू. लिनी देवताभयः। क्षुद्ररोगग्रहग्रस्तं वामे संस्थाप्य भागको दक्षिणे काष्ठजांगारे
धूम ज्वालाविवर्जितम्। ॐ नमः कृष्णवाससी स्यनयाक्षरसंख्यया। दीपादिद्रव्यभेदानिमन्त्रीनत्साध्ययुक्तया। तत्र नमः
कृष्णवाससीत्यादि द्वात्रिंशत्सटलानंतरं प्रत्यंगिराविधानेवक्ष्यमाणः प्रत्यंगिरामालामन्त्रः। क्षुद्रादिक्षेष्ट शमनी हवाला
यां शूलिनी स्वाहा। आवाहनादि पूजांतं पञ्चपोपचारकैः। दीपन्त्र्यंसं समादाय नामाघर्णः स्वरादिकम्। नामाघर्णाः स्वरा
दिकमितिनामवर्णास्वरवर्णैकैकपूर्वकं मूलमन्त्रं जपेत्स्यर्थः। केशादिपादपर्यंतं अवनार्यावतार्यसः तन्त्रन्यस्मिति
नारकेलम्। परिणीपत्रि यातेनग्रस्तं नहेहमंजसा। अंतस्थं देवमुक्तं ध्यात्वा हुंकारपूर्वकम्। नारिकेलमतिक्षिप्रं व
लिं दद्याच्छिलातले। इंद्राद्यसुरपर्यंतकोष्ठद्रव्यैः पृथक्क्रमात्। मन्त्रेणपरिणीयाथा जुहुयाज्जातवेदसि। आदाय सोदक
लशं परिणीयाभिमंत्रयन्। छायान्वयनयोस्तारपश्यंतं मन्त्रपंच धाँपि धाय चंद्रदीपेनकलशं धारयेद्बहिः। विजये मंन्त्र

प्र·सं· विमुक्तं पंचवा निंबशाखया। रक्तपुष्पैस्तयामन्त्र्य निक्षिपेद्मलोदके। भस्मना मन्त्रके शादिपादांतं मातृकान्वितम्।
१०६ ततो दिव्यौषधं पुंसा दानहोमजपार्चनैः। दिव्येन कर्मणा तेन शूलिनी देवताज्ञया। नानाक्षुद्रमहारोगग्रहैर्मुक्तो भ
वेत्सदा। तदाद्यारोग्यपर्यंतं वीक्षणस्पर्शभाषणैः। द्विसाध्यं मन्त्रयेन्मंत्री निंबपत्रेण भस्मना। यदाकदाचिदथवा प्राप्ते यदि
विजृंभणे। तदाज्यक्षारादिभिर्द्रव्यैर्मंत्री त्तमन्त्रयेद्द्विधा। तथापि ज्वलिते तस्मिन् चिकित्सा नास्त्यसंशयः ॥ अथ दुर्गाम
न्त्रप्रसंगान्मन्त्रसारोक्तः पक्षिदुर्गामंत्रोपि लिख्यते। कश्यप ऋषिः गायत्री छंदः पक्षिदुर्गा देवता। ॐ ह्रीं दुं दुर्गे हृदयाय
नमः। पक्षिरूपिणि शिरः। धूं धूं धूं शिखा। धूं दहासाग्निरौ कवचां ह्रीं धूं धूं नेत्रम्। स्वाहा अस्त्रम्॥ ध्यानम्॥ उद्यत्तोद्दा
नरकप्रभनयनयुगद्वंद्वनिर्यत्कृशानुज्वालामालातिभीमां विकटतरकरालोग्रतीक्ष्णायतुंडाम्। पक्षोत्क्षेपप्रचंड
लवदलजकद्दाविताराति संघां दुर्गाभिन्नांजनाभां खरतरनखरां पक्षिरूपां नमामि। ॐ ह्रीं दुं दुर्गे पक्षिरूपिणि धूं धूं धूं धूं
दहासाग्निरौं ह्रीं धूं धूं स्वाहा। इति मन्त्रः। धूंकारषट्कयुक्तः चतुर्विंशतिवर्णः॥ उच्चाटनप्रधानोयं मन्त्रः। लक्षजपः।
आज्याक्ताभिरर्कसमिद्भिर्दशांशपुरश्चरणहोमः। अथ पूजा। आं प्रभायै। ईं मायायै॰ ऊं जयायै॰ ऐं सूक्ष्मायै॰ ऐं विशुद्धा राम:
यै॰ ओं नंदिन्यै॰ औं सुप्रभायै॰ अं विजयायै॰ अः सर्वसिद्धिप्रदायै॰ इत्यष्टशक्तीः दलेषु नवमीं कर्णिकायां च संपूज्य तद् ११६

परि ॐ वज्रनखदंष्ट्रायमहासिंहाय हुं फट् नमः। इतिसप्तदशार्णो मन्त्रः। अस्मिन्पीठे समावाह्यसमर्चयेत्। अंगैः प्रथमावृ
तिः। जंजयायै। विंविजयायै। किंकीर्त्यै। प्रिंप्रीत्यै० प्रंप्रभायै० रुंरु द्रायै० श्रंश्रद्धायै० श्रुंश्रुत्यै। इति द्वितीयावृतिः। मातृभि
स्तृतीया। लोकेशैश्चतुर्थी। अथप्रयोगः। संपूज्यैवं देवीं माकैंकि—— र्घृताप्लुतैः जुहुयात्। अष्टोत्तरंसहस्रं निजरक्षायै
सपत्ननाशाय। प्रयोगांतरम्। कारस्करस्य पत्रैर्निपातितैर्वायुना प्रातं जुहुयात्। पादरजःसं। मिश्रैः शत्रोरुच्चाटनाय मरी
चैर्वा। कारस्करं पढि। मरीचिमेलकु। प्रयोगांतरम्। आदाय तुं डेन रिपुं दारपतीन स्वैर्वरैः ध्यात्वा जपेन्मंत्रंमम शत्रोरुच्चा
टनाय वै। अस्य यन्त्रमाह। आलिख्य चापं सगुणं स चाणं तत्र कार्मुके। कलामयगुणे चापि रंबीजं बाण पार्श्वके। कोष्ठद्वंद्वेम
न्त्रवर्णान्साध्यवर्णविदर्भितान्। अनुलोमविलोमांश्च क्रमेणालिख्य तद्बहिः। मालाकारेण परितः यंबीजेन प्रवेष्टयेत्।
मक्षि दुर्गामनोरेवं चापंयन्त्रमुदीरितम्। उच्चाटनकरं शत्रोर्देशाद्देशांतरं क्षणात्। अस्यार्थः। प्रथमतः। सगुणां शबाणां
चापाकृतिं विलिख्य तत्रगुणे षोडशस्वरान् विलिख्य पुनर्बाणस्य पार्श्वयोः रं अग्निबीजं विलिख्यम्। गुणे आरोपित
बाणचापार्श्ववर्तिनि कोष्ठद्वंद्वे तु दक्षिणकोष्ठे पक्षि दुर्गामन्त्रवर्णद्वंद्वप ठितान् साध्यवर्णान्युच्चाटय पदयुक्तान्वि
लिख्य। उत्तरं कोष्ठे तमन्त्रप्रतिलोमवर्णविदर्भितान् साध्य नामवर्णांश्च विलिख्य तद्बहिः वृत्तं विलिख्य। तायु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



बीजेन वेष्टयेत्। एतच्चायपन्त्रमुक्तफलदं स्यात्। प्रयोगांतरम्। कटुत्रयकृतं चूर्णं जप्त्वा चाष्टोत्तरं शतम्। उच्चाटनाय
विकिरेन्मर्कटीचूर्णमेव वा। कटुत्रयं चुकुमेलकुतिप्पलि। मर्कटीपू नैताली। प्रयोगांतरम्। उच्चाटयंतीं तुंडेन वि
द्विषः प्रसभं दृसौ। स्मृत्वा जपेन्मन्त्रममुं अर्धीकर्तुं क्षणाद्रिपून्। । अथ दुर्गामन्त्रप्रसंगात् तत्रैवोक्तः भ्रम दुर्गामन्त्रो
पिलिख्यते। वामदेव ऋषिः गायत्री छंदः भ्रमदुर्गा देवता॥ ह्रीं दुं दुर्गे हृत्। भ्रम शिरः। भ्रम शिखा। भ्रामय कव
चम्। भ्रामय नेत्रम्। स्वाहा अस्त्रम्। ध्यानम्। शंखं चक्रं कपालं त्रिशिखमुसलौ तर्जनीं चापबाणौ बिभ्राणां बाहुदंडैः
शशिशकलल सत्सिंगकोटीरभाराम्। देवीभीन्नोज्जनाभां विकटमुखलसन् घोरदंष्ट्रां त्रिनेत्रां म्। दुर्गां भोगीद्रभूषाम्
निविबुधनतां घोररूपां नमामि। ह्रीं दुं दुर्गे भ्रम भ्रम भ्रामय भ्रामय स्वाहा। इति मन्त्रः। भ्रांतिकरोयं मन्त्रः। द्वादशस
हस्रजपः। आज्यसिक्ताभिः अर्कसमिद्भिर्वा आज्येन वा दशांशोपुरश्चरणहोमः। पक्षि दुर्गाकवतपूजा। अथ प्रयोगः
जुहुयान्मतसमिद्भिः महिषीघृतलोलितैः निशाथम्नै रिपुनिचयः सोन्मादो भ्रमति महीमंडले। विनष्टमतिः। उन्म
त्तेऽरुमतै समित्॥ अस्य यन्त्रमाह॥ षोडशकोष्ठानि तन्नो विंशतिशूलांकितानि संलिख्य। कोष्ठेषु मन्त्रवर्णानेकैकं सा
ध्यवर्णसंयुक्तान्। शूलांतरेषु वर्णान् खग दुर्गाया स्वसाध्यसंयुक्तान्विलिखेदेतयन्त्रं शत्रुविनाशाय सूरिभिः प्रोक्तं।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अयुतंजपेत्। दशांशंपीतद्रव्यैःर्हुनेत्। पीतद्रव्यंमुं हरिद्राजल्। अथपूजा। मध्येयोनिंसमालिख्यतद्बाह्येतुषट्
कम्। तद्बाह्येष्टदलंपद्मंतद्बाह्येषोडशछदं। चतुरस्रत्रयंबाह्येचतुर्द्वारोपशोभितम्। एवंपूजाचक्रंविलिख्यअस्मि
न्नाकृतदमेपटलेप्रोक्तभुवनेशीपीठंसंपूज्यतस्मिन्बगलामुखींसमावाह्यसमर्चयेत्। अंगैःप्रथमावृतिः। गणेशायवटुका
य। योगिन्यै। क्षेत्रपालाय। इतिपूर्वदक्षिणपश्चिमोत्तरेषु। गुरुपरमगुरुपरमेष्ठिगुरुपरगुरून्आग्नेयादिषुकोणेषुसमर्च
येत्। पुनः ब[illegible]लामुख्यैस्तंभिन्यै। जंभिन्यै। मोहिन्यै। वश्यायैअचलायै। वहलायै। दुर्द्धरायै। कल्मषायै। धीरायै।
कल्पनायै। कालकर्षिण्यै। भ्रामिकायै। मंदगमनायै। भोगायै। योगायै। एताः षोडशस्वरवर्णैकैकपूर्वकाः षोड
शपत्रेषुसमर्चनीयाः। तदनुः अष्टपत्रेषुभुवनेशीबीजपूर्विकाःब्राह्म्याद्याःसमर्चनीयाः। पुनः डांडाकिन्यैनमः।
रांराकिन्यै। लांलाकिन्यै। कांकाकिन्यै। शांशाकिन्यै। हांहाकिन्यै। इतिषट्कोणेषुसमर्चयेत्। एवंविलिखितेपिष
ट्कोणाष्टदलषोडशदलक्रमेणपूजाक्रमः। पुनस्तद्बहिरिंद्रादयः। तद्बहिर्वज्रादिभिश्चसमर्चयेत्। योन्याख्य
त्रिकोणमध्येमूलेदेवींचसमर्चयेत्। अथप्रयोगः। हरितालंहरिद्रांचलवणनैवसंयुतम्। स्तंभनेहोमयेद्देवि एमः
प्रज्ञांचैवगतिंमतिम्। स्तंभयेदितिशेषः। हरितालंतनत्संचमेव। हरिद्रांमंजलचूर्णम्। एतत्त्रयंमिलित्वाहु १२८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अस्यार्थः। प्रथमं दक्षिणोत्तरतः पंचरेखा विलिख्य एवं पश्चिमतोपि पंच रेखा विलिख्य। एवं विलिखिते षोडश कोष्ठा
नि भवंति। तत्र ईशानकोष्ठमारभ्य भ्रमदुर्गामन्त्रस्यैकैकमक्षरं इन्द्रा द्ये ति साध्य वर्णैकैका क्षरपुटितं विलिखेत्।
पुनः रेखाग्रेषु विंशति शूलानि विलिख्य शूलमध्ये पाक्षि दुर्गामन्त्रस्यैकैकाक्षरं साध्यार्णपुटितं विलिखेत्। एवं वि
लिखिते उक्तभल्लं भवति। प्रयोगांतरम्। अरुणांबुजविष्टरं प्रसन्नाषभिसंचिंत्य जपेदभीष्टसिध्यै॥ अथा दुर्गामन्त्र
प्रसंगात्। शत्रुस्तंभनकरो ब— लामुखी दुर्गामन्त्रोपि कल्पांतरोक्तोत्र लिख्यते। नारायण ऋषिः। त्रिष्टुप्छंदः ब— लामुखी
दुर्गा देवता। ॐ ह्लीं हृत्। ब— लामुखी शिरः। सर्वदुष्टानां शिखा। वाचं मुखं पदं स्तंभय कवचम्। जिह्वां कीलय नेत्रम्।
बुद्धिं विनाशय अस्त्रं ध्यानम्। गंभीरां च मदोन्मत्तां तप्त काचनसंनिभाम्। चतुर्भुजां त्रिणीयनां कमलासनसंस्थिताम्। मु
द्गरं दक्षिणे पाशं वामे जिह्वां च वज्रकम्। पीतांबर धरां सांद्र दृत पीनपयोधराम्। हेमकुंडल भूषां च पीतांबरार्धशेख
राम्। पीतभूषण भूषां च स्वर्ण सिंहासनस्थिताम्। एवं ध्यात्वा च देषे— शीं शत्रुस्तंभन कारिणीम्। महाविद्यां महामायां
साधकेंद्र फलप्रदाम्। जपेदितिवाक्यशेषः। ॐ ह्लीं ब— लामुखि सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय बु
द्धिं विनाशय ह्लीं ॐ स्वाहा। इति षट् त्रिंशदक्षरो मन्त्रः। वियत् पृथिव्यक्षरयुक्तं द्वितीयं बीजम्। स्तंभन प्रधानोयं मन्त्रः॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नेदित्यर्थः। प्रयोगांतरम्। हरिद्राहरितालाभ्यांजुहुयाल्लवणंनिशि। स्तंभयेत्सं चदिव्यानिनात्रकार्याविचारणास्तंभ
नेषुचसर्वेषुप्रयोगःप्रत्ययावहः। अथवापीतपुष्पैर्वात्रिमध्वक्तैश्चहोमयेत्। अस्यार्थः। हरिद्राचूर्णैश्चहरिता
लचूर्णैश्चघृतसंयुक्तैर्लवणैर्हुनेत्। पंचदिव्यानि। तुलाग्न्यायोविषंकोशोदिव्या—हविशुद्धयेइतिपंचदिव्यानि
इतिपीतपुष्पाणियानिकानिचित् पीतकुसुमानि। प्रयोगांतरम्। हरिद्राचूर्णैर्माहिषाज्यसिक्तैः पश्चिमामुखोरा
त्रौअष्टोत्तरसहस्रंहुत्वाआज्याहुतीश्चमाहिषाज्यैरेवहुत्वातत्संपातंचबिलोद्यनालिकेरमुखंछित्वातस्मिन्हर
िद्रालेलाग्नितिभार्गेवाप्रतिमेनापाः समागतिमार्गेवानिखन्यस्थापयेत्शत्रुस्तंभनंभवति। इतिकल्पांतरोक्तम
त्रार्थतोलितम्॥ ॥अथदुर्गामन्त्रप्रसंगान्मत्स्योक्तुमन्त्रश्चकल्पांतरोक्तोत्रयोग्यतावशाल्लिख्यते॥ निर्घृणऋषिःजग
ती छंदः महिषमर्दिनी दुर्गा देवता। दुंबीजंनमःशक्तिः महिषमर्दिनीप्रसादेविनियोगः। मन्त्रस्यचतुर्दशभिरक्षरैः
षडंगानि। वक्ष्यमाणद्वादशाक्षरीवद्वाषडंगानि। ध्यानम्। त्रिशिखदलितरक्षोधीशवक्षोविनिर्यैद्दहलरुधिरधा
रादिव्यमध्वीरसौघम्। वदनमुपनयंतीसिंहपृष्ठाधिरूढाहरतुभगवतीमेदुःखचिंतांदुरंताम्। १। मत्स्योस्तुत्वंत्रिलो
कींग्रसितुमतिरसान्निःसृताःकिंनुजिह्वाकिंवारूसां—पद्मद्युतिभिररुणिताविस्फुपाःपद्व्यः। प्राप्ताःसंध्याःस्मरा

प्र.सं. रेः स्वयमुतनुतिभिस्तिस्लइत्यूह्यमानाद्वेदैंव्याप्तिशूलसन्तमहिपञ्जुषोरक्तधाराजयंति। इतिमन्त्रः। रसाकरोपद

१७६ चशांतिप्रधानोयंमन्त्रः। अस्यैवयन्त्रमुच्यते। संपुटितशिखिपुरांतःकोणेषु चषट्सु शक्तिमालिख्यसितितिकोणक

णेले। तद्बंधेष्टंगषट्कमपिशक्तेः। दिगातपत्रचतुष्केप्रत्येकंम। द्वद्वशोलिखेन्मा तम्। शिखिपुरकोणचतुष्केषु

णशोमादीं अर्दिसुचैकैकम्। निकृतिपुपादीन्गणशः। संवेष्टितमातृकार्णमपिबाह्ये। क्ष्मादिबिंबद्वंद्वानेष्यादीना

लिख्यचाष्टमशिष्टम्। इत्थंयंत्रंकथितंषोडशशूलांकितंचमद्भिः। अस्यार्थः। प्रथमंषट्कोणंविलिख्यतन्मध्येभुव

नेशींचविलिख्यतन्मध्येसाध्यनामादीन्विलिख्यान्। पुनःषट्कोणेषुभुवनेशींविलिख्यपुनःकोणपार्श्वयोः

सितुइत्येतन्नवदशमास्वरद्वयंविलिख्यत्। तद्बहिरष्टदलपद्मंविलिख्य। प्रागादिदलेषुमन्त्रस्यादितआ

रभ्यअष्टौवर्णान्द्वंद्वशोविलिखेत्। पुनराग्नेयादिकोणचतुष्केत्रिशस्त्रिभोमादिवर्णान्किमंतान्विलिख्यतद्ब

हिश्चतुर्दिक्षुवादिष्वंतांश्चतुरोवर्णान्विलिख्य। तद्बहिःषोडशदलंपद्मंविलिख्य। तेषुपादिवर्णान्हीसंतान्त्रिभ

स्त्रिभोविलिखेत्। बाह्येमातृकावर्णैःसंवेष्ट्यातद्बहिर्भूपुरद्वयंपुटितंविलिख्य। तद्द्वतकोणाष्टके — दीन्जान्तानम राम:

न्त्रवर्णान्विलिख्य। अवशिष्टद्वयंचाष्टमेकोणेविलिखेत्। रेखाग्रेषुषोडशशूलानिविलिखेत्। इतिप्रागुक्तवन १७६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दुर्गाकवचपूजा ॥ अथास्मिन्नेव मन्त्रस्तोत्रस्य मन्त्रमन्यमन्त्रेण संयोज्य प्रयोग उच्यते। मन्त्रस्तोत्रस्य त्रिलोकीं ग्रसितुमतिर
सान्निःसृताः किंनु जिह्वाः किं वा कृष्णांघ्रिपद्मद्युतिभिररुणिता विष्णुपद्याः पदव्यः। पदंतिय च दूरके भयं विंदतिमा
मिह। पवमान वितज्जहि। यदुत्थितं भगवति तत्सर्वं शमय स्वाहा। दुर्गां देवीं शरणमहं प्रपद्ये। प्रतिकूलं मे नश्यत्व
नुकूलं मे प्रयच्छ प्रपच्छ प्राप्ताः संध्याः स्मरारेरवपमनुनतिभिस्तिस्र इत्यूह्यमाना देव्यै देव्यालिमूले शतमदिषज्जुषो
रक्तधारा जयन्ति। इति मन्त्रः। उपद्रवशांतिप्रधानोऽयं मन्त्रः। दीपमात्रे चतुर्दिक्षु मध्ये च पंच वर्तिं निधाय। तत्सर्वं प्रज्व
ल्य। तद्दीपस्वस्तिकपद्मे निधाय तस्मिन् दीपे देवीं समावाह्य प्रागुक्तवद् दुर्गाविधानवत्संपूज्य। तत्र नमस्कारं अ
नेन मन्त्रेण कुर्यात्। तस्मात्सर्वोपद्रवशांतिर्भवेत्। अयं तु प्रयोगः। अतीव समीचीनम्। आपत्शांत्यर्थम्। अत्र स्व
स्तिकपद्मप्रकार उच्यते। प्रथमं तंडुलरजसा चतुरस्रं विलिख्य। तन्मध्ये पूर्वपश्चिमतः। एकां रेखां विलिख्य। तदुप
रि दक्षिणोत्तरतश्च एकां रेखां विलिख्य। तत्र पूर्वपश्चिमतो या रेखा तस्याः पूर्वाग्रं किंचिद्दक्षिणतो गमयित्वा चतुरस्ररे
खया संयोजयेत्। अस्या एव पश्चिमाग्रं तु किंचिदुत्तरतो गमयित्वा पश्चिमचतुरस्ररेखया संबंधीनयात्। दक्षिणोत्तर
तो या रेखा तस्यास्तु दक्षिणाग्रं किंचित्। पश्चिमतो गमयित्वा दक्षिणचतुरस्ररेखया संबंधीनयात्। अस्या उत्तराग्रं तु कि

For Private And Personal

प्र॰सं॰ विन्पूर्वतोगमयित्वाउत्तरचतुरश्रेरेखयासंबंधीनयात्। एवंविलिख्य ईशाननिर्ऋतिखंडयोस्तंडुलचूर्णानि प्रविकीर्य अ-
१८० ग्निवायुखंडयोस्कुसुंभचूर्णानिप्रविकिरेत्। एवंस्वस्तिकपद्मलेखनप्रकारः॥ अथकल्पांतरोक्तप्रकारेणापिमत्स्योक-
त्यमंत्रविधानलिख्यते। निघ्रणऋषिः। जगतीछंदः। महिषमर्दिनीदुर्गादेवता दुंबीजं हुंशक्तिः दुंहृत् गांशिरः देवी
शिखाशरणंकवचं। अर्हंनेत्रंप्रपद्ये अस्त्रं ध्यानं प्रालेयाचलपार्श्वस्थचंद्रकांतःशिलातलेजांकनदमयस्तंभेरत्नतो-
रणमंडितेमुक्तावितानसंदीप्तेताराभित्तिसुशोभिते। सर्वर्तुकुसुमोपेतेसर्वतःसमलंकृतवैडूर्यवज्रमणिभिःखचिते
ऋतुसेवितेमंदारपारिजातादिदिव्यवृक्षविराजितेपंचाशत्कोटिविस्तारसभायांतुसुशोभिते। मंडपेकल्पवृक्षस्यमूले
स्थितासनेशुभेसिंहमुखपादपीठेकुवलयमध्यस्थलसुदलेपद्मे आसीनांश्यामतनुंमुक्ताटंकराजितांहृद्यां करलालि-
तशंखचक्रांशरकार्मुककमलसंज्ञकपालांखड्गंखेटं धारयंतींत्रिनेत्रांचारुहासिनीं कांचीनूपुरकेयूरकटकैर्मकुटै-
स्तथा। भूषितांरक्तवस्त्राढ्यांमुक्तादामविभूषितां। ध्यायेद्देवींसुनियतोमंत्रस्यास्यप्रसिद्धये। मत्स्योक्तस्यमंत्रः। ल-
क्षंजपेत्पुरश्चरणार्थं दशांशंतर्पयेत्। घृतसिक्तैस्तिलैर्वात्रिमधुरसिक्तैः सर्षपैर्वापायसैर्वाजपाश्चत्तनांशपुरश्चर- रामः
णाहोमः। अथपूजार्थंयन्त्रंवक्ष्येपूजायंत्रंप्रवक्ष्यामिसर्वकामफलप्रदं वश्यदंचैवसर्वशत्रुनिकृंतनंआलिख्याष्टदलं १८०

पद्मंवाह्येभूपुरमेव च। तद्बहिर्द्वादशदलं ततः षट्कोणकं लिखेत्। पुटितं भूपुरं पश्चात्। लिखेच्छूलं तदग्र
तः। कर्णिकायां मूलदुर्गां तारं च हरिबीजकम्। एकैकशः शांतिदुर्गां लिखेदष्टदलेषु च। भिष्टाक्षरं चतुष्कं तु चतु
ष्कोणेषु संलिखेत्। लिखेद्भूपुरमध्ये तु मत्स्योस्कल्पंमहामंत्रं महिषमर्दिनीमंत्रपर्यंतं युगलं युगलं क्रमात्। रविकेसरपद्मे
तु गुणशो दलमध्ये केसप्तत्रिंशाक्षरं कृत्वा भिष्टमंत्रे लिखेत्पुनः दलाग्रेष्वपि चक्रं कुर्याच्छूलिनि मन्त्रकम्। भिष्टाक्ष
रद्वयं तन्य दव्यग्रे विलिखेत्पुनः। षट्कोणेष्वपि चाग्रेषत्रिष्टुभं सप्तशो लिखेत्। भिष्टाक्षरद्वयं तं स्वबहिः पुटित
भूपुरे। नरसिंहानुष्टुभं वेदसंख्यया चाष्टकोणके बहिर्मातृकया चैव वेष्टितं यंत्रनायकेसिंहपीठं तु मंत्रेण
कृत्वा शक्तिं प्रपूजयेत्। अस्यार्थः प्रथममष्टदलं पद्मं विलिख्य। तत्कर्णिकायां मूलदुर्गा ॐ ह्रीं दुर्गायै नमः। इ
ति पुनः प्रणवं चक्षकाररेफऔकारबिंदुनां संयोगोत्थ हरिबीजं च। एतत्सर्वं कर्णिकायां विलिख्य। पुनरष्टदलेषु दुर्गां
देवीं शरणमहं प्रपद्ये इत्यस्य शांतिदुर्गामन्त्रस्य। अष्टौ वर्णान्विलिख्य तद्बहिश्चतुरस्रं विलिख्य। तस्य कोणेषु शांति
दुर्गामन्त्रस्य अवशिष्टांश्चतुरो वर्णान् विलिख्य। चतुरस्रस्य दिक्षु मत्स्योस्कल्पमन्त्रस्य वर्णानेकविंशतिवर्णशो विभज्य
विलिखेत्। तत्पर्यंतएवमहिं नीमंत्रं महिषमर्दिनी स्वाहा। इत्यस्य वर्णद्वंद्वं विलिख्य। तद्बहिर्द्वादशदलं पद्मं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· विलिख्य। तेषु दलमध्येषु उत्तिष्ठपुरुषीइत्यादि वनदुर्गामन्त्रवर्णांस्त्रिमस्त्रिशोविलिख्य। अंस्यमेकाक्षरमन्त्र दलेवि
१८१ लिख्य दलाग्रेषु मूलिनीमन्त्रवर्णानेकैकंविलिख्य। अवशिष्टत्रयमंत्येविलिख्य। तद्बहिः षट्कोणंविलिख्य। तेषु
जातवेदोमन्त्रस्यवर्णानुसप्तशः सप्तशोविलिख्य। अवशिष्टद्वयमघ्यंत्येविलिखेत्। तद्बहिरष्टकोणेविलिख्य। तेषुउ
ग्रं वीरमित्यादिन्टसिंहानुष्टुभोवर्णांश्चतुरेश्चतुरोविलिख्य। तद्बहिर्मातृकया वेष्टयेत्। इति अस्मिन् मंडलेनवश
क्तिभिः पीठंयजेत्। प्रभायैमायायै जयायै सूक्ष्मायै विशुद्धायै नंदिन्यै सुप्रभायै विजयायै सर्वसिद्धिदायै इमाः पी
ठनवशक्तयः एताभिर्दीर्घस्वरपूर्वकाभिः। आंप्रभायै इत्यादिक्रमेणसमर्चयेत्। वज्रनखदंष्ट्रायुधायमहासिं
हायहुंफट्नमः। इतिचकर्णिकायां रत्नं पीठंसंपूज्यतस्मिन्नावाह्यसमर्चयेत्। अंगैः प्रथमावृत्तिःआर्यायै
दुर्गायैभद्रायै भद्रकाल्यै। अंबिकायै क्षेम्यायैवेदगर्भायै। क्षेमकार्यै। इतिद्वितीयावृत्तिः। चक्रायशंखायखड्गा
यखेटायपाशाय कार्मुकायशूलायरक्तकपालाय। इतितृतीयावृत्तिः। ब्राह्म्यादिभिश्चतुर्थी इंद्रादिभिः पंचमी
शंभायनिशुंभायमहिषाय सिंहायनमः। इतिपूर्वपश्चिदक्षिणोत्तरासुदिक्षुगणपतयेवटुकायवीरभद्रायक्षेत्र णम:
पालाय। इतिनिर्ऋतिवाय्वग्निईशानेषुसमर्चयेत्। इतिषष्ठ्यावृत्तिः। अथप्रयोगः ऐंद्रत्रिष्टुभयोगान्मन्त्रमध्ये १८१

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

महद्धनं। प्राप्नुयान्मंडलजपान्नमस्कारान्नसाधकः नपङ्क्तिस्थसंप्रोक्ता अभीतिश्चतुरुत्तरा संस्पृष्टकृत्योगात्तं स
ष्टद्रव्यसाधनं ऐं इगायत्रियोगात्तुलोकवश्यकरं भवेत्। अस्माकमिति कृत्योगात्क्लस्ये। कर्षस्य —— यन्तुतः। गैवानुष्टु
म्मं त्रयोगान्महान्मृत्युंनरस्यसौ अभयंकरकृत्योगात्। अभीतिः सर्वतो भवेत् योमाग्ने दृत्यस्ययोगात्स्वीयंपरवशोस्थि
तंप्राप्नोति साधकः सत्यं नात्र कार्या विचारणा राजांप्रच्युतराष्ट्राणां राज्यावाप्तिः स्थिरा पुनः निर्मायादन्ति कृत्योगाद्ध
विष्यति न संशयः। पद्मं वा स्वस्तिकं —— कृत्वा संस्थाप्य दीपकं तत्राबाह्य महादेवीं पूजयित्वा तु पायसैः रक्तपुष्पैः स
मभ्यर्च्य पूर्वोक्तक्रमशः पुनः चतुरुत्तराशीति संख्यान्नमस्कारेण मंडलात्। तदर्थोच्चनदर्थो दानन्कार्यानुसारतः
सायंप्रत्यं मुखो भूत्वा नमस्कारेपासाधकः यान्यानिच्छति तांस्तांस्तु प्राप्नोत्येव न संशयः दिनशो दिनराः सप्तनमस्कारे
नरोत्तरास्तप्राधिक नमस्कारः सर्वार्थस्य प्रसाधकः। यो नमस्कुरुते तस्य नमस्कं नरारि दृत्तानाकीर्निर्नारिचोरादिन
रादि बाधते कचित्। नापुत्र नातस्य भवेन्न रोगो न मसूरिका न मारिजं भयं न स्य नादि व्याघ्रादिजं भयं मधुसिक्तजपापु
ष्पहवनाल्लोकवश्यदः। पद्मं मधुरपूर्णं तु हुनेल्लक्ष्मी समृद्धये। कारस्करसमिद्धोमाच्छत्रोरुच्चाटनं भवेत्। कारस्करंमू
जुहुयाद्रोहिणासमिधां त्रिशतं मन्त्री पुनः सप्तंगानां सर्वपदां विमुक्त्यै सर्वपदा ध्येयं हादि पांसै चरी दिणं वटं पूर्वोक्तं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ग्र·सं· यंत्रमालिख्य ग्रस्तस्योपरिन्यसेत्। जपेनसुरनस्थितां ध्यात्वा देवीं परात्परां समाविश्य ग्रहाः सर्वे पलायंते वतत्क्षणा
१८२ त्। नित्यं पूजयतो यन्त्रं लोकास्तुः पादसेवनः यन्त्रे संस्थाप्य कलशं कषायोदैः प्रपूरयेत् जप्त्वा संस्थापये ध्यायन् ऋतु
स्नातां तद्वे वह्नि गर्भिणी तु भवत्येव स्नानाद्यंत्रस्य धारणात्। सर्वक्षुद्रा विमुंचंति मणिमन्त्रौषधा अपि अपस्मारापिशा
न्याश्च प्रेतरुद्रादयोपि च धारणाद्यंत्रराजस्य पलायंते वतत्क्षणात्। अथास्य यंत्रमाह। प्राक्प्रत्यग्घरेखस्तु दक्षिणो
दक् त्रयोदश पंक्तिषु मन्त्रवर्णाश्च कोष्ठेष्वालिख्य। तद्बहिः एकैकशश्चरेखाग्रे त्रिष्टुभश्चाक्षराल्लिखेत्। अवशिष्टाक्ष
रद्वंद्वमंत्यमूलाय नोलिखेत्। बाह्ये मातृकया वेष्ट्य तन्मध्ये साध्यनामकं भूर्जपत्रे समालिख्य यत्रमेतत्तु निक्षिपेत्। के
दारेथ गृहे वापि प्राणस्थापनपूर्वकं वन्या गजा वराहाश्च आखुव्याघ्रादयोपि च शालभाः पक्षिणो ये — तस्करादिहिं
सकाश्च व्यास्य पादने त्रास्तुर्न विंशति कदाचन मद्रलेपटहे वापि ध्वजवाबंधयेपुनः दर्शनात् ध्वजस्यैव श्रवणात्त
र्न विंशति कदाचनमेन भवेन्नूनं नात्र कार्या विचारणा। अस्यार्थः। प्रथमं पूर्वपश्चिमतः अष्टौ रेखान् विलिख्य तदुपरि द
क्षिणोत्तरतस्त्रयोदश रेखान्विलिख्य। तन्मध्ये साध्यनामादीन्विलिख्य कोष्ठेषु चतुरशीतिषु मरुयो त्कल्पमन्त्र वर्णानेके राम:
कशः ईशानादिक्रमेण विलिख्य। तद्बहिरेखाग्रमूलेषु जातवेदो मन्त्रस्यैकैकमक्षरं विलिख्य। अवशिष्टद्वयमंत्यमूला १८२

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

घेविलिख्य। तद्बहिर्मातृकयाकेष्टयेदिति ॥ अथदुर्गाद्वादशाक्षरीमन्त्रः। कल्पांतरोक्तम्मात्र प्रसंगाल्लिख्यते। शेषपर्यंक
शायिनिनारायणीऋषिः। जगतीछंदः शेषपर्यंकशायिनी नारायणीदेवता शांतिदुर्गावादेवता सर्वज्ञायै ह्रांदुर्गायैहृत
नित्यतृप्तायै ह्रींदुर्गायैशिरः अनादिबोधायै ह्रूंदुर्गायै शिखास्वतंत्रायै ह्रैंदुर्गायैकवचं अलुप्तशक्त्यै ह्रौंदुर्गायैनेत्रं अ
नंतशक्त्यैह्रः दुर्गायैअस्त्रं ध्यानं क्षीरांभोनिधिमध्यस्थे स्वर्णद्वीपेमनोरमे सर्वर्तुकुसुमोपेते नानावृक्षसमन्विते रत्न
सिंहासनस्थानां स्वर्णवर्णांमनोहरां देवींध्यायेदतिस्वच्छवेषांभूषासमन्वितां शंखंचक्रमसिंचचर्मसशरंचापंगदांमूल
कंबिभ्राणांवरदाभयामृतघटांस्तौ धपात्रंतथा। भूषाभिर्मकुटादिभिस्त्रिनयनांपीतांबरामंबिकांध्यायेच्चंद्रकलान्वितांसु
रगणैरीड्याजगन्मंगलां। दुर्गादेवींशरणमहंप्रपद्ये। इतिमन्त्रः अनेनापिमन्त्रेण पूर्ववज्जपनमस्कारादीन्कुर्यात्। सक
लोपद्रवशांतिर्भवति ॥ अथवैरोचनीकल्पेउक्तप्रकारेणापिध्यानादिकमस्यमंत्रोच्यते। अंगादिकंतुपूर्ववदेवमन्त्रप
दैः षड्भिश्चवांगानि मध्येदुग्धांबुधेस्वतोनामास्ति द्वीपनायकं लक्षयोजनविस्तारं तस्मिन्प्राकारसप्तकं सर्वरत्नमयंतस्य
मध्येमंडपमुज्वलां सहस्ररत्नस्तंभौघप्रस्फुरन्मणिभास्वरं तस्मिन्स्वर्णमयंपीठं पादैरष्टभिरुद्धृतं तस्योपर्यब्जमरुणः
पत्रैर्दशशतैर्युतं तस्मिन्नंतरेश्यामा शायानांजगदीश्वरीं किरीटमुकुटोद्भासिनीलकुंचितमूर्धजां उपंक्तिहार

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र॰सं॰ किरणविंबरम्यतराननां कस्तूरीतिलकीभूतां स्वाहादीधितिमंडलांच द्वभास्करविंबाभ्यां नयनाभ्यां विराजतीं मौक्तिकस्त
१८३ गिवोद्भासिदंतपंक्तिविराजितां। हारग्रैवेयसंछन्नपीनोन्नतकुचद्वयांकंकनांगदरत्नाद्यैर्वामे पाणिसरोरुहे विभ्राज
मानंकमलंकंपयंतीं शनैः शनैः तस्मिन्नाहितनेत्रांतांजपारुणकलेवरां दक्षिणांबाहुलसितामुपधानाहितामर्जुला
लयस्याकमलयासौम्याच चरणांबुजंमत्स्यकूर्मवराहादिमूर्तिभिर्दशभीरपिपरितः सेव्यमानांतांशोणवस्त्रानुलेपनां
ध्यात्वैवमरिसंघातमहादावानलांजपेत्। ॐ ह्रीं दुं दुर्गा देवीं शरणमहं प्रपद्ये। इतिमन्त्रः बजैः सहपंचदशाक्षरः।
विपन्मुक्तिप्रधानोयंमन्त्रः। अथ पूजापश्चिमसंध्यासमयेपश्चिमवदनोविलिख्ययन्त्रमिदम्॥ संपूज्यास्मिन्देवींदीप
मुखेसन्नमेद्विपन्मुक्तै षट्कोणांतस्थतारांतः साध्यनामसमालिखेत्। द्वादशाक्षरमन्त्रार्णान्द्विशः कोणेषुचालिखे
त्। तत्संधिष्वंगमन्त्राणिपरितो विलिखेद्बुधः। दशस्वदेषुपुद्यस्यचतुर्वर्णाम्मनोरयः। भिशनंसदलेहल्भिः परितश्च
प्रवेष्टयेत्। स्वराश्चयत्रसामान्याल्विलिखेत्कर्णिकांतरे। भूपुराश्रीचतुसारशक्तिं दुमालिखेत्। यंत्रमेतद्विष्णुशक्तेः
सर्वाभीष्टफलप्रदंम्। अस्यार्थः। प्रथमंषट्कोणंविलिख्य। तन्मध्येप्रणवं तन्मध्येसाध्यनाम। तत्परितः स्वरान्विलि राम:
ख्य। पुनः षट्कोणेषुदुर्गा देवींमित्यादिद्वादशाक्षरीमन्त्रस्य वर्णान् द्वौद्वौविलिखेत् कोणसंधिष्वंगमन्त्राणि विलिख्य १८३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तद्बहिर्दशदलंपद्मंविलिख्य तेषुतम: गिनवर्णामिसस्यचतुरस्रतरो वर्णान् विलिख्य। अवशिष्टमंत्रे दलेविलिख्य ब
हिः कादिवर्णैःसंवेष्ट्य। तद्बहिश्चतुरस्रं विलिख्य। तस्यकोणेषुप्रणवभुवने शींदुर्गाबीजानित्रीण्यपि विलिखेत्। अस्मि
न्मंत्रे एकोनविंशसटले वक्ष्यमाणजातवेदोमन्त्रस्य वक्ष्यमाणं पीठं संपूज्य अत्रावाह्य समर्चयेत्। अंगैःप्रथमावृतिः
चक्राय शंखाय नंदकाय खेटाय शराय चापाय गदायै भूलाय वराय अभयाय अम्रतघटाय रत्नकुंभाय इति द्वितीयावृ
तिः। जंजयायै विंविजयायै किंकीर्त्यै प्रिंप्रीत्यै प्रंप्रभायै श्रंश्रद्धायै मेंमेधायै श्रुंश्रुत्यै इति तृतीयावृत्तिः ब्रह्मणे विसवेरु
द्राय इंद्राय इतिदिक्षु वाण्यै लक्ष्म्यै उमायै शचीदेव्यै इति विदिक्षु स्वाहायैस्वधायै इति दक्षिणोत्तरयोः। इति चतुर्थ्यावृ
त्तिः मातृभिः पंचमी इंद्रादिभिः षष्ठी वज्रादिभिः सप्तमी एवं पूजाविधिः जपापारंतीतुलसीरक्ताब्जानीतिमन्त्रवित्। आ
दायसुरभीण्येवपुष्पाण्येतानिकामदा ॥ अथसकलोपद्रवशांतिप्रद दुर्गामन्त्रप्रसंगात् दृष्टिदोषजिव्हादोषशांतिकरो
दुर्गामन्त्रः। कल्पांतरोक्तोप्यत्रयोग्यतावशाल्लिख्यते। ह्रीं दुं दुर्गे भगवति मनोग्रहं मथमथ जिव्हापिशाचीरुत्सादयोत्सा
दय हिवहदृष्टिहितदृष्टिपरदृष्टिसर्पदृष्टिसर्वदृष्टिविषंनाशय हुंफट्स्वाहा। इतिमन्त्रः अथ जिव्हादोषशांतिप्रदम
न्त्रप्रसंगात् हस्ताभ्यामित्यक् जिव्हाशांतिकरी लिख्यते वशिष्ठऋषिः न्टचिगनुष्टप् छंदः। विष्णोदेवादेवता हस्ताभ्यांद

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· शाशाखाभ्यांजिह्वावाचः पुरोगवी अनामयित्नुभ्यां त्रालाभ्यां लोपस्य शामसि इतिमन्त्रः अनेन जिंव्हादोषशांतिर्भ
१८४ वति अथदुर्गामन्त्रप्रसंगात् गाणिदुर्गायन्त्रमुच्चाटनकरं कल्पांतरोक्तमन्त्रयोग्यतावशाल्लिख्यते वायुमंडलमालिख्य
रूद्रबिंदुयुतं ततः। तन्मध्ये वायुमालिख्य साध्यकर्मसमावृतं सबिंदून् क्रमशो वर्णान् मन्त्रस्यानलसंयुतान्। त
द्वाह्ये वायुवीजेन परितो वेष्टयेद्बुधः। तथैव वन्हिवीजेन वेष्टयेद्द्वसंख्यया दिशासु तद्बहिर्विवं शूलयुक्तं तु पा
र्थिवम्। शूलाग्रे वायुमालिख्य तन्मध्ये वायुमालिखेत्। सीसपट्टे समालिख्य निखनेत्साध्यमंदिरे। उच्चाटनं भवेत्सद्यः
त्रिदिनात् प्राक् न संशयः वायुमंडलषट्कोणं दुंधुंसिववेनाश्वाविणिगोंदुः। इतिगाणिदुर्गामन्त्रः। अयमर्थः। प्रथ
मंषट्कोणं विलिख्य। तद्बहिरेकादशबिंदुभिः परितो वेष्टयेत्। पुनः षट्कोणकर्णिकामध्ये यं इति विलिखेत्। त
न्मध्ये साध्यनामादियन्त्रन्यायात् विलिखेत्। पुनरेकादशबिंदुगाणिदुर्गामन्त्रस्य वर्णान् बिंदुयुक्तान् रंरं इत्यनलयु
क्तांश्च विलिखेत्। पुनस्तद्बहिर्वृत्तद्वयं विलिख्य प्रथमे वृत्ते ऐकादशसंख्याकैर्वायुबीजैर्वेष्टयेत्। यं इति वायुबी
जं। द्वितीयेवृत्त एकादशसंख्याकैरग्निबीजैर्वेष्टयेत्। रं इत्यग्निबीजं पुनस्तद्बहिश्चतुरस्रं विलिख्य। तस्याग्रेषु शू रामः
लानि विलिख्य। तस्याग्रे यं यं इति विलिख्य तन्मध्येपि यं यं इति विलिखेत्। एवं विलिख्य निखनेत्। उच्चाटनं भ १८४

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वति॥ अथान्यमपि वक्ष्यामि प्रकारं भुवि दुर्लभं वायुमण्डलमालिख्य पूर्ववद्रुचिरं सुधीः तन्मध्ये वायुमालिख्य सा
ध्यकार्यसमन्वितं वायव्यास्त्रेण संवेष्ट्य मन्त्रार्णान्वायुसंयुतान्। बिंदुयुक्रमशो लिख्य तद्बाह्ये स्त्रेण वेष्टयेत् तद्बाह्ये
वायुना वेष्ट्य वीजमस्त्रेश्च तद्बहिः ततः पार्थिवमालिख्य तद्रेखास्वस्त्रमालिखेत्। कनके सीसपट्टे वा ताम्रपत्रे थवा
लिखेत् उच्चाटनं भवेत्सद्यो नात्र कार्या विचारणा अथमर्थः प्रथमं षट्कोणं विलिख्य तन्मध्ये यं इति विलिखेत्। तन्म
ध्ये साध्य नामादीन् विलिखेत्। पुनस्तद्बहिर्वायव्यास्त्रेण वेष्टयेत्। पुनस्तद्बहिरेकादश बिंदुनापरितो विलिख्य
तन्मध्ये यंयं इति सर्वत्र विलिख्यते षांमध्ये दंधुंसिववेनाम्वा विणिर्गोदुः इत्येतान्यक्षराणि क्रमेण विलिखेत्। पुनस्त
द्बाह्ये वायव्यास्त्रेण वेष्टयेत्। तद्बाह्ये यंयं इत्यनेन वेष्टयेत्। तद्बाह्ये रंरं इत्यनेन वेष्टयेत्। वद्बहिश्चतुरस्रं विलिख्य
तस्य रेखायां वायव्यास्त्रं विलिखेत्। एवं सीसादिपट्टे विलिख्य साध्यमंदिरे निखन्यात् शत्रूच्चाटनं भवति। अथ वाय
व्यास्त्र मन्त्रो लिख्यते। यंययये यंये यंये यंययंयंयंयेयेयः इति वायव्यास्त्रमन्त्रः। सप्तदशार्णः॥ अथ वायव्यास्त्र
मन्त्रप्रसंगात्। वायुवीजमप्यत्रयोग्यतावशाल्लिख्यते। किष्किंध ऋषिः अनुष्टुप् छंदः महाभूतवायुर्देवता यं इ
ति मन्त्रः। अथ वायुवीज प्रसंगात् अग्निवीजमप्यत्र लिख्यते। अग्निवीजस्य। काश्यप ऋषिः। गायत्री छंदः। वैश्वा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र॰सं॰ नरोग्निर्देवतारं इति मन्त्रः ॥ अथ अग्निबीजप्रसंगात् अमृतबीजमप्यत्र लिख्यते अमृतबीजस्य। हिरण्यगर्भ ऋ
१९५ षिः। अनुष्टुप् छंदः। वरुणो देवता वं इति मन्त्रः॥ अथ गाणि दुर्गाणि मन्त्रप्रसंगात् भद्रकालीमन्त्रोपि कल्पांतरोक्तोत्र
योग्यतावशाल्लिख्यते। भद्रकालीमन्त्रोस्य। ईश्वर ऋषिः। त्रिष्टुप् छंदः। श्रीभद्रकाली देवता। लांबीजं लींशक्तिः। लूंकी
लकं ममशत्रुसंहारार्थे विनियोगः। लामित्यादिना षडंगं पाभस्मो धूलितांगी भुजगपरिवृताव्याघ्रचर्मोत्तरीया निर्मांसी
मांसभक्षी विगतनरभिरो बद्धमाला कराली। चामुंडा रक्तकंठी शवशयनिरता बद्धमुंडप्रचंडा निः शंकाकोटराक्षीभ
यदुरितहरी भद्रकाली प्रसन्ना। लींलींलूं काली कपाली स्वाहा इति मन्त्रः। अथ भद्रकालीमन्त्रान्तरं कल्पांतरोक्तं
लिख्यते ईश्वर ऋषिः। त्रिष्टुप् छंदः भद्रकाली देवता भां बीजं भीं शक्तिः भूं कीलकं मम भद्रकालीप्रसादसिध्यर्थे
विनियोगः भामित्यादिना करन्यासः। तेनैव षडंगं च ध्यानं मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे हेलानि
र्मितधूम्रलोचनवधे चंडमुंडार्दिनी निःशेषीकृतरक्तबीजदनुजे नित्ये निशुंभापहे शुंभध्वंसिनि संहराशु दुरितं
दुर्गे नमस्तेंबिके भं भद्रकाल्यै नमः। इति मन्त्रः। रत्नाकरादौ प्रसिद्धाविमौ मन्त्रः॥ अथ भद्रकालीमन्त्रप्रसंगात्। ज्वा रामः
लाभैरवीमन्त्रोपि कल्पांतरे प्रोक्तोत्र योग्यतावशाल्लिख्यते। शक्तिः संमोहन ऋषिः। गायत्री छंदः ज्वालामित्र भैरवी दे १९५

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वता। रां बीजं रीं शक्तिः रूं कीलकं मम सर्वाभीष्टसिध्यर्थे विनियोगः। रां हृत्। रीं शिरः। इत्याद्यंगानि। ध्यानं अंगारनद्यो द्य
कूलसंस्थां शुक्लांच सर्वाभरणां चरुस्तां अंगारपूर्णेनकरद्वयेन साध्यस्य कुक्षौ क्षिपतीं स्मरेत्तां। रीं रीं रूं ज्वालाभिन्नभैर
वी अमुकाऽमुकयोः परस्परं विद्वेषणं कुरु स्वाहा। इति मन्त्रः अनेन मन्त्रेण रक्तमयजलेन संध्यायां तर्पयेत् विद्वेषणं
भवति। विद्वेषणप्रधानोयं मंत्रः ॥ अथ विद्वेषणमन्त्रप्रसंगात् वश्याकर्षणकरहगाल्लमन्त्रोपि पियोग्यतावशाल्लिख्य
ते। मदगजारूढ महाशास्त्र ललाट तिलक चषक हस्त नीलकंचुकलोकवश्याकर्षण ज्वालय वायता पय वेगय शीघ्रम
कर्षयाकर्षय स्वाहा इति मन्त्रः। अस्य यन्त्रमाह मांतं नामयुतं द्विरेफसहितं बाह्ये कलावेष्टितं तद्बाह्येग्निमरुत्पुरं च
विलिखेत्तांबूलपत्रोदरे लेखिन्या परपुष्टकंटककृतया ककेनार्कदुग्धं लिखेत्तत्र दीपशिखाग्निरात्रिदिवसादंभांसमाकर्ष
ति। अस्यार्थः। प्रथमं रेफद्वयमन्तरं स विलिखेत्। तदंतः यं इति विलिखेत्। तन्मध्ये साध्यनामादियंत्रन्यायानि लिखेत्।
पुनस्तद्बाह्ये स्वरैर्वेष्टयेत्। तद्बाह्ये त्रिकोणं च तद्बाह्ये षट्कोणं च विलिखेत्। एवं तांबूलपत्रोदरे पुष्टकंटकेन विलिख्य
खेतार्कक्षीरेण विलिदीपेतापयेन्। एवं त्रिदिवसे रुतेस्त्रियमाकर्षयति पुष्टकंटकं कृष्णस्तुभु॥ अथ पूर्वं लपो
रोक्त भिन्नभैरवीमन्त्रप्रसंगात् सुखप्रसवकरयक्षिणीमन्त्रोपि लिख्यते। ब्रह्मा ऋषिः अनुष्टुप् छंदः। यक्षिणी देवता। हिम

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वत्युत्तरे पार्श्वेसुरधावामपत्सिणीं तस्मान् पुरुशद्देन विशल्याभवतु गर्भिणी स्वाहा। अनेन मन्त्रेण तैलं दुर्वाग्रेण स्पृष्ट्वा
जप्त्वा गर्भिणीं प्राशयेत्। प्रसववेदनासमये॥ अथ शीघ्रप्रसवार्थं मन्त्रांतरं पुनः कल्पांतरोक्तं योग्यत्वाच्छास्त्रे लिख्यते।
ॐ स्रींस्रीं स्यइतिमन्त्रः। तैलेमायावीजं विलिख्य। अनेन मंत्रेण दुर्वाग्रेण स्पृष्ट्वा एकविंशतिवारं वा अष्टोत्तरशतं वा अष्टो
त्तरसहस्रं वा अभिमन्त्र्य तत्तैलं प्रसववेदनासमये स्त्रियं प्राशयेत्। शीघ्रं प्रसूयते॥ अथ भुवनेशी चतुरक्षविधानमुच्य
ते। अजऋषिः। गायत्रीछंदः भुवनेश्वरी देवता। ॐ बीजं ह्रीं शक्तिः ओं ह्रां हृत्। ॐ ह्रीं शिरः ॐ ह्रूं शिखा ॐ ह्रैं कवचं
ॐ ह्रौं नेत्रं ॐ ह्रः अस्त्रं। ध्यानं भास्वद्रत्नौघमौलिस्फुरदमृतरुचा रंजयच्चारुरवं सद्यः संतप्तकान्ते स्वरकमलजपा
भासुराभिः प्रभाभिः विश्वाकाशावकाशं ज्वलयदभिरं धर्तपाशांकुशेष्टाभीतीनां भंगितुंगस्तनमवतु जगन्मातृ
रार्केव पूर्वः। ओं ह्रीं हंसः इतिमन्त्रः ऐश्वर्यसेव्यप्रधानोयं मन्त्रः चतुर्लक्षजपः। त्रिमधुरसिक्ताभिः पलाशसमिद्भिर्वा
राजैर्वा दशांशं जुहुयात्। अथ स्यार्घ्यविधिस्वपूजाविधिश्चोच्यते। समेसुमृष्टे रचयेद्विविक्ते भुदेतलेस्थंडिलमंकण
स्य। तस्मिन् यजेत्पीठं प्रभूतायै विमलायै सारायै समराध्यायै परमसुखायै इति पीठकृत्यैः पूर्वमेवाग्नेयादिष्वष्टिषु म<br>
ध्ये च संयजेत्। वां दीप्तायै रीं सूक्ष्मायै रूं जयायै। रें भद्रायै रैं विभूत्यै। रों विमलायै। रौं अमोघायै रं विद्युतायै रः। सर्वतो



For Private And Personal

मुख्यै। ब्रह्मविष्णुशिवात्मकसमीरसौराय योगपीठायनमः। हृल्लेखाकमलासनायनमः। इति सौरपीठं अस्मि
न्सौरपीठे समावाह्य ह्रां ह्रीं खीं छुं कं कं समर्चयेत्। हृल्लेखायै गगनायै रक्तायै करालिकायै महोच्छुष्मायै। इति भुवने
शीविधानोक्ताभिः शक्तिभिः प्रथमावृतिः अंगैर्द्वितीयावृतिः। मातृभिस्तृतीयावृतिः। सों सोमाय। बुं बुधाय वं बृहस्प ग:
तये। शुं शुक्राय अं अंगारकाय शं शनैश्चराय रां राहवे कें केतवे। इति चतुर्थ्यावृतिः इंद्रादिभिः पंचमी एवमा
र्कवपुः शक्तिं परिपूजयेत् अर्घ्यं विधानतः परं उपरिष्टात्सौराष्टासविधाने लिख्यते तत्रैवानुसंधेयम्॥ अथाजपा
पाविधानमुच्यते। ब्रह्मऋषिः देवीगायत्रीछंदः परमात्मा देवता। हं बीजं सः शक्तिः हंसां हृत्। हंसीं शिरः हंसूं शिखा
इत्यादि षडंगानि ध्यानं अरुणकनकवर्णं पद्मसंस्थं च गौरीं ननियमितचिन्हं सौम्यतानूनपातं भवतु भवदभीष्टप्राप्त
ये पाशटंकाभयवरद्विचित्रं रूपमर्धांविकेशं। तत्र सौम्यतानूनपातं सोमाग्निस्वरूपं हंसः इति मन्त्रः। प्रयोगविशे
षे सोहमिति च योजयेत्। द्वादशलक्षजपः। आज्यसिक्तैः पायसेन द्वादश सहस्रं जुहुयात्। मोक्षारोग्यप्रधानोयंम
न्त्रः। अथ पूजार्थं। पूर्वं भुवनेशी चतुरस्रोक्तसौरपीठं संपूज्य प्राक्मातृकावर्णोक्तवर्णौषधीषेकेन पाचितकषा
येन कलशमन्त्रा पूर्य अस्मिन्नावाह्य समर्चयेत्। अंगैः प्रथमावृतिः। ॐ कृतात्मने ॐ वस्वात्मने ॐ परमात्मने ॐ अं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र·सं· तत्रासने इति महादिक्षु। ऋतजायै। अन्नायै गोजायै अद्रिजायै कोणेषु एवं द्वितीयावृत्तिः इंद्रादिभिः तृतीया वज्रादि
१८७ भिश्चतुर्थी एवं संपूज्य कलशमभिषिच्य चर्मापि दद्यात्। अथास्यैव मंत्रस्य प्रयोगविशेष उच्यते विधाय लिपिपंकजं
मनुपुनोक्तमसंकजं निधाय घटमनुपूर्य जलवारिणा तन्मुखं विधाय राशिनात्ममन्त्रयुतवामदोष्णा पुनः सुधाधितस्मै
रसाध्यमभिषेचयेत्जलैः। नारी नरो वा विधिनाभिषिक्तो मन्त्रेण तेनेति विषद्वयोत्थैः रोगैस्तथाधिग्रहितैर्विमुक्तश्चिरा
यजीवेत्करणैः सुहृद्भिः अयमर्थः एकपंचाशद्दलयुतं ... विलिख्य तेषु दलेषु मातृकावर्णान् ... विलिख्य पुन
स्तत्कर्णिकायां हंसरसेनेमन्त्रं विलिख्य तत्कर्णिकामध्ये घटं निधाय तज्जलेन पूरयेत् पुनः वामहस्ततलं ... चंद्रमं
डलमिति ध्यात्वा तेन हस्ततलेन हंसरसाख्यमन्त्रजपपुरःसरं घटमुखं पिधाय। तज्जलं सुधायितं ... सुधायिते
नजलेन हंसरसेन मन्त्रजपपुरःसरं साध्यमभिषेचयेत्। तस्माद्विषद्वयोद्भवरोगशमनं ... अंतःकरण
शुद्धिश्च भवति। प्रतिप्रयोगांतरं करेण तेनैव जलाभिपूर्णं प्रजप्य मन्त्री चटकं विधाय सुधाधितेन तेन विषंनिषण्णं निषिंचे
द्विषं निहन्ति दर्पिकालकूटं अयमर्थः पूर्वोक्तेन वामहस्ततलेनैव जलपूर्णं चटकं विधाय हंसरसेन तन्मन्त्रं मन्त्री पदस्थि राम·
तः गरुडबीजपुरःसरं जप्त्वामृताधितैस्तैर्जलैर्विषग्रस्तमभिषिंचेत्। कालकूटविषमपि नाशयतीत्यर्थः मिति गरुडबीजं १८८

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रयोगांतरं गदितनिजपाणितलं विषिणः शिरसि प्रविधाय जतैः मितधीः अचिरात्स्वति मोचयते विषतोमतिमानथ वस्क दृष्टमपि अयमर्थः पूर्वोक्तवामहस्ततलमेव विषग्रस्तस्य शिरसि राशीति मत्वा निधाय मन्त्रजपध्यानपुरःसरं जलैः सेचयेत् तस्माच्छीघ्रं विषान्मुक्तो भवति ॥ अथ प्रयोजनतिलकाख्यस्यो मन्त्रविधानमुच्यते देवभागऋषिः गायत्रीछंदः आदित्यो देवता ह्रीं बीजं सः शक्तिः। ह्रां हृत् ह्रीं शिरः ह्रूं शिखा इत्याद्यंगानि ध्यानं अरुणसरोरुहसंस्थस्थः दृगरुणोरुणसरोजयुगलधरः। करकलिताभयवरदोद्युतिविंबोमितभूषणस्तनोवतुनः। ह्रां ह्रीं सः इति मन्त्रः शिरआदाचरणतलं कंठादागुह्यमागलंकांतात्। विन्यसमन्त्रवर्णान् क्रमेण मन्त्री करोतु चांगविधिः द्वादशलक्षं जपेत्। आज्यसिक्तैरंभोजैर्वा त्रिमधुराप्लुतैस्तिलैर्वा द्वादशसहस्रं जुहुयात् पुरश्चरणाहोमार्थं अथ पूजाविधिः। प्राक् भुवेमीचतुरस्रपीठविधानोक्तसौरपीठे पुरश्चरणा कलशं संपूर्य समावाह्य समर्चयेत्। अंगैः प्रथमावृतिः सोमाद्यष्टग्रहैर्द्वितीयावृतिः तत्र विशेष उच्यते प्रागादिदिशासंस्थाः। शशिबुधगुरुभार्गवाः क्रमेण स्युः। आग्नेयादिषु शिखिधरणिजमंदाहिकेतवः पूज्याः एतेषां ग्रहादीनां वर्णादीनि तदायुधानि चोच्यते शुभसितशुक्लासितधूम्ररुक्षकाः क्रमशः। चंद्राद्याः केलंतावामोरुन्यस्तवामकरलसिताः। अपरकराभयमुद्राविकृतमुखोदितांजलियुक् दंष्ट्रोग्रास्योमंदः सुवर्णसदृशा मुक्तादिभूष

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नी नां
प्र.सं. ष्व एवमष्टगहैः संपूज्य पुनर्लोके श्यैस्त्र्याप्टतिः अथप्रयोगः संपूज्यै विधिनाविधिवद्गोरोचनादिभिर्द्रव्यैः दद्याद
१८८ र्घ्यैरवयेमन्त्रीनिजवांछितार्थप्रयेमुक्त्यै। गोरोचनादिद्रव्यमुच्यते। गोरोचनास्त्र तिलवैणवराजिरक्तशीताख्यशालिक
रवीरजपाकुशाग्रान्। श्यामाक्तंदुलयुतांश्चयथाप्रलाभात्संयोज्य भक्तिभरितो र्घ्यविधिर्विधेयः अस्यार्थः। अस्त्रकुंकु
मंवैनवंतं ऊडमिति विशेषः। रक्तं रक्तचंदनं। सितकर्पूरादि। प्रयोगांतरं। कृत्वामंडलमष्टपत्रलसितंतत्कर्णि
कीयांतथापत्राग्रेषु विधायकुंभनवकंतस्यापिबाजलैः॥ आवाह्य क्रमशोग्रहान्नवसमाराध्याभिषेकक्रियांकुर्वी
द्योग्रहवैकृतानि विलयंत्यस्य तस्मीर्भवेत्। अयमर्थः अष्टपत्रंपद्मंपिष्टभूततंदुले दर्भाग्रेण विलिख्य। तद्दला
ग्रेषु चकर्णिकायां चर्पाठपूजापुरःसरं। नवकुंभांजलपूर्णंनिधापयेत्। पुनस्तेषुमध्यस्थकुंभमारभ्य पूर्वादिक्रमे
ण आदित्यादिनवग्रहान्समावाह्यानेन सौरविधानेन समर्च्य साध्यंसमभिषिंचेत्॥ अनेन पिशाचादिग्रहपीडा
ग्रहपीषपीडा चनस्यति लक्ष्मीर्भवेच्च। प्रयोगांतरं॥ अथग्रहयत्नप्रकारमाह। ग्रहपरिवृतमिष्टापूर्वक्रूपसादिनेशं
प्रतिजुहुतंनिजसैवेकृते वा ग्रहाणां॥ शुभमितिरुपरागेचंद्रभान्वोस्वभेवारिपुनरपजभयेवाघोररूपेगदेवा॥ अ प्रभः
र्कद्विजांघ्रिपमयूरकपिप्पलाश्वसोदुंबराः खदिरशाम्यभिधाः सदूर्वाः दर्भान्वयाश्चसमिधोष्टशतंक्रमेणसर्पिर्हे १८८

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विर्घता: पृथगेव चरुः आज्याहुत्याद्या दावांते चव्याहृतिभिरपि जुहुयात् सोमादीनां दिग्भिदिग्भिसमाधायवन्हिं यावत्। होमे सम्यक्कृतवतीमुदीयां तिसर्वे ग्रहाश्च युष्मसम्यग्जयमपि रुजः शांतिमायुश्च दीर्घं कुर्त्वा शांति व्रजति पुनरेकत्र वा सर्वहोमः। ग्रह ... परिव्रतमित्यादि ग्रंथानामयमर्थः॥ निजजन्मनक्षत्रदिने वा ग्रहाणामवस्थितिवैषम्यकाले वा जन्मनक्षत्रे चंद्रसूर्यग्रहकाले वा अन्यस्मिन्नशुभदिने वा शत्रुभये वा घोरव्याधिभये वा अग्निसंस्थाप्य पद्मयत्नोक्तेन आसत्येनेत्यादिमन्त्रेण वा नामभिर्वा सूर्यं समावाहयेत्। पुनः स्तस्याग्नेः प्रागादिदिक्षु पृथक् अग्निं संस्थाप्य तेषु क्रमेण शशिबुधगुरुशुक्रान् क्रमेणाप्यायस्वेत्यादिना तस्य तस्योक्तेन मन्त्रेण वा तत्तं नामभिर्वा सं पूज्य पुनराग्नेयादिकोणेष्वग्निं संस्थाप्य तेषु क्रमेण अंगारकशनैश्चरराहुकेतून् क्रमेण तत्तन्मन्त्रैः पूज्य पूर्वमाज्येन प्रणवपूर्वकव्याहृतिभिस्तत्र तत्र हुत्वा पुनरर्कादिभिर्नवभिः समिद्भिरुक्तैरेकैकेकैरष्टोत्तरशतशः संख्यतत्तन्मन्त्रेण तत्र तत्र हुत्वा पुनः। तत्तदुक्तद्रव्ययुक्तेन हविषा च तत्तन्मन्त्रैः। स्तत्र तत्र तावद्धुत्वा पुनरप्याज्येन तत्तन्मन्त्रैः। स्तत्र तत्र तावदेव हुनेत् पुनर्व्याहृतिपूर्वकप्रणवेनाज्यं तत्र हुनेत्। तत्रतु अनेकत्राग्निं संस्थाप्य जुहोति चेदनेककर्तृभिर्होतव्यम्। अथवा एककर्ताजुहोति चेत्। एकस्मिन्नेवाग्नौ सर्वानपि ग्रहान् समावाह्य स एव कर्ता सर्वैर्द्रव्यैर्हुनेच्च एवं हुते उक्तफलं भ

त्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. वति। अर्कं द्विजां घ्रिपं पलाशं मायूरकं अपामार्गं पिप्पलं। अश्वत्थं खादिरं करुं कासिशामि वन्हि अस्यसौरमन्त्रस्य फ
१८८ लश्रुतिः। अमुनाविधिनाकृतार्चनाद्यैः प्रभजे द्यो दिन शोनरो दिने यं मणिभिः सधनैश्च धान्य वर्यैः परिपूर्णो वस
थो भवे च्चिराय॥ सौराष्टाक्षरविधानमुच्यते। देवभाग ऋषिः। गायत्री छंदः आदित्यो देवता ॐ बीजं ह्रीं शक्तिः॥ ॐ सत्य
तेजोज्वलज्वालामणि हुं फट् स्वाहा हृत्॥ ॐ ब्रह्मतेजोज्वालामणि हुं फट् स्वाहा शिरः॥ ॐ विष्णुतेजोज्वलज्वालाम
णि हुं फट् स्वाहा शिखा॥ ॐ रुद्र तेजोज्वलज्वालामणि हुं फट् स्वाहा कवचम्॥ ॐ वन्हितेजोज्वलज्वालामणि हुं फ
ट् स्वाहा नेत्रम्॥ ॐ सर्वतजोज्वलज्वालामणि हुं फट् स्वाहा अस्त्रं अथ ध्यान। अरुणोरुणपंकजे निषण्णः। कमलेभी
तिवरौ करौ दधानः स्वरुचाहितमंडलस्त्रिनेत्रो रविराकल्पशताकुलोवतात्तुः। ॐ घृणिः सूर्य आदित्य। इति मन्त्रः।
णकरवालंसाध्यहस्तेदत्वा ततः प्रोक्षाग्निस्थंदेवंहृदयकमलेसमुद्वास्याग्न्यादिकंचतुष्पथेवासाध्यश्मशानेवापू
र्ववदेवस्थापयित्वाअष्टदिक्षुसर्वेभ्योभूतेभ्योनमः इतिकेवलान्नेनबलिंप्रकीर्यस्वस्यरक्षांकृत्वा नत्वसर्वेमवीक्ष्यशी
घ्रमागच्छेत् एवंत्रिरात्रिषुकृत्वातुरीयदिनेपायसेनाष्टोत्तरसहस्रंहुनेत् इतिप्रतिकारबलिविधिःसमाप्तः अ
थनृसिंहषडक्षरीविधानमुच्यतेस्वयंभुऋषिः पंक्तिछंदः नृसिंहोदेवता सौंबीजं ह्रींशक्तिः आंहृत् ह्रींशिरः सौंशि
खाक्रोंकवचं हुंनेत्रत्रयं फट् अस्त्रं ध्यानं अव्यान्निर्व्याजरौद्राकृतिरतिविकृतास्योल्लसत्तीक्ष्णदंष्ट्रश्चक्रंशंखंचपाशां
कुशाकुलिशगदांदारुणाख्यंदधानः रक्ताकारश्चनाभेरधः परिसितोदिव्यभूषाविशेषोदेवोऽस्माभिंदुनेत्रोनिखिल राम:
सुखकरोनारसिंहश्चिरंवः आंह्रींसौंक्रोंहुंफट् इतिमंत्रः रसाप्रधानोयंमंत्रः लक्षजपः अथपूजायामंडलविधा २०५

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नमुच्यते ह्स्ले खौं तस्य साध्यं दहनपुरयुगाश्रस्य मन्त्रार्णमंतः सिंहानुष्टुप् चतुर्वर्णकलसितदलाढ्यं कलाकेसरं च
रत्नोद्य ढ्यं जनावेष्टितं अवनिपुराश्रस्य चिंतोपलदत्तयंत्रं रक्षः पिशाचामयविषरिपुध्वंसनं नारसिंहं अस्यार्थः
षट्कोणं विलिख्य तन्मध्ये भुवनेशीं विलिखेत् तस्या अंतः साध्यनामादीन् विलिखेत् षट्सु कोणेन्द्र सिंहषडुक्षरी
मंत्रवर्णान्विलिखेत्॥ तद्बहिरष्टदलं विलिख्य तत्केसरेषु कलाद्वंद्वं विलिखेत् तन्मध्ये रसिंहानुष्टुभो वर्णाश्चतुरो
विलिखेत् बहिः कादिलिभिर्वेष्टयेत् तद्बहिश्चतुरश्रकोणेषु चिंतामणिं सप्तविंशतिपटले वक्ष्यमाणं वेष्टयेत् अस्मि
न्यंत्रमंडले दीसाकलशं क्षीरद्रुमचर्मकाथोदकैः संपूर्य वैष्णवपीठं संपूज्य तस्मिन्नावाह्य न्रहरिं समर्चयेत् अंगैः
प्रथमावृतिः चक्राय शंखाय पाशाय अंकुशाय कुलिशाय गदायै रूपाणाय खेटाय रूपाणखेटौ तु ययोः करयोः दारु
णमुद्रे तरयोः करयोरित्यभिप्रायः इति द्वितीयावृतिः तत्र दारुणमुद्रा हिरण्यकशिपुवक्षस्थलविद्रावणेन सर्वतो
विस्तारः करयुगयोर्गलयोर्दारुणमुद्रेत्युच्यते इंद्रादिभिस्तृतीया वज्रादिश्च तुर्थी एवं संपूज्य पुनरभिषिंचेदुक्तसंख्यं
जपेच्च केवलघृतेन षट्सहस्रं पुरश्चरणाहोमः अथ प्रयोगः खरमंजरीसमर्थं जुहुयादथ मंजरीस्तनयं प्रस्तापं चग
व्यं सप्तदिनं भूदशांतयेमन्त्री अस्यार्थः खरमंजरी नायुरुवितस्या मंजरीपं चगव्यसिक्ता सप्तदिनं सहस्रशो हुनेत् मं

नजस्र पंचगव्यं प्राशयेच्चतेन पैशाचं निवृत्तिः प्रयोगांतरं छिन्नरुहांसमिधां यश्च जुहोति चतुर्दिनमाप्तं दुग्धयुतं त
चिराच्चानुजानां होमविधिज्वरशांतिकरः स्यात्॥ अयमर्थः छिन्नरुहसमित् शीतिलच्चतुर्दिनं नित्यशः क्लिसहस्रं दु
ग्धसिक्तं हुनेत्॥ ज्वरशांतिर्भवेत् प्रयोगांतरं रक्तोत्पलैः प्रतिदिनं मधुरत्रयाक्तैर्यो वा जुहोति नियमेन सहस्रसंख्यैः
मासेनवां छितमन्त्रजापी स्याद्दक्षरेण धनधान्यसमृद्धगेहः अयमर्थः रक्तोत्पलं येन्नैतत् पुमधुरत्रयसिक्तै क्लिस
हस्रं नित्यशो मासं हुतें अभीष्टं लक्ष्यसित सारमेवं हुले धनधान्यसमृद्धो भवति प्रयोगांतरं आरक्तैस्तरुणीसहस्रकं
प्रफुल्लैरंभोजैस्त्रिमधुरसंयुतैर्जुहोतु लक्ष्मीस्यादतिमहतिमहत्तयायुः संप्राप्नुयात्सकलजगत्प्रियश्च भूयात् अयमर्थः
रक्तकमलैस्त्रिमधुरसिक्तैर्वर्षदशसहस्रं जुहुयात्॥ तस्मादुक्तफलं भवति प्रयोगांतरं लाजाभिस्त्रिमधुरसंहिताभि
रत्नो मासार्द्धं रनिशं जुहुयात्सुखेसहस्रं कन्यार्थी प्रतिलभते परोथ कन्यां कन्या वा भवति वरार्थिनी वरं ध्या अयमर्थः अर्द्ध
मासमह्नो मुखे उदयकाले नित्यशः सहस्रं त्र्यंत्रि मधुरसिक्ताभिर्लाजाभिः कन्यार्थी वरो वा वरार्थिनी कन्या वा हुनेदु
भयोरपि इतरेतरसिद्धिः प्रयोगांतरं तिलैः सराजीस्वरमंजरीसमिद्धविघर्तैश्च द्दिसहस्रसंख्यकैः प्राग्जुहुतो नैवरुजो राम:
ग्रहोद्भवा न वा भिचारसतिरस्य जायते अस्यार्थः राजीकटुकस्वरमंजरिनाम्नुरुविति लैः सर्षपैः स्वरमंजर्याच हवि २८६

पाद्य तेन च प्रत्येकं हि सहस्रं हुनेत् ग्रहदोषरोगाश्चाभिचारव्याधयश्च न भवंति प्रयोगांतरं दशाधिकशतैः पयोघृतयुक्तै
श्च दूर्वात्रये हुने दिनमुखे विधुं नरहरिं विचिंत्यानले अचासनु दीर्घमायुरखिलैर्विमुक्तो गदैः सुखी भवति नानवो नि
ज कलत्र पुत्रादिभिः अयमर्थः सहस्रसंख्यं पयोघृतयुक्तै दूर्वात्रिकैर्हुनेदिति इति गीर्वाणेंद्र विरचिते प्रपंचसारसंग्र
हे त्रयोविंशतिः पटलः॥ अथ नृसिंहमंत्रप्रसंगात् कस्मांरोकं नृसिंहमंत्रांतरमुच्यते नरसिंह महासिंह ज्वालामाल
नलानन रोगानशेषान्मृ तेशखादखादाग्निलोचन इति मन्त्रः अनुष्टुब्वत् अंगकल्प्यादि॥ अथ नृसिंहमंत्रप्रसंगात्
कस्मांतरोक्तं नृसिंहसंध्यावंदनमप्यत्र योग्यतावशाल्लिख्यते शिवं गुरुं गणेशं च प्रणम्य परदेवतां करोमि नृहरेः स
म्यक् मन्त्राराधनपद्धतीं तत्र श्रीमान् साधकेंद्रो ब्राह्मे मुहूर्ते उत्थाय प्रक्षालितपाणिपादमुखः प्राङ्मुख उदङ्मुखो वा उ
पविश्य गुर्वादिवंदनपूर्वकं प्राणानायम्य संकल्पीकृत्य देवतां ध्यात्वा मानसं संपूज्य गतदिवसकृत्यं सर्वं भगवतः पाद
मूले समर्प्य॥ तस्मिन्दिने करिष्यमाणस्यानुज्ञां लब्ध्वा नृसिंहस्तोत्रपठनपुरःसरं स्नानार्थं बहिर्निर्वर्त्य आवश्यकशौचाच
मनपूर्वकं अस्त्रेण मृदं खनित्वा हृदयेनादाय शिरसा जलशोधिते तीरे निधाय शिखया शर्करादिकमुद्धृत्य कवचेन त्रे
धा विभज्य नेत्रेण निरीक्ष्य तत्रैकेन भागेन पाणिपादमुखानि प्रक्षाल्य परेण सर्वांगान्यालिप्य निमज्य मूलं गा कि तोत्तुसं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र॰सं॰ धायतीरमागत्यापरंमृद्भागं प्रेधा विभज्यास्त्रांगमूलैरभिमन्त्र्यास्त्रजप्तं दिक्षु रसार्थे निक्षिप्यांगजप्तं हस्ताद्यंगेषु विन्यस्य
१८७ मूलजप्तं हृदयेनादाय तीर्थं नमस्कारपूर्वकं जले भवतीर्य नाम्न दं जले मूलेनालोड्य नरसिंहतीर्थं रूपं तज्जलं ध्यात्वा॥
निमज्ज्य मूलमष्टकृत्व आवर्त्त तीरमागत्यास्त्रप्रोक्षितं वासः परिधाय वैदीकसंध्यावंदनानंतरं नरसिंहसंध्यावंदनमुपासि
त॥ तद्यथा गुर्वादिवंदनपूर्वकां संकलीकृत्य॥ आत्मानं नरसिंहरूपं ध्यात्वा मूलास्त्रमन्त्राभ्यां जलमभिमन्त्र्य शिरसा धेनु
मुद्रां प्रदर्श्य॥ शिखायां गालिनीमुद्रां प्रदर्शयेत् गालिनीमुद्रे पूर्वे सप्तमे पटले पूजासामान्यविधौ प्रोक्ते पुनः कवचेनावगुं
ठ्य नेत्रेण निरीक्ष्यास्त्रेण दिशो बध्वा तज्जलं हृदयेनादाय प्रणवेन वामहस्ते निधाय तदंगुलिविवरनिःसृतेन जलेन समू
लेन शिरसि सप्तवारं मार्जयित्वा शेषं जलं दक्षिणहस्तेन संगृह्य वामा नासापुटमानाय्य॥ देहांतरिज्या पवेश्यास्त्रं मन्त्रं ज
पन् महापातकपंचांगं पातकोपांगसंमितं उपपातकरोमाणं कक्षिस्थं पापपूरुषं शोधयित्वा दक्षिणेन नासापुटेन द
क्षिणहस्ते विरेचयेत् पापपुरुषं तत्र समागतकज्जलाभं ध्यात्वा पुनः कल्पितवज्रशिलायां चूर्णीकुर्यादित्यघमर्षणं त
तो हस्तं प्रक्षाल्य मूलजप्तजलेन त्रिवारं प्राश्य प्रणवेनोंगानि संमृज्यांजलिनार्घ्यं गृहीत्वा नरसिंहगायत्रीमुच्चार्य सूर्य राम॰
मंडलसंस्थिताय नरसिंहाय त्रिवारमर्घ्यं दत्वा वर्णपदपादमूलहस्तनिमन्त्रैः सकृत्सकृत्संतर्प्य दशवारं गायत्रींना १८७

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ह्रसिं ह्रीं सं जप्य जपं समाप्य मालामन्त्रेणोपस्थाय पूर्ववदाचम्य उपसंहरेदिति संध्यावंदनविधिः॥ ॐ नृसिंहाय वि
द्महे वज्रनखाय धीमहि तन्नः सिंहः प्रचोदयात् इति नृसिंहगायत्री अस्य नृसिंहगायत्रीमन्त्रस्य ब्रह्मा ऋषिः गायत्री
छंदः नृसिंहो देवता इदं तु संध्यात्रयेपि समानं अत एवोक्तं परमेश्वरेण संध्यालोपो न कर्त्तव्यः शंभोराज्ञैवमेव हि दी
क्षितः संध्यया हीनेन दीक्षाफलमभुत इति॥ अथ नृसिंहसंध्यावंदनप्रसंगात् श्रीनृसिंहभस्मस्नानविधिरप्य
त्र योग्यतावशाल्लिख्यते ब्रह्मा घरोपगुरुपारंपर्यक्रमे स्वगुरुनाथपादांबुजं यावतावत्प्रणोमि॥ इति गुरुं नत्वा गणप
ति दुर्गादीनपि वंदेन सुदर्शनेन तालत्रयदिग्बंधनादीनपि कृत्वा॥ ह्रह्र ह्र ह्रस्रैं ह्रसौंः इति मन्त्रोदयं कृत्वा ॐ ह्रीं क्रौं
ह्रसः उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखं ॐ ह्रीं स्फुर स्फुर प्रस्फुर घोर घोर नर तनुरूप चट चट प्रचट प्रचट कक
ह्वय म वयं ध वं घ घातय घातय घातय हुं फट् नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं ॐ सहस्रार हुं फट् रस्रौं ॐ
नमः शिवाय क्षिप ॐ स्वाहा हासो हं क्रौं ह्रीं ॐ इति मूलमुच्चार्य॥ दक्षिणनासा नव वारे च कं विधाय अथ दशवारमिज्या
मूलमापूर्य पङ्क्तिं शाहारं कुंभकं कृत्वा मूलमन्त्रेण व्यापय ॐ नमः परायै त्यादीनि पंचतत्त्वानि पंचस्थानेषु न्यस्य। को
पतलेन च व्याप्य वैष्णव पीठन्यासं कृत्वा पंचोपचारैर्मानसपूजां कृत्वा मूलेन प्राणायामं कृत्वा तन्मै तन्यमं जलौ संग

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. ह्यमूलेनकरतलपृष्ठानिव्याप्य॥न्टसिंहापोरसुदर्शनानांपृथक् पृथक् करन्यासंकुर्यात् उग्रंवीरमंगुष्ठाभ्याम्॥म
२८५ हाविष्णुंतर्जनी॰।ज्वलंतंसर्वतोमुखंमध्यमा॰।न्टसिंहंभीषणंभद्रंअनामिका॰मृत्युमृत्युंकनिष्ठिका॰नमाम्यहं
करतलं॰स्फुर्अंगुष्ठाभ्यामित्यादिआचक्रायस्वाहाअंगुष्ठाभ्यामित्यादिनाचकरन्यासंकृत्वामूलेनसकृद्व्याप्यरन्येषां
मन्त्राणांपृथक् पृथक् अंगानिविन्यसेत उग्रंवीरमित्यादि ह्रींस्फुरः।२।हृदय।१।प्रस्फुर।२।शिरः घोरघोरतरतनु
रूपशिखावद।२।प्रचट।२।कवचं।काः।२।उपम।२। नेत्रं।वंधरधावम।२।ह्रुंफट्अस्त्रंआचक्रायस्वाहेत्यादितत्त
दंगांतेऋषिश्छंदोदेवतान्यसेत् ब्रह्माऋषिः अनुष्टुप्छंदः श्रीन्टसिंहोदेवता अघोरऋषिः त्रिष्टुप्छंदः अघोररुद्रो
देवता अहिर्बुध्न्यऋषिः अनुष्टुप्छंदः सुदर्शनोमहाविष्णुर्देवताजान्वोरासक्तेत्यादिकालाभाभ इत्यादि अव्याद्रास्क
र इत्यादि ध्यात्वामूलंद्वादशवारंवारएकपंचाशद्वारंवाजप्त्वा। अग्निरस्मिजन्मनाजातवेदाघृतंमेचक्षुरमृतंमआस
न् अर्कस्त्रिधातूरजसोविमानोजस्त्रोधर्मोहविरस्मिनाम॥ इतिभस्मादाय अग्निरितिभस्मवायुरितिभस्मजलमिति
भस्मस्थलमितिभस्मव्योमइतिभस्मसर्वंहवाइदंभस्ममनइत्येतानिचक्षूंषिभस्मानि। इतिभस्माभिमंत्र्य॥शंनोदेवी राम:
रितिभस्मनोदोषानपास्यपंचाक्षरेणपंचवारंभस्माभिमंत्र्य॥पंचाक्षरेणभनासकृद्व्याप्य॥भस्मनापंचाक्षरस्याक्षरं २८५

For Private And Personal

न्यासमंचनत्वस्थानेषुन्यस्य। मूलेनभस्मनासकृद्व्याप्य॥ उग्रंवीरंमहाविष्णुंकृकृएथिव्यात्मनेनमः॥ ज्वलंतंसर्वतोमु
खंयज्वंवात्मनेनमः॥ नृसिंहंभीषणंभद्रंसामात्म्यात्मनेनमः॥ मृत्युमृत्युंनमाम्यहंअथर्वांगिरसवाच्यात्मनेनमः॥
उग्रंवीरं० नमाम्यहम्॥ इतिहासपुराणाभ्यांप्रणवाकाशात्मनेनमः॥ इतिपादनाभिहृन्नेत्रशिरःसुभस्मनाकरद्वयेनन्य
स्य॥ उग्रं० म्यहं इति पादाशिरोतंव्याप्य॥ ॐउग्रनृसिंहायनमः॥ ॐरुद्रनृसिंहायनमः॥ ॐवीरनृसिंहाय० ॐवि
लंवनृसिंहायन०। ॐकोपनृसिंहायनमः॥ इतिशिरोनासिकाहृज्जानुपादेषुकरद्वयेनभस्मनान्यस॥ नृसिंहम
न्त्रेण केशादिव्याप्य॥ ॐउग्रंनः। ॐवीरंनमः। ॐमहाविष्णुंनमः। ॐज्वलंतंन०। ॐसर्वतोमुखंनमः। ॐनृसिंहंन
मः। ॐभीषणंनमः। ॐभद्रंनमः। ॐमृत्युमृत्युंनमः। ॐनमामिनमः। ॐअहंनमः॥ इतिशिरोललाटनेत्रहृद
यमुखकंठहृन्नाभिकटिजानुपादेषुभस्मनापदानिन्यसेत्॥ नृसिंहेनव्याप्य। ॐउंऊंनमः। इत्यादिनृसिंहाक्षरेणस
शिरोललाटदृग्युगमुखकरपदसंधिकेषुसाग्रकेषु॥ उदरहृदोर्गलपार्श्वेषपरेककुदिक्क्रमान्यसेद्वर्णान्। ॐ
ह्रींस्फुर। २। ॐनमइत्याद्यघोरैकादशपदानि॥ शिरोललाटमुखकंठहृन्नाभिकट्यूरुजानुजंघापदेषुन्यस्य॥
सुदर्शनाक्षराणिशिरोवदनहृद्गुह्यजानुपदेषुन्यस्य॥ वामहस्तेभस्मंनिधाय। ॐह्रींस्रौंहंसःस। प्यवन्त्वायेपा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



लयपालय॥ उग्रंवी॰ मुरवं ॐ ह्रीं स्फुर॰ हुं फट्। नृसिंहं भीषणं भद्रं ममत्वग्गतमस्त्कं नाशयनाशयमस्त्कमस्त्कं नमाम्य
हम्॥ ॐ सह॰ हुं फट् रस्म्यौं जं नमः शिवाय क्षिप ॐ स्वाहा सो हं स्लौं ह्रीं ॐ इति तद्भस्म दक्षिण हस्तेन स्पृष्ट्वाभिमन्त्र्य
अं अच्युताय रोग नाशाय हरये अमृताय नमः। सं अनंताय रोग नाशाय॰ मृताय नमः। ठं अमृताय रोग॰ अमृताय नमः॥
एं गोविंदाय रोग॰ ताय नमः। वं विष्णवे॰ नमः। इति पंचामृतमन्त्रेण भस्मनाव्यापयेत्॥ नृसिंहाक्षरं न्यासं च। अघोरपदं
न्यासं च। सुदर्शनाक्षरन्यासं च भस्मना निधाय॥ मूलेन साध्यनामसहितं अस्य यातमिति भस्माभिमन्त्र्य। पंचामृतेन व्याप
येत्॥ एवमेव मांसगत मेदोगतास्थिगत मज्जागत शुक्रगत सर्वगत इत्यूह्यम्॥ पंचाक्षेण भस्मना व्याप्य॥ पंचाक्षराणि
विन्यस्य। पंचाक्षरेण व्याप्य। मूलेन च व्याप्य। भस्म वामहस्ते निधाय॥ मूलेनाभिमन्त्र्य। जलेनालोड्य। अग्निरित्यादिस
त्यभिर्मन्त्रैः। शिलो ललाट हृदय दक्षांस वामांस पृष्ठ ककुत्सु त्रिपुंड्रं कृत्वा। अघोर नृसिंह भावेन स्थित्वा॥ मूलं सकृज्ज
प्त्वा॥ नृसिंहाघोरसुदर्शनानां करन्यासांगन्यास ऋषिच्छंदो देवता। न्यासानि च विधाय॥ तालत्रय दिग्बंध नाग्नि प्राकारे
णरक्षां कुर्यात्। इति भस्मना विधिः॥ अघोरपदन्यासः॥ कहृगास्य कंठ कहृन्नाभ्यं पूरुजानुं जघयोः पदयोः। नृसिंहपद एमः
न्यासः। केफालनेत्रास्य कंठ हृत्सु न्यसेच्च। नाभौ कटि जानु पत्सु। नृसिंहाघोरसुदर्शनानां ऋषिच्छंदो देवता षडंगानिन्य २८९

स्त्वा ध्यात्वामन्त्रत्रयमपिजपेत्। अनीवरसाकरंभवति॥ ॥अथलक्ष्मीनरसिंहमन्त्रविधानमन्त्रे देवताप्रकाशिकोक्त
मन्त्रलिख्यते। ब्रह्माऋषिः अतिछंदः। लक्ष्मीनरसिंहो देवता। श्रींबीजंह्रींशक्तिः श्रां हृत् श्रीं शिरः इत्याद्यंगानि वामांक
स्थ श्रियायुक्तं चक्रशंखाब्जधृक्करम्। पीतांबरं सर्वभूषं प्रसन्नं न्रहरिं भजे॥ ॐ श्रीं ह्रीं जयजय लक्ष्मीप्रियाय नित्यप्रमुदि
त चेतसे लक्ष्मीश्रितार्धदेहाय क्ष्रौं ह्रीं नमः॥ इतिमंत्रः। अष्टोत्तरसहस्रजपः। मध्वक्तमल्लिकापुष्पैः सहस्रहोमः॥ अथपू
जा वैष्णवपीठे समावाह्य समर्चयेत्॥ अंगैः प्रमावृतिः। भास्वत्यै। भास्कत्यै। चिंतायै। द्युत्यै। उन्मीलिन्यै। रमायै। कान्त्यै। रु
च्यै। इतिशक्तिभिर्द्वितीया। लोकेशैस्तृतीया। वज्रादिभिश्चतुर्थी॥ ॥ अथसुदर्शननारसिंहमन्त्रः तन्त्रैवोक्तोलिख्यते।
जयंतः दुर्वासावाऋषिः। जगतीछंदः सुदर्शननरसिंहोदेवता। क्ष्रौं बीजं। स्वाहाशक्तिः। चक्रराजाय ज्वालाचक्राय जगच्च
क्राय भकुरांतकचक्राय महासुदर्शनचक्राय। एभिः स्वाहांतैः पंचांगानि चक्राब्जासनमध्यस्थं कालाग्निसदृशप्रभं
चतुर्भुजं विकासास्यं चतुश्चक्रधरं हरिम्॥ योगपट्टपिनद्धांगं त्रिनेत्रं चोग्रविग्रहम्॥ ध्यायेत्समस्तदुःखघ्नमशोद्रुममूल
तः॥ ॐ सहस्रारज्वालावर्तिने क्ष्रौं हन हन हुं फट् स्वाहा॥ इतिमंत्रः। द्वादशलक्षजपः॥ आज्येन चतुश्चत्वारिंशत्सह
स्रं होमः॥ रक्षाजयप्रधानोयं मन्त्रः। अथपूजा। पूर्वोक्तपीठे समावाह्य समर्चयेत्। अंगैः प्रथमावृतिः। जयायै विजयायै

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अजितायै अपराजितायै इति दिक्षु। मोहिन्यैब्राह्म्यै मायायै सिध्यै इति विदिक्षु। पुरतः भद्रां वर्चयेत्। घृतमुद्गरपाशौ नो रुक्मौ भौ सितदंष्ट्रकौ। इति द्वितीयावृत्तिः। इंद्रादिभिस्तृतीया। वज्रादिभिश्चतुर्थी। अथयन्त्रम्। दशदलं पद्मं विरचय्य तत्र कर्णिकायां। प्रणवोदरे हनशब्दं विलिख्य तस्योदरे शत्रुनामविलिख्य। दशदलेषु मंत्राक्षराणि द्वंद्वशो विलिख्य। तद्बाह्ये षट्कोणं विलिख्य। कोणेषु नृसिंहैकाक्षरं विलिख्य॥ तद्बाह्ये ज्वालापरिवृतं त्रिकोणं विलिख्य। एतद्यंत्रं जपहोमादि साधितं समस्तशत्रुनिवारणं सर्वरक्षाकरम्॥ अथ प्रयोगः ब्राह्मणो जयमिच्छेत् कुशानास्तीर्य भूतले। तस्मिन्देशे समाराध्य सुदर्शननृकेसरीम्। मन्त्रं सहस्रमावृत्य हुने देवस्य सन्निधौ। सहस्रं मूलमन्त्रेण अपामार्गेण साधकः। तद्भस्म तिलकं कृत्वा निर्गच्छेच्छत्रु संनिधौ॥ दासवत्कुरुते शत्रून् स सद्यः किंकरो भवेत्॥ अथ शत्रुमनस्तत्य तर्पणं वापि कारयेत्। तज्जपाद्धौदके पट्टे रचयित्वोक्तयन्त्रकम्। तेनांगुलीयकं कृत्वा जपहोमादि साधितं। अयुतं जपमात्रेण नात्र कार्या विचारणा। अथौदुंबरपीठे तु देवदेवं निषपयेत्॥ तस्याग्रे वर्तुले कुंडे हैखादिरं समित्। अयुतं गोघृताक्तैस्तु मध्वक्तैर्वा जितेंद्रियैः। जययाप्नोति संवादे नित्यं परशुरामवत्॥ ॥ अथ कल्पांतरोक्तप्रकारेण लक्ष्मीनृसिंह मन्त्रो लिख्यते ब्रह्मा ऋषिः अनुष्टुप्छंदः। लक्ष्मीनृसिंहो देवता। ओं अंउग्रं वीरं महाविष्णुं शुक्लवर्णाय आनंदा पमः
२९०

For Private And Personal

त्मने हृत्। ॐ उं ज्वलंतं सर्वतोमुखं कृष्णवर्णाय श्रियात्मने शिरः ॐ मं न्रसिंहं भीषणं भद्रं पिंगलवर्णाय ज्योतिरात्मने
शिखा। द्विवारप्रणवांते म्रत्कम्रत्कं नमाम्य हं हेमवर्णाय मायात्मने कवचं। मूलमांतमुक्त्वा सर्वं वेदात्मकाय विद्युद्वर्णाय
महाचक्रात्मने अस्त्रं। ध्यानम्। सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्यस्थितं योगारूढमतिप्रसन्नवदनं भूषा
सहस्रोज्वलम्॥ त्र्यक्षं चक्रपिनाकसाभयवरान्बिभ्राणमर्कछवीं छत्रीभूतफणींद्रमिंदुधवलं लक्ष्मीन्रसिंहं भजे॥ ॐ
ईं हं उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखं न्रसिंहं भीषणं भद्रं म्रत्कम्रत्कं नमाम्य हं। हं दें अं द्वात्रिंशदर्णो मन्त्रः॥ अ
थास्य पूजा वैष्णवपीठे समावाह्य कर्णिकायां प्रणवसंपुटितं न्रसिंहबीजं संभाव्य लत्रमूर्तिं संभाव्य। तत्पुरतः ईशानादि
क्रमेण अकारउकारमकारान् विभाव्य तत्र ब्रह्मविष्णुमहेश्वरान् समभ्यर्च्य दक्षवामयोः हंस इत्यक्षरद्वयं संभाव्य। तत्र
सूर्यचंद्रमसौ समभ्यर्च्य। एतत्सर्वं प्रणवेन वेष्टितं संभाव्य। तद्बहिः षट्पत्रं विभाव्य। तत्र आचक्राद्यंगमंत्रैः एकविंश
त्यदलेषु दर्शनविधानोक्तैः समभ्यर्च्य। सुमित्यंतं मायया तद्वेष्ट्य। तद्बहिरष्टदलं विभाव्य। तत्र वासुदेवादयो दिक्षु शां
तिश्रीसरस्वतीरत्यादयः विदिक्षु समभ्यर्च्य। ह्रीमिति वह्निर्मायया वेष्ट्य। बहिर्द्वादशदलं विभाव्य! तत्र वासुदेव द्वा
दशाक्षरीवर्णपूर्वकाणि धात्रादिद्वादशादित्यनामानि समभ्यर्च्य। ह्रीमिति तद्वेष्टयेत्। धात्रे नमः। अर्यम्णे नमः। मि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir
For Private And Personal

त्रायनमः। वरुणायनमः। अंशायनमः। भगायनमः। विवस्वतेनमः। इंद्रायनमः। पूसेनमः। पर्जन्यायनमः। त्वष्ट्रेन
मः। विस्नवेनमः। तद्बहिः षोडशदलंविभाव्य। तत्रकेशवादिषोडशमूर्तिःसंपूज्य॥ ईकारेणतद्वेष्ठयेत्। तद्बहिर्द्वात्रिं
शाद्दलंसंभाव्य। तेषुप्रणवसंपुटितउग्रमित्यादिमूलवर्णपूर्वकंब्रह्मणेश्रीनृसिंहायनमः। विस्नवेश्रीनृसिंहायनमः
महेश्वरायश्रीनृसिंहेत्यादि। पुरुषायईश्वरायसरस्वत्यैश्रियैगौर्यैप्रकृत्यैविद्यायैॐकारायचतस्रभ्योऽर्धमात्राभ्योन
मः वेदेभ्यःसांगेभ्यःसशाखेभ्योनमः। पंचाग्निभ्योनमः। सप्तमः। द्वा हृतिभ्योनमः। अष्टभ्योलोकपालेभ्योनमः। अष्ट
भ्योवसुभ्योनमः। एकादशरुद्रेभ्योनमः। द्वादशादित्येभ्योनमः। अष्टभ्योग्रहेभ्योनमः। पंचमहाभूतेभ्योनमः। तत्रवि
शेषणस्यबहुवचनत्वेपिविशेष्यस्यनृसिंहस्यएकवचनत्वमेव। कालायनमः। मनवेनमः। मृत्यवेनमः। यमायन
मः। अंतकायनमः। प्राणाय॰। सूर्याय॰। सोमाय॰। विराट्पुरुषाय॰। सर्वस्मै॰। इतिद्वात्रिंशन्नामानि। तद्बहिर्भुवनेश्यावे
ष्ट्ये। तद्बहिर्भूपुरंसंभाव्य। तत्रप्राग्भागेप्रणवसंपुटितान् ककाराद्यष्टौवर्णानुक्त्वा। अष्टभ्योवसुभ्योनमः। इतिसंपू
ज्य। दक्षिणभागेप्रकारादिधकारांतान्तारसंपुटितानुक्त्वा द्वादशादित्येभ्योनम इतिसंपूज्य उत्तरतः सकारादि
सकारांतान्प्रणवसंपुटितानुक्त्वा पश्चिमेनकारादिषकारांन्तान्प्रणवसंपुटितानुक्त्वा विश्वेभ्योदेवेभ्योनम



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इतिसंपूज्य। देवस्य पृष्ठभागेअनंतायनमः। इति पुरोभागेप्रल्हादादिभोक्तेभ्यो नमः। नारदादिभ्यो नमः।सर्वेभ्यो देवे
भ्योनमः। इतिशेषान्येविषक्सेनायनमः। इतिएवंपूजाविधिः॥ ॥अथप्रसंगात् लक्ष्मीनृसिंहमन्त्रा उच्यंते॥ ब्रह्माऋ
षिः।अनुष्टुप्छंदः। लक्ष्मीनृसिंहोदेवता। ॐ ईं हं उग्रंवीरंमहाविष्णुंज्वलंतंसर्वतोमुखम्॥ नृसिंहंभीषणंभद्रंमृत्यु
मृत्युंनमाम्यहं हं ईं ॐ। इतिमन्त्रः।अनुष्टुप्उक्तवदंगानि। ध्यानम्॥ सत्यज्ञानसुखस्वरूपममलंक्षीराब्धिमध्यस्थितं
योगारूढमतिप्रसन्नवदनंभूषासहस्रोज्वलम्॥ त्र्यक्षंचक्रपिनाकसाभयवरान् बिभ्राणमर्कच्छविं छत्रीभूतफणींद्रमिंदु
धवलंलक्ष्मीनृसिंहंभजे॥ लक्ष्मीन्रसिंहमन्त्रांतरम्॥ लक्ष्मीन्रसिंहमन्त्रस्य ब्रह्माऋषिः। अनुष्टुप्छंदः॥ लक्ष्मीनृसिंहो
देवता। ॐ क्ष्रौंबीजम्।स्वाहाशक्तिः।ममभोगमोक्षार्थेविनियोगः॥ ॐ क्ष्रौं नमःहृत्। ॐ भगवते शिरः। ॐ लक्ष्मीनृसिंहा
यशिखा। ॐ महाविष्णवेकवचं। ॐ सकलदुरितनिवारणायनेत्रम्। ॐ हुंफट्स्वाहाअस्त्रम्॥ सत्यंज्ञानमिति ध्यानम्॥
लक्ष्मीनृसिंहमन्त्रांतरस्य। ब्रह्माऋषिः। अतिजगतीछंदः। ॐ लक्ष्मीनृसिंहोदेवता। ॐ क्ष्रौंबीजं। ॐ नमः शक्तिः। मम
भोगमोक्षार्थेविनियोगः। ह्रांहृत्। ह्रींशिरः। इत्याद्यंगानि। नमः सुदर्शनायस्वाहा अस्त्रायफट्। ॐ श्रीं ह्रीं जयजय लक्ष्मी
प्रियायनित्यप्रकटितचेतसेलक्ष्मीश्रितार्थदेहाय ह्रीं ॐ नमः॥ चक्राब्जशंखान्सगदांदधानः। प्रवालरश्मिः कम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



लांकरेण॥ आप्लषयनामसमानवर्णाभूयाद्भक्त्या देवतां नृसिंहः॥ लक्ष्मीनृसिंहमंत्रोनरस्य। संकर्षणभगवान् ऋषिः।
गायत्री छंदः। लक्ष्मीनृसिंहोविष्णुर्देवता। ॐ स्रांहृत्। ॐ स्रींशिरः। इत्याद्यंगानि। ॐनमः सुदर्शनायस्वाहा। अस्त्रायफट्
ॐ स्रौंकैंहंष्टं। रुरकं। व्यूंसः फट् ॐनमः। इतिमन्त्रः॥ विभ्राणश्चक्रशंखौ हरिणिमुसलगदापद्मपाशांश्च दोर्भिः लक्ष्मीम
न्येनगूढ्म्न मदवि वरादर्शसव्यभागोरुसंस्थां। फुल्लद्बंधूकपुष्पद्युतियुतविनतानंदनस्कंधसंस्थश्चिंत्योयुष्माभिरीशो
नरहरिवपुषादीर्घरक्तस्त्रिनेत्रः॥ ॥लक्ष्मीनृसिंहषडक्षरीमन्त्रस्य। संकर्षणभगवान् ऋषिः। गायत्री छंदः। लक्ष्मी
नृसिंहो देवता। ॐ स्रौंबीजं। ॐ फट् शक्तिः। ॐ ऐंहृत्। ॐ क्लींशिरः। ॐ श्रींशिखा। ॐ ह्रींकवचं। ॐ सः नेत्रं। ॐ फट्
अस्त्रं। ॐ नमः सुदर्शनायस्वाहा। अस्त्रम्॥ ऐंक्लींह्रींसः फट्। इतिमन्त्रः। चक्रशंखवराभीतिदधानस्त्विष्टवल्लभः
श्वेतपीतांबरधरश्चिंत्यः पुरुषकेसरी॥ ॥लक्ष्मीनृसिंहाष्टादशाक्षरीमन्त्रस्य। अत्रिर्भगवान् ऋषिः। अतिजगती छं
दः। लक्ष्मीनृसिंहो देवता। स्रौंबीजं। नमः शक्तिः। स्रांहृत्। स्रींशिरः। इत्याद्यंगानि। ॐनमः सुदर्शनायस्वाहा। अस्त्रं॥
ॐ अनंतगरुडस्थितायलक्ष्मीनृसिंहायनमः। शंखचक्रगदाखड्गमुसलान् स्रणिदामनी॥ धनंत्रविभ्रत्सलीवान् रामः
ध्येयोरक्तोनृकेसरी॥ ॥अथलक्ष्मीनृसिंहमन्त्रांतरमुच्यते॥ विधिः प्रजापतिर्ऋषिः। अतिजगती छंदः। लक्ष्मीनृसिं २९२

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हो देवता ॥ ॐ हृत् । क्लीं शिरः । ह्रीं शिखा । श्रीं कवचं । स्त्रौं नेत्रं । लक्ष्मीसिंहाय सर्वात्मने सर्वैश्वर्यप्रदाय नमः । अस्त्रं । ध्यानं ॥
शंखचक्रधरं देवं चतुर्भुजसमन्वितं । प्रसन्नवदनं शांतं भोगासनसमन्वितं । योगपट्टाभिनद्धाहमवज्ञेद् दक्षिणं पदम् ।
दक्षिणोपरि हस्तेन दक्षिणं जानुमाविशन् । सव्यापस्थित हस्तेन लक्ष्मीमालिंग्य मोदयन् । सर्वलक्षणसंपन्नां सर्वाभ
रणभूषितां । चतुर्भुजां प्रसंनां च उर्ध्वाभ्यां पद्मधारिणी । अधराभ्यां मुदं धात्रीमन्योन्यं वीक्ष्यमाणयोः ॥ एवं ध्यात्वा सहृ
स्रं तु जपेन्मन्त्रः समाहितः । सर्वान्कामानवाप्नोति अंते कैवल्यमाप्नुयात् ॥ ॐ क्लीं ह्रीं श्रीं स्त्रौं लक्ष्मीनृसिंहाय सर्वात्म
ने सर्वैश्वर्यप्रदाय नमः ॥ इति मन्त्रः । उक्ताः सर्वे पि मन्त्रा ऐश्वर्यप्रधाना मन्त्राः ॥ ॥ अथ नृसिंहमन्त्रप्रसंगात् अघोरनृ
सिंह मिति नो पि मन्त्रः कल्पांतरोक्तो त्रयोग्यतावशाल्लिख्यते ॥ अघोरब्रह्मणा ऋषा । त्रिष्टुबनुष्टुभौ छंदांसि । अघोरनृ
सिंहो देवते ॥ ॐ ह्रीं स्त्रौं उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखं । स्फुर स्फुर प्रस्फुर प्रस्फुर घोर तर तनुरूप चट चट प्र
चट प्रचट कह कह वम वम वंध वंध घातय घातय हुं फट् नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥ इति मन्त्रः ।
रक्षाप्रधौ यं मन्त्रः ॥ ॥ अथ नृसिंहमन्त्रप्रसंगात् ज्वालानृसिंहमन्त्रोपि कल्पांतरोक्तो त्रयोग्यतावशाल्लिख्यते । संकर्षण
ऋषिः । गायत्री छंदः । ज्वालानृसिंहो देवता । स्त्रौं बीजम् । हुं फट् स्वाहा शक्तिः । स्रां हृत् । स्रीं शिरः । इत्याद्यंगानिः । ध्यानम् ॥

मध्ये चक्रं महास्वंज्वलदनलशिखाग्रस्तवेतालवर्गस्फुर्जद्घोरारिजातप्रतिरसनपदे व्यग्रहस्तः सुहंता॥ ध्येयोस्माभिः स मुद्यद्दिनकरसदृशास्त्रिस्णस्तीक्ष्णदंष्ट्रः संरंभोद्धतरोमाध्वनिरचितमहाघोषघोषो नृसिंह॥ ॐ स्रौं ह्रौं सौः ज्वालाज्वालाजटिलमुखाय ज्वालानृसिंहाय ललललाय ह्लाग ह्ला स्फुट स्फुट स्फोटय स्फोटय मरम टमोटय मोटय लोटय लोटय भ्रम भ्रम भ्रामय भ्रामय बल बल चल चल बद्द बद्द गल गल गलु गलु गर्ज गर्ज राज राज हं स हं सज्वल ज्वल प्रज्वल प्रज्वल जल्य जल्य मथ मथ मर्दय मर्दय हुं हुं हः स सर्वदुष्टग्रहान् शिरोललाटचक्षुर्मुखोष्ठदंतताजिह्वाहनुग्रीवबाहुकरवक्षस्थल उदरनाभिगुह्यगुदपृष्ठकटयूरु जानुजंघागुल्फपादेषु सर्वांगेषु छिंधि छिंधि भिंधि भिंधि त्रासय त्रासय मारय मारय स्रौं सहस्रार हुं फट् स्वाहा॥ इति मन्त्रः॥ ॥ अथ नृसिंहदशाक्षरीमन्त्र उच्यते॥ श्रीनारद ऋषिः। रत्नती छंदः॥ श्रीनृसिंहो देवता। स्रौं बीजं। ॐ नमः शक्तिः। स्वांसीमित्यष्टयं। ॐ नमः सुदर्शनाय स्वाहा अस्त्रं ॐ स्रौं हुं फट् इन्द्रसिंहाय नमः। ध्यानम्॥ सुसितं सिंहवदनं उर्ध्वाभ्यां चक्रशंखिनं। अधस्थिताभ्यां बाहुभ्यां धृतहेतिं भजे हरिम्॥ ॥ अथास्य नृसिंहस कल्पांतरोक्तं चक्रं मत्र योग्यतावशाल्लिख्यते॥ षट्कोणस्थसुदर्शनं वसुदलप्रोल्लासदशाक्षरं। बाह्ये द्वादशवर्णपत्रकमलं तत् सोडशार्णछंदं॥ द्वात्रिंशत्मनुवर्णयत्रकमलं रक्तोल्लसन्मात्टकं मध्योत्थ ध्रुवमुवीबीजवलयं चक्रं चक्रं नृसिंहात्मकम्॥ रामः २६३

अयमर्थः। प्रथमं षट्कोणं विलिख्य। तेषु सुदर्शनं विलिख्य। तत्कर्णिकायां प्रणवं विलिख्य। ग्लौमित्यनेन प्रणवं संवे
ष्ट्य। तन्मध्ये साध्यनामादीन् विलिखेत्। पुनरष्टदलं पद्मं विलिख्य। तेषु वैष्णवाष्टाक्षरम्। तद्बाह्ये द्वादशपत्रं विलिख्य
ॐ नमो भगवते वासुदेवाय। इति विलिखेत्। तद्बहिः षोडशपत्रं विलिख्य। तेषु। ॐ नमो भगवते महासुदर्शनाय हुं
फट्। इति विलिखेत्। तद्बहिर्द्वात्रिंशद्दलं विलिख्य। तेषु नरसिंहानुष्टुभं विलिख्य। तद्बहिर्वृत्तं विलिख्य। मातृकावर्णैर्वे
ष्टयेत् इति॥ ॥अथ नरसिंहमन्त्रप्रसंगान् नरसिंहस्य भूतावेशनकरणादिसामर्थ्यात्तत्प्रसंगात् प्रयोगसारोक्तप्रकारेण द
विधभूतावेशनप्रकारो लिख्यते॥ आवेशबंधनविदारणशूलभेदच्छेदाग्निदाहदमनक्रमणासिवेधाः। हृत्तापनं च द
शदंडविधाः प्रसिद्धाः स्तंत्रेषु मन्त्रविहिता वृषकेतनेन। ॐ नमः पशुपतये ॐ नमो भूताधिपतये ॐ नमो रुद्राय नमः।
ॐ खड्गरावणविहरन्नृत्यनृत्यश्मशानभस्मार्चितशरीराय घंटाकपालमालाधराय। व्याघ्रचर्मपरीधानाय शशांककृत
शेखराय। कृष्णसर्पयज्ञोपवीतिने। ललाटवद्दह्नि वर्तितकपालिने। हन भूतान् त्रासय मंडलमध्ये खड्ग रुद्रांकुशे
न समयं प्रवेशय आवेशय चंडासिधाराधिपति रुद्र आज्ञापयति स्वाहा। भूतनाथस्य मन्त्रोयमाख्यातो मंत्रनायकः। आ
वेशनादिकं कर्म कर्तव्यं तेन मन्त्रिणा॥ ॐ नमश्चंडक्रोधाय रुद्राय तुरु मुरु भूतसमये तिष्ठ स्वाहा॥ तेनामन्त्र्य शिखां बंधा

प्र. सं. तिष्ठंति समये ग्रहाः॥ संस्थाप्यैवं ग्रहग्रस्तं शिखाबंधेन मन्त्रवित्॥ वह्निवायुपुरांतस्थं कृत्वा प्रथमपीडितम्॥ मन्त्रेणा
२९४ मन्त्रितं कृत्वा क्षिपेत्क्षुद्रोदकं मुखे। तेनावेशं प्रयात्याशु ग्रहस्तो यदि ध्रुवम्॥ भीतो मुञ्चति च क्षिप्रं ग्रहो मन्त्रानुभावतः॥
रज्वा तज्जप्रयास्तंभेत रौवावेष्टयेद्ध्रुवम्॥ तेन शूलाभवेद्गीतो निगृहीतश्च जायते॥ पैष्टीं प्रतिकृतिं कृत्वा साध्यमावाह्य
साधकः। क्षणेन दारयेद्रुसः क्षणान्मुञ्चति गुह्यकः। न हस्वति कृतिं कृत्वा वर्ष्मशूलेन भेदयेत्॥ साध्यमावाह्य मन्त्रेण
ततो भीतः पलायते। छेदयेत्प्रतिमां कृत्वा मन्त्रेणानेन मर्मसु। क्षतजं स्रवति क्षिप्रं मुच्यते विग्रहः। सिक्थप्रतिकृतिं वह्नौ
कुंडं तस्थं डिले पित्वा। राजीसहसहोमेन दुष्टो दग्धो भवेद्गृहः। मन्त्रेण ताडयेद्भूस्तं निलैर्वा माषसर्षपैः॥ जप्तया वेत्रय
ष्ट्या वा चक्रिनामुंचति ग्रहः। मन्त्रेणानेन संजप्तैः सिद्धार्थैर्भ्रामयेद्गृहं। कंदमानस्तदान्यस्मिन् वांछिते संयमे द्रुहः। भूम्यां
निर्मायनाद्विंबं ध्यात्वा मन्त्रेण चक्षुषोः। वेधयेत्स्वादिरं कीलं तत्क्षणात्क्षीयते ग्रहः। धूपनस्यांजनालेपस्नानपानानि षड्वि
दुः। कर्माणि कीलशस्त्राणि हन्तापेभूतमुक्तये॥ निर्गुंडी तुलसीपत्रं देवतालीकटुत्रयम्॥ कटुकालाबुकाचेति श्वीकेधू
पो ग्रहापहः। चतुर्जातकमंकोलपंचमूलं निशाभयं। वाकुचीसहितं जस्यं गृहघ्नं स्यात्क्षिवांभसा। काकांडप्रतिसंधौ द्वौ रात्म:
गोमूत्रेणांजयेद्दृशोः। दुष्टग्रहोपशांतिस्यात्सुराणाज्यमथापिवा। अम्लतापटोलानि कटुत्रिफलाग्निमनः। शिलाविलाश २९४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भिगृहधूमत्तोधुचदनसुरदारुभिरुधरेत।गृहाम्लेप।निंबयत्रास्थिलशुनीलेपःसर्वग्रहापहः।चतुष्पथेमातृगृहे
वनेवावीथ्यालयेवासरिनस्तटेवा।निशील्य भूतांबुकपायमूत्रगव्यैर्गृहाखातमभिन्यजंनि।रकाम्बमारंमधुकंवचं।पिशा
चीमपिदेवदालीम्॥पिबेच्चकूष्मांडरसाअंमूत्रेण्यसारिच श्रुर्ग्रहनिग्रहाय।अपमर्यः।कटुकलावुकापेचरे।वाक्रची।कार
पोकरिशी।शिवकटुकाप।सोहुवेलासि।निषण्णास्थि।चोप्यिलैआरकु।मधुकंअनिमधुरम्॥चतुर्जातं।एवंलवंकंलवंक
पत्री।नागपु।विशाला।पेरूपशलै।पिशाची।गंधयासे।पंचमूलि।शितमल्लि।पेरमल्लि।शिवव तलै।रूंडं।कनारि।
शुक॥ ॥अथविसुपंजरविमसुच्यते॥ब्रह्मव्रहस्पतीऋषी।अनुष्टुप्त्रिष्टुभौछंदसी।विश्वरूपविसुर्देवता।ॐबी
जंमम:शक्तिः।ॐस्थानेहृषीकेशलवप्रकीर्त्यासहहृत् नमोजगत्त्रहृष्यत्यनुरज्जतेचसहस्रारशिरः।नारारसांसि
भीतानिदिशोद्रवतीहुंफट्शिखा।येणासर्वेनमस्यसिद्धसंघाःयॐकवचम्॥एतैःसपस्तैर॰स्त्रं।मूलमन्त्रः।ॐॐस्था
नेहृषीकेशनवप्रकीर्त्यासहृनमोजगत्प्रहृष्यत्यनुरज्जतेच।स्मारनारारसांसिभीतानिदिशोद्रवंतीहुंफट्यणासर्वेन
मस्यंतिचसिद्धसंघाःयॐरतिमन्त्रः।रसाप्रधानोयंमन्त्रः।अस्यमंत्रस्यजपसमयेध्यानमुच्यते॥अर्केंदुवन्हिनिल
पस्फुरितत्रिमन्त्रशक्तिप्रबंधमहसःपरमस्यविष्णोः।पादारविंदगलितामृतसिन्धुगाप्रंसाध्यंस्मरेज्जपविधामपि

For Private And Personal

प्र॰सं॰ साधकेशः। विष्णोः सान्निध्यलब्धोल्लसितबलचलद्धस्तदंडोद्यतास्त्रैर्भ्यक्ताद्यैर्भीषणास्येक्षणचरणवचोहासहुंका
२९५ र घोरैः। उत्क्षिप्तासिप्रकृत्तस्फुटितविदलितासंचूर्णितध्वस्तशांतान् ध्यायेद्वेतालभूतग्रहदुरितपिशाचारिनागादिदे
मान् एतद्ग्रह वेतालपीडादौ ध्येयः। अथ विष्णुपंजरपूजाविधिः प्रथमं वैष्णवपीठं संपूज्य तस्मिन् समावाह्य तस्मिन् वि
श्वरूपमूर्तिमेवं ध्यायेत्। अग्नीषोमात्ममरिगदाशार्ङ्गखड्गैः सशंखैरुग्रहलहुंहलमुसलशूलैः सदंडैः सकुंतैः। शक्त्या
पाशांकुशाकुलिशटंकाग्निभिश्चार्कवह्निचोलकदक्षाक्षिकरसरसिजं तप्तकार्तस्वराभं विश्वाकाशप्रकाशप्रवितनम
युताऽरिसैनीकाशमुषद्दाहग्रव्यग्रबाणान्धुधानिकरधरं विश्वरूपं नमामि॥ अस्य विश्वरूपस्य मंत्रः। ॐ नमो भगवते
महाविष्णवे वासुदेवाय विश्वरूपाय शार्ङ्गिणं वमेप्रभविष्णवे नमः। अनेन रसादौ प्रयोजयेत्। एवं विश्वरूपं ध्यात्वा प
रिवारैः समर्चयेत् प्रथमं मूलमन्त्रेणासमर्च्य। पुनः वासुदेवाय संकर्षणाय प्रद्युम्नाय अनिरुद्धाय। इति महादिक्षु
शांत्यै श्रियै सरस्वत्यै रत्यै इति कोणेषु समर्चनीयाः। पुनः चक्रचचक्रांककिरीटमौलिं सशंखचक्रं सगदं सशार्ङ्गं। रक्तांब
रं रक्ततनुं करालदंष्ट्राननं प्राग्दलके वर्णीत। एवं चक्रमूर्तिं ध्यात्वा प्राग्दले अनेन वक्ष्यमाणेन चक्रमन्त्रेण समर्चयेत्। राम:
ॐ विलवे चक्रिणे नमः। ॐ ॐ स्थाने हृषीकेश तव प्रकीर्त्या सहृन्नमो जगत्प्रहृष्यत्यनुरज्यते च। रक्षांसि भी २९५

तानि दिशो द्रवंति हुं फट् स्वाहा सर्वे नमस्यंति च सिद्धसंघाः। प ॐ नमो भगवते वासुदेवाय विष्णवे चक्रमूर्तेमांरक्ष रक्ष चक्र
मूर्तिधराय चक्रमूर्तिधरसेनाधिपतये महाचक्राय हुं फट् इ। ति पुनः पूज्या गदा गदांकितमौलिः सगदा सचक्रशंखधनुः
पीतांबरानुलेपा पीता कुन्दाभया भ्यर्चयेत् दले एवं गदामूर्तिं ध्यात्वा अनेन गदामन्त्रेण समर्चयेत् दक्षिणे दले ॐ विष्णुवे
गदिनेनमः ॐ ॐ स्थाने हृषीकेश तव प्रकीर्त्या सह नमो मर्चयेत् दक्षिणे दले ॐ विष्णवे गदिने नमः ॐ ॐ स्थाने हृषीके
श तव प्रकीर्त्या सह नमो जगत्प्रहृष्यत्यनुरज्जते च। रक्षांसि भीतानि दिशो द्रवंति हुं फट् स्वाहा सर्वे नमस्यंति च सि
द्धसंघाः य ॐ ॐ नमो भगवते वासुदेवाय विष्णवे गदिमूर्तेमांरक्ष रक्ष गदिमूर्तिधराय गदिमूर्तिधरसेनाधिपतये महागदा
यै हुं फट् इति पुनः शार्ङ्गं शार्ङ्गांकितकं शार्ङ्गं शार्ङ्गारि दरगदाहस्तं रक्तांशुकानुलेपनमाल्यादीं वारुणे यजेत् मन्त्रे एवं ध्यात्वा
शार्ङ्गमूर्तिमनेन मन्त्रेण यजेत् पश्चिमदले। ॐ विष्णवे शार्ङ्गिणे नमः ॐ ॐ स्थाने॰ त्यां सह नमो जगत्प्र॰ च। रक्षांसि॰ ति हुं
फट् स्वाहा सर्वे॰ घाः य ॐ ॐ नमो भग॰ वाय विष्णवे शार्ङ्गमूर्तेमांरक्ष रक्ष शार्ङ्गमूर्तिधराय शार्ङ्गमूर्तिधरसेनाधिपतये महा
शार्ङ्गाय हुं फट् इति पुनः खड्गं सखड्गं शिरसं खड्गारिगदा धनुष्कर धूम्रम्। विकृतांबरानुलेपस्रजं समभ्यर्चयेदुदक्यन्त्रे
एवं ध्यात्वा अनेन खड्गमन्त्रेण उत्तरदले समर्चयेत् ॐ विष्णवे खड्गिने नमः। ॐ ॐ स्थाने॰ त्यां सह इत्यादि य ॐ मित्यंतं। ॐ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. नोभगवतेवासुदेवायखड्गमूर्तेमांरसरसखड्गमूर्तिधरायखड्गमूर्तिधरसेनाधिपतयेमहाखड्गायहुंफट्इतिपुनः शंखं
२९६ सशंखशिरंसशंखारिगदाचनुष्करंसुसितं।सितवसनमाल्यभूषंयजेन्महानादमग्निसंस्थदले॥एवंध्यात्वाशंखमूर्तिमा
ग्नेयदलेअनेनमन्त्रेणसमर्चयेत् ॐविस्तवेहृषीकेशायनमः। ॐॐस्थानेहृषीकेशतवप्रकीर्त्येत्यादिय ॐइत्यंते ॐनमो
भगवतेवासुदेवायविस्तवेशंखमूर्तेमांरसरसशंखमूर्तिधरायशंखमूर्तिधरसेनाधिपतयेमहापांचजन्यायस्वाहा इतिम
न्त्रःपुनः हलमूर्तिमपि हलायुधधरंचशंखमूर्तेरुक्तचिन्होपेतंचतुर्भुजंचध्यात्वानिर्ऋतिदलेअनेनमन्त्रेण हलमूर्तिसं
यजेत् ॐविस्तवेहृषीकेशायनमः। ॐॐस्थानेहृषीकेशइति ॐमित्यंते ॐनमोभगवतेवासुदेवायविस्तवेहलमूर्ते
मांरसरसहलमूर्तिधरायहलमूर्तिधरसेनाधिपतयेमहाहलायस्वाहा इतिपुनःमुसलमूर्तिमपिमुसलायुधधरंचहलमू
र्तेरुक्तचिन्होपेतंचतुर्भुजंचध्यात्वावायव्यदलेअनेनमन्त्रेणसमर्चयेत्॥ ॐवंविस्तवेहृषीकेशायनमः। ॐॐस्थाने
हृषीकेशेत्यादिय ॐइत्यंते ॐनमोभगवतेवासुदेवायविस्तवेमुसलमूर्तेमांरसरसमुसलमूर्तिधरायमुसलमूर्तिधर
सेनाधिपतयेमहामुसलायस्वाहा इतिपुनः शूलमूर्तिमपिशूलधरंचमुसलमूर्तेरुक्तचिन्होपेतंचतुर्भुजंचध्यात्वा एमः
अनेनमन्त्रेणऐशान्येदलेसमर्चयेत्। ॐविस्तवेहृषीकेशायनमः। ॐॐस्थानेहृषीकेशेत्यादिय ॐमित्यंते ॐनमोभ २९६

For Private And Personal

भगवते वासुदेवाय विष्वक्सेनाय त्रिशूलमूर्तेमां रक्ष रक्ष त्रिशूलमूर्ति धरायत्रिशूलमूर्तिधरसेनाधिपतयेमहात्रिशूलाय
स्वाहा इति पुनः दंडपद्मायुधावांतराष्ट दलेषुक्रमेणसमर्चयेत् तदुच्यते ॥ ॐ विष्वक्सेन जनार्दनाय नमः॥ ॐ स्वाने हृ
षीकेशेत्यादिय ॐ मित्यंतं ॐ नमो भगवते वासुदेवायविष्वक्सेन दंडमूर्तेमांरक्षरक्ष दंडमूर्तिधरायदंडमूर्तिधरसेनाधिप
तये महादंडायनमः। इतिप्रथमेवांतर दलेसमर्चयेत् पुनः ॐ विष्वक्सेन जनार्दनाय नमः। ॐ ॐ स्वाने हृषीकेशेत्यादि
य ॐ मित्यंतं ॐ नमो भगवते वासुदेवाय य विष्वक्सेन कुंतमूर्तेमांरक्षरक्ष कुंतमूर्ति धरायकुंतमूर्तिधरसेनाधिपतयेमहा
कुंतायनमः। इति द्वितीयावांतर दलेपुनः ॐ विष्वक्सेन जनार्दनायनमः॥ ॐ ॐ स्वाने हृषीकेशेत्यादिय ॐ इत्यंतं ॐ नमो
भगवते वासुदेवायविष्वक्सेन शक्तिमूर्तेमांरक्षरक्ष शक्तिमूर्तिधरायशक्तिमूर्तिधरसेनाधिपतयेमहाशक्तयेनमः। इति
तृतीयेवांतर दलेपुनः ॐ विष्वक्सेन जनार्दनाय। ॐ ॐ स्वाने हृषीकेशेत्यादिय ॐ मित्यंतं। ॐ नमो भगवते वासुदेवायवि
ष्वक्सेन पाशमूर्तेमांरक्षरक्ष पाशमूर्तिधरायपाशमूर्तिधरसेनाधिपतयेमहापाशायनमः। इति चतुर्थेवांतराले पुनः॥
ॐ विष्वक्सेन जनार्दनाय नमः। ॐ ॐ स्वाने हृषीकेशेत्यादिय ॐ मित्यंतं। ॐ नमो भगवते वासुदेवायविष्वक्सेन अंकुशमू
र्तेमांरक्षरक्ष अंकुशमूर्तिधराय अंकुशमूर्तिधरसेनाधिपतयेमहांकुशायनमः। इति पंचमेवांतर दलेषु। पुनः ॐ वि

 स्वेजनार्दनायनमः। ॐॐस्थानेहृषीकेशेत्यादिय ॐ नमोभगवतेवासुदेवायविस्वेकुलिशमूर्तेमांरसरसकुलिश
 मूर्तिधरायकुलिशमूर्तिधरसेनाधिपतयेमहाकुलिशायनमः। इतिषष्ठेवांतरदले। पुनः। ॐविस्वेजनार्दनायनमः॥
ॐॐस्थानेहृषीकेशेत्यादिय ॐ मित्यंतं। ॐनमोभगवतेवासुदेवायविस्वेपरशुमूर्तेमांरसरसपरशुमूर्तिधरायप
रशुमूर्तिधरसेनाधिपतयेमहापरशवेनमः। इतिसप्तमेवांतरदले॥ पुनः। ॐविसवेजनार्दनायनमः। ॐॐस्थानेहृषी
केशेत्यादिय ओमित्यंतं ॐनमोभगवतेवासुदेवायविसवेशतमुखवह्नि मूर्तेमांरसरसशतमुखवन्हिमूर्तिधरायशत
मुखवन्हिमूर्तिधरसेनाधिपतयेमहाशतमुखवन्हयेनमः। इत्यादिअष्टमेवांतरदलेसमर्चयेत्। एतास्तदंजायष्ट
मूर्तयोरक्ताभाश्चतुर्भुजाः। स्वास्वायुधधराश्चध्येयाः। पुनः। चक्रासिबाणगदादरचर्मशार्ङ्गशक्त्याख्यकांदधतंदंष्ट्रांग्रल
म्नवसुधंसजलांबुवाहं। घोरत्विषंमहावराहमधस्ताध्यात्वाअनेनमन्त्रेणसमर्चयेत्। ॐविस्वेक्रोडरूपिणेनमः।
ॐॐस्थानेहृषीकेशेत्यादिय ॐ इत्यंतं। ॐनमोभगवतेवसुदेवायविस्वेपोत्रोद्धृतधरायवराहमूर्तेमांस्यस्तव
राहमूर्तिधरायवराहमूर्तिधरसेनाधिपतयेमहावराहायनमः। इति। पुनः। अर्कानलोज्वलमुखंनयनैस्त्रिभिश्चव 
न्हिन्यमंतमपिधूमसटाकलापं। शुक्राभभूषमरिशांखगदासिबाहुंरसिंहंखस्थलेध्यात्वाअनेनवक्ष्यमाणेनमंत्रे 

णसमर्चयेत्। ॐ विष्वक्सेनसिंहाय नमः। ॐॐ स्थाने हृषीकेशेत्यादि ॐ इत्यंतं। ॐ नमो भगवते वासुदेवाय विष्वक्
सेन दलित रिपुविग्रहाय नरसिंहमूर्ते मां रक्ष रक्ष नरसिंहमूर्तिधराय नरसिंहमूर्तिधर सेनाधिपतये महानरसिंहाय नमः
इति। पुनः नार्स्ये। समग्रवलमुग्रतं नु स्वपक्षविक्षेपविक्षत विलक्षविपक्षपक्षं गजाग्रतुंडमंडजदंडनाथं च पक्षिराजमग्रे
ध्यात्वा। अनेन वक्ष्यमाणे नमंत्रेण अग्रे समर्चयेत्। ॐ विष्वक्सेनपक्षिराजाय नमः। ॐॐ स्थाने हृषीकेशेत्यादि ॐ मित्यं
तं। ॐ नमो भगवते वासुदेवाय विष्वक्सेनपक्षिराजाय गरुत्मते हरिवाहनाय प्राणात्मने गरुडमूर्ते मां रक्ष रक्ष गरुडमूर्तिधरा
य गरुडमूर्तिधरसेनाधिपतये महागरुडाय नमः। इत्यग्रे समर्चयेत्। न्यासस्तु क्रियते चेत् एतावत्स्वयं तमुक्तैर्मंत्रैरुक्तेष्वव
तत्स्थानेषु साधकशरीरे न्यसेत्। तस्मादतीव रक्षाकरं भवति। पुनः॥ केशवाय। नारायणाय। माधवाय। गोविंदाय। विष्ण
वे। मधुसूदनाय॥ त्रिविक्रमाय। वामनाय। श्रीधराय॥ हृषीकेशाय। पद्मनाभाय। दामोदराय। वासुदेवाय। संकर्षणाय।
प्रद्युम्नाय। अनिरुद्धाय। एतेन मूर्तिषोडशकेन बहिरर्चयेत्। पुनस्तद्बहिरिंद्रादिभिः। तद्बहिर्वज्रादिभिरर्चयेत्। एवं वि
ष्णुपंजरपूजाविधिरुक्तः। पुनरनेन पूजाविधानेन सिकताप्रतिष्ठां वा। उपलप्रतिष्ठां वा चरुप्रतिष्ठां वा कुर्यात्। वास्तो वा
ग्रामे वा पुरे वा राष्ट्रे वा तत्सर्वं उच्यते। आग्रे येव क्ष्यमाणेन विधानेन समाहितः। सिकतोपलचर्वादीन माधेमेदमत्ते

क्रियाः। वास्तौ पुरे वा ग्रामे वा विद्ध्यादिषयेषिवा। मध्ये च षोडशांशानेखनेद्दशदशावटानित्यादि ग्रंथानामयम ६:॥ पुर
ग्रामादीनाम ष्ट दिक्षु अष्टावांतरदिक्षु च मध्ये तसुरश्चाष्टादशकुंडानिनिखनेत्। हस्तप्रमाणेन कुंडस्यागाधं च परितः अ
मं च। एवं चतुरश्ररूपेण विखनेत्। अन्यस्मादन्यस्मात्कुंडात्। अन्यदन्यत्कुंडं प्रतिगंतुं मध्यमार्गांश्च परिकल्पयेत्। पुनरे
तानि कुंडानि गोमयेनोल्लिप्य। पुनः पाषाणं वा सिकतां वा चरुं वा स्थापनीय। द्रव्यं शुष्ककमलपत्रेषु विंशतिषु। एतत्स्थापनी
य द्रव्यं विभज्य संपाद्य। पुनराचार्यो मध्यगतकुंडस्य पुरतः उपविश्य। तस्मिन्। कुंडे वैष्णवपीठं संपूज्य तस्मिन् वक्ष्य
माणविष्णुपंजरयंत्रं मनसा लिखित्वा संस्थाप्य तस्मिन् विश्वरूपं बुध्या एकं कमलपत्रस्थं सिकतादि स्थापयेत्। पुनश्च
तुर्दिक्स्थेषु कुंडेष्वपि अन्यत्कमलपत्रमपि सिकतादि। चक्रगदाशार्ङ्गखड्गबुध्याक्रमेण च तस्थ्वपि दिक्षु स्थापयेत्
पुनः कोणचतुष्टयस्थितेष्वपि कुंडेषु कमलपत्रस्थं सिकतादि। शंखहलमुसलशूलबुध्या क्रमेण चतुर्ष्वपि कोणेषु
स्थापयेत्। पुनः अवांतराष्टदिक्स्थेष्वपि कुंडेषु कमलपत्रस्थं सिकतादि। दंडकुंतशक्तिपाशांकुशकुलिशपरशुश
तमुखवन्हिबुध्या क्रमेण स्थापयेत् पुनः अधश्च ऊर्ध्वं च सूकरबुध्या नरहरिबुध्या च क्रमेण कमलपत्रस्थं सिकता राम:
दिस्थापयेत्। पुनर्मध्यकुंडस्य पुरतोपकुंडे तस्मिन् गरुडबुध्या कमलपत्रस्थं सिकतादि स्थापयेत् पुनः सर्वत्र सम २९८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्थलीकृत्य मुपलिप्य। तन्मध्यकुंडोपरि तंडुलान् प्रविकीर्य। तस्मिंस्तंडुले स्वर्णपट्टे विष्णुपंजरयंत्रं विलिख्य निधाय। त
त्पुरतः प्रत्यङ्मुखो भूत्वा तस्मिन् यंत्रे पूर्वोक्तपूजाविधानेन संपूज्य। पुनस्तत्र हृदेऽपि तथैव वा मूलमन्त्रैरेव वा समभ्यर्च्य नै
वेद्यं कृत्वा। पुनः सर्पिःसिक्तेनान्नेन मूलमन्त्रेण अष्टोत्तरशतसंख्यं हुत्वा। पुनः अश्वत्थवटोदुंबरप्लक्षाणां समिधः क्रमे
णचकारादिभिर्मन्त्रैरेकैकेन क्रमेण एकैकां समिधमष्टोत्तरशतसंख्यं हुनेत्। पुनः शिखादिभिश्चतुर्भिर्मन्त्रैश्चदंजादिभिरष्ट
भिर्मन्त्रैश्च संभूय द्वादशभिर्मन्त्रैरेकैकेस्तिलं च सर्षपं चाष्ट पृथक् पृथक् षोडशसंख्यं हुनेत्। पुनश्चकादिमूर्तीनां तत्तन्न्यर
कीकृतान्नेन तत्तन्मन्त्रैर्बलिं दद्यात्त्रिशस्त्रिशः। पुनरुद्वास्य पूजां परिसमाप्य तद्यंत्रमपि तत्रैव निखन्यपिधाय च। गुरुं द
क्षिणाद्यैस्तोष्य ब्राह्मणान्भोजयेच्च। एवं कृते फलमाह। तत्रोपसर्गा नश्यंति नरनारीमहीक्षिताः। ग्रहक्षुद्रपिशाचाद्या नेक्षंते
तां दिशं भयात्। अश्मपातादिकायेवं भयान्नश्यंते चिरात्। सस्यवृद्धिर्गोसमृद्धिश्च प्रजावृद्धिश्च जायते। धनधान्यसमृद्धिश्च
वर्धते तत्कुलं क्रमात्। दारिद्र्यरोगनिर्मुक्तः सुखमाप्नुत संप्लवं। रक्षोभिरसुरैर्बलैरसुरैश्च सर्वैर्दैत्यैः समुद्यतमहास्त्रकैरेः
परीतः। विष्णोस्तु पंजरमिदं प्रभजंतमव्यात्तास्तान्महेंद्रमपरत्र न रेकथाका॥ ॥अथ विष्णुपंजरयंत्रं लिख्यते। विष्णुं
लिखेन्मध्यगशक्तिविंदौ कपोलयोः सिंहवराहवीजे। तद्दिग्स्वरूपा हृयमन्त्रवीतं। प्रवेष्टयेत्षोडशवर्णकेन। यंत्रस्य बी

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र.सं. जेषु चतुर्षु पूर्वं प्राग्दक्षिणप्रत्यगुदग्गतेषु॥ विद्वान् स चक्रं च गदां च शार्ङ्गं खड्गं च मंत्रैः सहितं विलिख्यात्। शंखहलमुस
२९९ लशूलान्यग्न्याद्यष्टिषु थाष्टवीजेषु। दंडकं तथा शक्तिं पाशांकुशकुलिशपरशुशतमुखवह्नीन्। सप्रणवहृदयभगवन्वि
सुस्वाख्यानमूर्तिधरयुक्ताः। सेनापतिसहितानिजमंत्रास्तान्मंत्रयोत्र लिखितव्याः। सन्निष्ठु भावन्हि ग्रहेण पूर्वं स्वानुष्टुभेदो
निलये न चापि। गायत्रिमंत्रोल्लसितेन भूयः संवेष्टयेदर्कनिकेतनेन। अनुले। मविलोमगैश्च वर्णैरभिवीतं वसुधापुरद्वये
न। नलिनं पुनरष्टयुग्मपत्रं प्रविदध्याद्यमूर्तिमन्त्रयुक्तम्। तद्बहिर्मंडलं सर्वलक्षणैरभिलसितम्। तस्मिन्नावाह्य वि
धिवद्विश्वरूपं हरिं यजेत्। इति। अस्यार्थः प्रथमं स्वेष्टमानेन वृत्तं विलिख्य। तन्मध्ये भुवनेश्वरीबीजं विलिख्य। तन्मध्ये र
तं विलिख्य। तन्मध्ये विसुशब्दलक्षितप्रथमस्वकारमकारं विलिख्य। तन्मध्ये रत्नं विलिख्य। तन्मध्ये षोडशबाहुसहि
तम्। विसुमूर्त्याकारं विलिख्य। तस्योदरे साध्यनाम विलिख्य। तस्य हस्तेषु षोडशसु दक्षिणाधोहस्तमारभ्य वामाधोहस्ता
वसानं क्रमेण। चक्रगदाशार्ङ्गखड्गशंखहलमुसलशूलदंडकुंतशक्तिपाशांकुशकुलिशपरशुशतमुखवह्न्यायुधस्व
रूपलेखनपूर्वकं वक्ष्यमाणषोडशाक्षरमन्त्रस्य। प्रथमनवमपंचमदशमद्वितीयएकादशषष्ठद्वादशतृतीयत्रयोदश राम:
सप्तमचतुर्दशचतुर्थपंचदशाष्टमषोडशाक्षराणि विलिखेत्। ॐ नमो भगवते वासुदेवाय हुं फट् स्वाहा इति षोडशाक्षरीम २९९

For Private And Personal

न्म। तत्र च कायायुधध्यानषोडशहस्तानां क्रमस्क। दक्षिणाधो हस्तमारभ्य वामाधोहस्तावसानं क्रमेण प्रपंचासारानु
ध्यानपद्धतीकारमतनम्॥ विवरणकारमतं तु। दक्षिणाधोहस्तमारभ्य पंचमपंचमे हस्ते। चक्रगदाशार्ङ्गखड्गचतुष्टयं। द
क्षिणाधस्तृतीयहस्तमारभ्य पंचमे पंचमे। शंखहलमुसलभूलचतुष्टयं। दक्षिणाधोद्वितीयहस्तमारभ्य एकैकांतरित
हस्तेषु। दंष्ट्राद्यष्टकम्। इत्येवमायुधधारणक्रमः। पुनर्भुवने शीमध्यस्थितस्य प्रथमस्वरस्य अकारस्य कपोलयोः न्र
सिंहबीजं क्ष्रौं। वराहबीजं हूं मिति च द्वयं विलिखेत्। पुनः कर्णिकामध्यस्थितायाः भुवनेश्याः कापोलयोः गरुडचक्र
बीजद्वयं विलिखेत्। रं इति चक्रबीजं। क्ष्रौंमिति गरुडबीजं। पुनः कर्णिकावृत्ताद्बहिर्वृत्तं विलिख्य। तस्मिन्वृत्ते यथा पूर्वव्य
त्तविलिखितभुवनेश्वरीबीजमावेष्टितं भवेत्तथा। विश्वरूपमन्त्रेण संवेष्टयेत्। ॐ नमो भगवते महाविष्णवे वासुदेवाय
विश्वरूपशरणं भव मे प्रभविष्णवे नमः। इति विश्वरूपमन्त्रः। चतुस्त्रिंशद्वर्णाः। पुनस्तद्बहिस्तृतीयवृत्ते। षोडशार्णेन
वेष्टयेत्। ॐ नमो भगवते वासुदेवाय हुं फट् स्वाहा। इति षोडशाक्षरमन्त्रः। पुनश्चतुर्थे वृत्ते प्रतिलोमसप्तव्याहृति
भिर्वेष्टयेत्। पुनस्तद्बहिः पूर्वपश्चिमतो दक्षिणोत्तरतुश्च षट्कोणद्वितयरूपद्वादशकोणं विलिख्य तेषु कोणेषु। ईं इ
ति शांतिप्रणवं विलिख्य। पूर्वादिक्रमेण द्वादशकोणानां कपोलेषु। प्रतिलोमगायत्र्यक्षराणि द्वंद्वशो विलिख्य तद्बहि

प्र·सं· वृत्तद्वयं विलिख्यानयोर्मध्ये षोडशादिषु विलिखितैर्भुवनेशीबीजैरेकैकान्तरितसंबंधैः संवेष्ट्य। पुनस्तेषु बीजेषु। प्राग
३०० दक्षिणप्रत्यगुदग्दलेषु क्रमेण चक्रगदाशार्ङ्गखड्गाकारेण मूर्तिं लिखित्वा तन्मस्तकेषु स्वस्वमन्त्रांश्च पूर्वोक्तक्रमेण पूर्वो
क्तषोडशाक्षरवर्णैकैकपूर्वकं विलिखेत्। ॐ नमो भगवते वासुदेवाय विसवेचक्रमूर्ते इत्यादि पूर्वं पूजाविधाने प्रोक्त
श्चक्रमन्त्रः। ॐ नमो भगवते वासुदेवाय विसवेगदिमूर्ते इत्यादिर्गदामन्त्रः॥ अवशिष्टायुधद्वयमन्त्रोप्येवमुक्तरीत्या
पूजाविधानोक्तप्रकारेण लेखनीयः। पुनः आग्नेयादिकोणेषु भुवनेशीबीजेषु शंखहलमुसलशूलाकारेण मूर्तिं विलि
ख्य। तन्मस्तकेषु स्वस्वमन्त्रांश्च पूर्वोक्तक्रमेण पूर्वोक्तषोडशाक्षरीमन्त्रस्य पंचमादिवर्णैकैकपूर्वकान्लिखेत्। ॐ नमो
भगवते वासुदेवाय विसवेशंखमूर्ते इत्यादि पूर्वं पूजाविधाने प्रोक्ताः शंखादिमन्त्राः। पुनरवान्तराष्टदिग्गतभुवनेशी
बीजेष्वष्टसु। दंडकुंतशक्तिपाशांकुशकुलिशपरशुशरनमुखबन्धयायुधरूपाणि विलिख्य। तन्मस्तकेषु स्वस्वमन्त्रांश्च पू
र्वोक्तषोडशाक्षरीमन्त्रस्य पूर्वोक्तक्रमेण नवमादिवर्णैकैकपूर्वकान् विलिखेत्। ॐ नमो भगवते इत्यादि पूर्वं पूजावि
धाने प्रोक्ता दंडकुंतादिमन्त्राः। पुनः षोडशभुवनेशीबीजवेष्टनस्य पूर्वापरभागयोः। नृसिंहवराहमूर्ती अपि लिखि रामः
त्वा। तन्मस्तकयोर्द्वयमपि पूर्वं पूजाविधाने प्रोक्तं विलिख्य। शक्तिवेष्टनबाह्ये नृसिंहस्याग्रे गरुडचक्रमूर्तिद्वयं विलि २००

ख्य। तन्मस्तकेषु तन्मन्त्रद्वयं च पूर्ववल्लिखेत्। सर्वासामायुधमूर्तीनां पूजाविधानोक्तध्यानप्रकारेण लेखनप्रकारः। पुनस्तद्बहिस्त्रिकोणं विलिख्य। तन्मध्ये जातवेदोमन्त्रः परितो विलिख्य। तद्बहिः सोममण्डलात्मकं वृत्तं विलिख्य। तस्मिन् त्र्यंबकमन्त्रेण संवेष्ट्य। तद्बहिः सूर्यमण्डलात्मकं वृत्तं विलिख्य। तस्मिन् गायत्र्यक्षराणि लिखित्वा॥ पुनस्तद्बहिर्वृत्तद्वयं विलिख्य। प्रथमे अनुलोममातृकाभिर्द्वितीये प्रतिलोममातृकाभिश्च वेष्टयेत्। पुनश्चतुरश्रद्वयं पुटित्वा विलिख्य। तस्य पूर्वादिचतुर्षु कोणेषु नृसिंहबीजं क्ष्रौमिति। आग्नेयादिकोणेषु रस्म्रौ ऊमिति चिंतामणिबीजं च विलिखेत्। तद्बहिः षोडशदलं पद्मं विलिख्य। तेषु पूर्वं लिखितक्रमेण चक्राद्यायुधमूर्तिषोडशकमालिख्य। तन्मस्तकेषु पूर्वोक्तक्रमेण पूर्वोक्तषोडशवर्णैकैकपूर्वकं चक्रादिमन्त्रांश्च विलिखेत्। पुनः पूर्वोक्तस्थानेषु नृसिंहवराहगरुडचक्रमूर्तिचतुष्टयं विलिख्य तन्मस्तकेषु तन्मन्त्रांश्च विलिखेत्। पूर्वोक्तशक्तिबीजगतान्यायुधानि समन्त्रकाणि तत्तदायुधाकाराणि लिखेद्वा। केवलं तन्मन्त्रानेव लिखेद्वा। षोडशदलस्थान्यायुधानि तु। स्वमूर्तिसहितानि ललाटलिखितमन्त्रकाण्येव लिखेदिति विशेषः। इति यंत्रलेखनप्रकारो विवरणे च अनुष्ठानपद्धत्यां च आलोच्य प्रदर्शितम्॥ ॥ अथ विष्णुपंजरकल्पनाजपप्रकारः। प्रथमं पूर्वोक्तवन्मूलमन्त्रस्य अंगऋष्यादीन् कृत्वा ध्यात्वा वक्ष्यमाणमन्त्रान् जपेत्॥ प्रथमं जातवेदोमन्त्रमेकवारं जप्त्वा

प्र॰सं॰ दनंतरंन्यंबकं ततो ब्रह्मगायत्रीत तस्थाने हृषीकेश इत्यादि गीतात्रिष्टुप्। ततः पूर्वोक्तबिम्बरूपमन्त्रः। ततः पूर्वोक्तषो
२०१ डशाक्षरीमंत्रः। एतान्क्रमेण जपेत्। ततः। एतानि कउवाच भगवन्नित्यादि तन्नि बोधम हीपते। इत्यंतं वक्ष्यमाणं स्तोत्रं स्तो
त्रं जप्त्वा। पुनः पूर्ववज्जातवेदोमन्त्रादि षण्मंत्रान् त्रिवारं जपेत्। पुनः हृमिति वराहबीजांते क्ष्रौमिति नृसिंहबीजमुच्चार्यं।
तदंते सकाररेफऔंकारबि— रूपं क्ष्रौमिति गरुडबीजमुक्त्वा। तदंते रमिति सबिंदुकरेफस्वरूपं चक्रबीजं। तदंते प्रणव
भुवनेशी बीजद्वयं। तदंते पूर्वोक्तषोडशाक्षरीवर्णैकैकं। तदंते वक्ष्यमाणान् मन्त्रान् क्रमेण जपेत्। विष्णुः प्राच्यां स्थितश्च
क्री विष्णवे नमः। पुनरपि वराहबीजादि षोडशाक्षरद्वितीयवर्णपर्यंतं जप्त्वा विष्णुर्दक्षिणतोगदी विष्णवे नमः। इति जप्त्वा पुन
रपि पूर्ववत्। प्रतीच्यां शार्ङ्गधन्वि विष्णवे नमः। विष्णुः खड्गी ममोत्तरे विष्णवे नमः। इति जप्त्वा पुनः हृषीकेशो विकोणेषु। हृषी
केशाय नमः। इति पूर्ववत् बीजजपांते विकोणचतुष्टये हृषीकेशमन्त्रमेवं जप्त्वा। पूर्ववद्बीजांते। तच्छिद्रेषु जनार्दनः। ज
नार्दनाय नम इति तच्छिद्राष्टके अष्टवारं जनार्दनमन्त्रः पूर्वोक्तबीजपुरःसरं जपेत्। एवं कृते षोडशाक्षरीमन्त्रस्य एकैकवर्ण
विनियोगेन एकावृत्तिर्भवति। पुनः षोडशाक्षरमन्त्रवर्णरहितमीतरबीजपुरःसरं षोडशाक्षरीवर्णस्थाने वक्ष्यमाणतत्त रा॰भः
द्बीजपुरःसरं च। क्रोडरूपी हरिर्भूमौ महावराहाय नम इति जपेत्। पुनरप्युक्तबीजांते क्ष्रौं नरसिंहो अंबरे महानरसिं २०१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हायनः। उक्तबीजांते स्रौं विष्णुरग्रे स्थितो गरुडः महागरुडाय नमः। उक्तमन्त्रांते रविष्णुरग्रे स्थितं चक्रं महाचक्राय नमः। इत्येतान् चक्रादिविंशतिमन्त्रान् त्रिवारं जप्त्वा। पुनः षोडशाक्षरमन्त्रं विश्वरूपमन्त्रं च स्थाने हृषीकेशेत्यादि गीतात्रिष्टुप्मन्त्रं च गायत्रीं चत्र्यंबकमन्त्रं च जातवेदोमन्त्रं च त्रिवारमावर्त्य पुनः। सुरांतमेवंतं चक्रं भ्रमयेतत्सुदर्शनं। इत्यादि विष्णुचक्रं रथाहताः इत्यंतं वक्ष्यमाणं स्तोत्रं सकृज्जप्त्वा। पुनः पूर्वोक्तषोडशाक्षरीमन्त्रं च विश्वरूपमन्त्रं च गीतात्रिष्टुप्मन्त्रं च गायत्रीत्र्यंबकं जातवेदोमन्त्रं च एकैकमावर्त्य। पुनर्वैपरीत्येन जातवेदोमन्त्रक्रमेण तदेवमन्त्रषट्कं पंचवारमावर्त्य। पुनः। ॐ नमो भगवते विस्नवे विश्वमूर्त्ते मां रक्ष रक्ष। ॐ नमो भगवते विस्नवे विश्वरूपाय। ॐ नमो भगवते विस्नवे विश्वरूपमूर्त्तये। ॐ नमो भगवते विस्नवे विश्वरूपमूर्तिधराय। ॐ नमो भगवते विस्नवे विश्वरूपमूर्तिधरसेनाधिपतये। ॐ नमो भगवते महाविस्नवे वासुदेवाय विश्वरूप शरणं भव मे प्रभविस्नवे नमः। इति विश्वरूपमन्त्रः। पंचवारं जप्त्वा पुनश्चक्रादिविंशतिमन्त्रान् पंचवारमावर्त्तयेत्। तद्यथा। वराहनृसिंहगरुडचक्रप्रणवभुवनेशीबीजांते षोडशाक्षरीवर्णैकैकपूर्वकं विस्नुः प्राच्यां स्थितश्चक्री। ॐ नमो भगवते विस्नवे चक्रमूर्त्ते मां रक्ष रक्ष। ॐ नमो भगवते विस्नवे चक्राय चक्रमूर्त्तये चक्रमूर्तिधराय चक्रमूर्तिधरसेनाधिपतये सहस्रारं हुं फट्। इति चक्रमंत्रः। पुनर्वराहादिबीजांते विस्नु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ग्र·सं· र्दक्षिणतोगदी। ॐ नमो भगवते विष्णुवे गदि मूर्तेमां रक्ष रक्ष ॐ नमो भगवते विष्णवे गदिने गदिमूर्तये गदिमूर्तिधराय गदि
३०२ मूर्तिधरसेनाधिपतये महागदायै हुं फट्। पुनः शार्ङ्गीधन्ये अवशिष्टमंत्राः। प्रतीच्यां शाङ्र्ङधन्विष्णुरित्यादि महाशार्ङ्गी
य हुं फट्। इत्याद्येवमुक्तरीत्या औह्याः। पुनर्वैष्णवास्रगीतात्रिष्टुप्सुदर्शनमंत्रानादौ संयोज्यबुद्धिः स्वास्वरूपमित्यादि
वक्ष्यमाणगाथात्रयं प्रत्येकं पंचवारमावर्त्य। पुनः। ॐ नमो भगवते सर्वविष्णवे विश्वरूपिणे वासुदेवाय चक्रायास्वर्वा
युधधृते नमः। इत्येकवारं जप्त्वा अंगरक्ष्यादिकं पूर्वोक्तवल्लवाजपमुपसंहरेत्। एवं विष्णुपंजरकल्पानाप्रकारः। पूर्वे
सिकताप्रतिष्ठाविधानांते प्रोक्तः फलवाचकश्लोकः। अत्राप्यनुसंधेयः। अथात्र सूचितगाथाप्रकारो लिख्यते॥ शतानिक
उवाच॥ भगवन् किहरीरक्षांसचकार द्विजोत्तमः। ययानिधूर्तवीर्यासौ नीरसो रजनीचरः। शौनक उवाच। एकाग्रन्नितो गो
विंदे तज्ज्ञपंस्तत्परायणं। सर्वदुष्टोपशमनं प्रविष्टो विष्णुपंजरं। शतानिकोवाच॥ विष्णुपंजरमिच्छामि श्रोतुं धर्मभृतां वर।
सदा सर्वभयेभ्यस्तु रक्षा या परमा भवेत्। शौनक उवाच त्रिपुरं जघुषः पूर्वं ब्रह्मणा विष्णुपंजरं। शंकरस्य कुरुश्रेष्ठ रक्ष
णाय निरूपितं। वागीशेन तु शक्रस्य बलं हंतुं प्रयास्यतः। तस्य स्वरूपं वक्ष्यामि तन्निबोध महीपते। विष्णुः प्राच्यां स्थितश्च एमः
की विष्णुर्दक्षिणतोगदी प्रतीच्यां शाङ्र्ङधन्विष्णुः खड्गी चैवममोतरे। हृषीकेशो विकोणेषु तच्छिद्रेषु जनार्दनः। कोऽस्य ३०२

For Private And Personal

पीहरिर्भूमौ नसिंहो वरेमम। सुरांतमेवं तं चक्रं भ्रमस्येतस्तु दर्शनम्। तस्मांशुमालादुष्प्रेक्ष्या हंतुप्रेतनिशाचरान्। गदा ये यं सहस्रार्चिरुद्धमत्पावकोपमा। रक्षोभूतपिशाचानां डाकिनीनां च नाशिनी। शार्ङ्गविस्फुर्जितं चैनं वासुदेवस्य मद्रिपून्। तिर्यङ्मनुष्यकूष्मांडप्रेतादीन् हंत्वशेषतः। खड्गधाराज्वलज्ज्योत्स्नानिर्धूता ये ममाहिताः। ते यांतु सौम्यतां सद्यो गरुडेनेव पन्नगाः। सर्वे भवंतु ते सौम्याः कृष्णशंखरवाहताः। चित्तवृत्तिहरा ये मे ये जनाः स्मृतिहारकाः। बलौजसां च हर्तारश्छायाविभ्रंशकाश्च ये। ये चोपभोगहर्तारो ये च लक्षणनाशकाः। कूष्मांडास्ते प्रणश्यंतु विष्णुचक्ररयाहताः। वराहो रसातले विषमेषु च वामनः। अटव्यां नारसिंहस्तु सर्वतः पातु केशवः। बुद्धिस्वास्थ्यं मनःस्वास्थ्यं स्वास्थ्यमैंद्रियकं तथा। ममास्तु देवदेवस्य वासुदेवस्य कीर्तनात्। पृष्ठे पुरस्तान्मम दक्षिणोत्तरे विकोणतश्चास्तु जनार्दनो हरिः। तमीड्यमीशानमनंतमच्युतं जनार्दनं प्रणिपतितो न सीदति। यथा परं ब्रह्म हरिस्तथा परं जगत्स्वरूपं च स एव केशवः। ऋतेन तेनाच्युतनामकीर्तनात्प्रणाशमेतु त्रिविधं ममाशुभम्। इति पूर्वोक्तगाथा समाप्ता॥ ॥ इति प्रपंचसारसारसंग्रहे गीर्वाणेंद्रविरचिते। चतुर्विंशतिः पटलः। अथ प्रासादविधानमुच्यते॥ मनःप्रसादप्रदत्वात् प्रासादसंज्ञा। अथ शैवाचमनं जल इष्ट्वा ब्रह्मतीर्थेन ॐ वं ह्रां आत्मतत्त्वाय स्वधा ॐ वं ह्रीं विद्यातत्त्वाय स्वधा ॐ वं ह्रूं शिवतत्त्वाय स्वधा वामदेव ऋषिः पंक्तिश्छंदः ईशो देवता ह्रां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्र॰सं॰ हृत् ह्रीं शिरः इत्याद्यंगानि ध्यानं भूत्वाहि टंकघंटासिस्फटिककुलिशपाशाग्न्यभीतिर्दधानं दोर्भिः। शीतांशुखंडप्रतिघटि
३०२ तजटाभारमौलिं त्रिनेत्रं। नानाकल्पाभिरामापघनमहिमतार्थप्रदं सुप्रसन्नं पद्मस्थं पंचवक्त्रं स्फटिकमणिभं पार्वतीशं नमामि
हौं। इति मन्त्रः। हकारश्चतुर्थस्वरबिंदुभिरयं मन्त्रः। एकादशलक्षं जपेत्। मधुरत्रयाप्लुतैः करवीरपुष्पैर्वाजपाकुसुमैर्वा कम
लैर्वा धवलेन पायसेन वान्नपतरुसमिद्भिर्वा दशांशं होमः। करवीरम्। अरली। जपैः। रोपर रपरस। कोल्हे। अथ न्यासः
हों ईशानाय नमः। हें तत्पुरुषाय नमः। हुं अघोराय नमः। हिं वामदेवाय नमः। हं सद्योजाताय नमः। इत्यंगुलिष्वंगुष्ठादिषु
विन्यसेत्। पुनरेतैरुक्तैः पंचभिर्मंत्रैः मूर्द्धाननहृद्गुह्यपादेषु च न्यसेत्। पुनरेतैः पंचभिर्मंत्रैः ऊर्ध्वप्राग्दक्षिणोदक्पश्चि
मसंस्थेषु न्यसेत्। अथ पूजार्थं पीठविधानमुच्यते अष्टपत्रगुणरत्नराशिभिर्वीथिकल्पतरुभिः समावृतं। मंडलं प्र
तिविधाय शूलिनं पीठमन्त्रनवशक्तिभिर्यजेत्। अस्यार्थः। प्रथमं अष्टपत्रपद्मं विलिख्य। तद्बहिर्वृत्तत्रयं विलिख्य। तद्बहि
र्द्वादशराशिमंडलं विलिख्य। तद्बहिश्चतुरस्रद्वयं विलिख्य। तच्चतुरस्रद्वयोरंतरालं वीथिसंज्ञं भवति। तस्यां वीथ्यां लता
रूत्वा विलिखेत्। ततः कल्पतरुसंज्ञं भवति। अष्टदलकर्णिकामध्ये प्रासादबीजं विलिख्य। अष्टदलमूलेषु स्वरद्वंद्वं विलि प्रपः
ख्य। दलमध्ये ॐ ह्रीं हौं नमः शिवाय। इति शैवाष्टाक्षरं विलिख्य। सर्वतो वहिः कादिवर्णैरावेष्ट्य। तद्बहिश्चतुरस्रकोणेषु २०२

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

